श्री हेमचन्द्राचार्यग्रन्थावली १७

ॐ अर्हम्

श्रीवीरचन्द्रसूरिशिष्यश्रीदेवसूरिविरचितं

॥ जीवानुशासनम् ॥

स्वोपज्ञवृत्तिसहितम्

पत्तनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी—
शाह-जगजीवन उत्तमचन्द-लहेरूचन्द भोगीलालाभ्यां
प्रकाशितम्

श्रावकपण्डित-भगवानदास-वीरचन्द-प्रमुखैश्च
संशोधितम् ॥

अमदावाद—घीकांटावाडयन्तर्गत "जैन एड्वोकेट" मुद्रणालये
वाडीलाल बापुलाल शाह इत्यनेन मुद्रितम्

वीर संवत् २४५४. विक्रम संवत् १९८४

सने. १९२८

प्रथमावृत्तिः. प्रतयः ५००.

मूल्यम्—१-०-० रूप्यकमेकम् ।

॥ समर्पणम् ॥

क्रियोद्धारकपन्न्यासश्रीसत्यविजयगणिपट्टान्वयि-

श्रीगिरिनारतीर्थजीर्णोद्धारक-श्रीहेमचन्द्रा-

चार्यग्रन्थावलीस्थापनकृतोपदेश-

आचार्यपदविभूषित श्री

श्री श्री १००८

श्री विजय-

नीतिसूरी-

श्वरेभ्यः

समर्पयन्ति ग्रन्थरत्नमिदम्

श्रीमदाचार्यवर्यानेकगुणगणावर्जितहृदयाः—

श्रीहेमचन्द्राचार्यसभायाः

प्रधानाधिकारिणः.

॥ प्रास्ताविकम् ॥

जीवानुशासनमिदं श्रीमन्त आचार्यवर्याः श्रीदेवसूरयो विरचयाम्बभूवुः । क्व कदा च संजातैस्तैः कस्मिन् समये विरचितमित्यादि सर्वं प्रान्तप्रदर्शितप्रशस्त्यैव स्वयमेव सुस्पष्टं ज्ञापितम् ।

श्रीजयसिंहदेवनरेश्वरे विद्यमाने सति श्रीअणहिल्लपाटकनगरमध्ये "दोहट्टी" नामश्रावकवसतिस्थितैः श्रीवीरचन्द्रसूरीणां शिष्यमात्रैः श्रीदेवसूरिभिर्बृहद्गच्छशिरोमणीनां श्रीमदुत्तराध्ययनलघुवृत्ति-वीरचरित्र-रत्नचूडादिशास्त्रकर्तॄणां श्रीनेमिचन्द्रसूरीणामुपदेशादेकादशशतोपरिष्टाद्व्यष्टे संवत्सरे(विक्रम संवत्सरे ११६२)नवम्यां तिथावादित्यवासरे त्रयोविंशत्यधिकत्रिशतगाथं प्रकरणमिदं निर्मितम् । सप्ततिगृहनिवासिभिः श्रीजिनदत्तसूरिभिः संशोधितम् । अन्येषां च महेन्द्रसूरिप्रमुखाणां सूरिप्रवराणां सम्मतम् ।

अस्य वृत्तिरपि स्वोपज्ञैव । सा च तत्रैव नगरे तस्मिन्नेव राजनि गूर्जरमण्डलं प्रशासति सति, तस्मिन्नेव वसतिस्थाने स्थितैर्दानरुचेः श्रेष्ठिजासकस्य वीरादिमातुश्च जिन-साधुपूजनरतायाः श्राविकाया वसुन्धर्या उपष्टम्भात् श्रीदेवसूरिभिरेकेन मासेन सरस्वतीतोषतः कृता । श्रीनेमिचन्द्रसूरिभिश्च संशोधिता ।

अत एव ज्ञायते—" श्रीमुनिचन्द्रसूरीणां शिष्यप्रवराः समकालीना अपि श्रीमन्तो वादिदेवसूरय एतेभ्यो भिन्ना एव" इति

प्रकरणेऽस्मिन्नष्टात्रिंशदर्थाधिकारा जीवस्य मध्यात्मनोऽनुशासनरूपतया चर्चिता विद्यन्ते । अर्थात् स्वसमकालीनजैनसंघमध्ये प्रचलिताः केचिद् विवादग्रस्तविषयाः समालोचिताः । ग्रन्थहृदयं तु साङ्गोपाङ्गग्रन्थावगाहनेनैव प्राप्स्यन्ति चर्चाचतुरा विद्वांसः । तेन नेह प्रतन्यतेऽर्थविस्तारः ।

विक्रमद्वादशशताब्दिमध्ये यदा श्रीमद्धेमचन्द्रप्रभुप्रभृतयोऽनेके महान्त आचार्यवर्या विहरन्तस्तत्कालीनप्रचलितचर्चाभिः जैनसंघपरिस्थितिज्ञापकमिदं प्रकरणं समवबुध्य किञ्चिदशुद्ध-अशुद्धतराभ्यामादर्शपुस्तकाभ्यां संशुध्य प्रकाशितम् । आदर्शदोषान्मतिमान्द्यात् मुद्रकप्रमादाद्वा याः काश्चिदशुद्धयस्संजातास्स्युः, ताः संशोध्या धीधनैः सिद्धान्तहृदयैः——

अणहिल्लपाटकपत्तनम् स १९८४ फाल्गुन कृष्णत्रयोदशी	इति प्रार्थयन्ति —— पं० भगवदास-प्रभुदास-वीरचन्द्राः

॥ अनुक्रमणिका ॥

ॐ अर्हम्

श्रीदेवसूरिविरचितं—

जीवानुशासनं

स्वोपज्ञटीकासहितम् ॥

अल्पश्रुतमतिसम्मतमतकरिकुम्भस्थलैककेसरिणं ।
वीरं नत्वा जीवानुशासनं किमपि विवृणोमि ॥ १ ॥

तत्र तावदभीष्टदेवतानमस्कारार्थं अभिधेयादिप्रतिपादनार्थं च प्रकरणस्य प्रकरणकारो हेतुगर्भामिमामादौ गाथामाह—

निम्महियरागरोसं वीरं नमिऊण भुवणतियबंधुं ।
मज्झत्थभावणाए जीवस्सणुसासणं वोच्छं ॥ १ ॥

वीरं नत्वा जीवानुशासनं वक्ष्ये इति संटङ्कः । अक्षरार्थस्त्वयम्- 'निर्मथितरागरोषं' निराकृतप्रीतिद्वेषं 'वीरं' वर्तमानतीर्थाधिपतिं 'नत्वा' प्रणम्य, किं विशिष्टं ? 'भुवनत्रिकबन्धुं' जगत्त्रयबान्धवं, 'माध्यस्थ्यभावनया' रागद्वेषाभावेन 'जीवस्य' आत्मनः जातिनिर्देशाद्वा जीवस्य भव्यप्राणिगणस्य, एवमग्रेऽपि जीवामन्त्रणे ज्ञातव्यम् 'अनुशासनं' शिक्षां, अत्र च " स्वराणां स्वरे प्रकृतिलोपसन्धयः । " इति प्राकृतलक्षणेन अकारलोपे अनुशब्दाकारस्य स्वरत्वे च रूपमिदम्, एवमन्यत्रापि यथासंभवं ज्ञेयमिति, 'वक्ष्ये' अभिधास्ये । शब्दव्युत्पत्त्यादिचर्चस्तु सर्वत्र सुकर एवेति न प्रतन्यते । अत्र च पूर्वार्धेनाभीष्टदेवतानमस्कारः प्रतिपादितः, तृतीयपादेन च हेतुगर्भत्वं प्रकटितं, तुर्यपादेन त्वभिधेयं प्रकाशितं, सम्बन्धस्तु स्वत एव वाच्यवाचकभावादिः प्रतिपादनीयः । प्रयोजनं तु कर्तृश्रोत्रोरनन्तरपरम्परभेदाद् द्विधा, तत्र कर्तुरनन्तरं कुमतनिराकरणेन सन्मार्गावताराद् भव्योपकारः, श्रोतुश्च यथावस्थितानेकशास्त्रप्रतिपादितार्थप्रतिपादकप्रस्तुतप्रकरणार्थज्ञानम्; परम्परं तु यथावस्थितकथनज्ञानाभ्यां सम्यक्क्रियात उभयोरपि परमपदप्राप्तिरेवेति । ननु अन्येष्वपि विशेषणेषु विद्यमानेषु भगवतः

श्रीवीरस्य किमित्येवंविधं विशेषणद्वयं कृतम् ? सत्यम्, प्राधान्यख्यापनार्थम् । तथाहि–सर्वस्याप्यनुष्ठानस्य प्रत्युपेक्षणादेः सिकताकवलचर्वणप्रायस्य रागद्वेषजय एव फलमुपवर्ण्यते, स च भगवतो वर्द्धमानस्य माध्यस्थ्यभावनाप्रकर्षवशप्रवृत्त-शुक्लध्यानसामर्थ्यादविकलः सम्पन्नः, तत्सम्पत्तौ च सर्वोत्तमत्वादुपकारित्वाच्च भुवनत्रयस्य बन्धुर्जातः, अन्योऽपि यो मध्यस्थो भविष्यति स एवंविधः पारम्पर्येण भविष्यति, अत एव प्रकरकारेणापि 'माध्यस्थ्यभावनया' इत्युक्तं. अतः स्थितमित्थं विशेषणद्वयोपादानेन इति गाथार्थः ॥ १ ॥

साम्प्रतं ' जीवानुशासनं वक्ष्ये ' इति यदुक्तं तत्सफलीकुर्वन् यादृग्विधानां सूरीणां वचस्सु चित्तं दातव्यमिति तेन द्वारेण जीवोपदेशं प्रयच्छन्नपायपरिहारगर्भं गाथाचतुष्टयमाह—

गंभीरसिद्धसिद्धंतसिंधुसंपत्तपरमपाराणं ।
सयलजणसम्मयाणं पवयणवच्छल्लजुत्ताणं ॥ २ ॥

कुग्गहविवज्जियाणं अणिंदणिज्जाणं परिणयवयाणं ।
देसाइजाणयाणं अणुद्धयाणं गुणड्ढाणं ॥ ३ ॥

संवेगभाविगाणं अणुओगपराण परहियरयाणं ।
उस्सग्गववायाणं विसयविभागंमि दक्खाणं ॥ ४ ॥

एवंविहसूरीणं वयणेसुं देसु माणसं णिच्चं ।
जइ भवसंसरणाओ निव्विण्णो रे तुमं जीव ॥ ५ ॥

व्याख्या—गम्भीरो मन्दमन्यलब्धमध्यः स चासौ सिद्धश्च प्रसिद्धः स चासौ सिद्धान्तश्च समयः स एव सिन्धु समुद्रः तस्य सम्प्राप्तो--लब्धः पारः पर्यन्तो यैस्ते गम्भीरसिद्धसिद्धान्तसिन्धुसम्प्राप्तपरमपारास्तेषाम् । सकलाः समस्ताः ते च ते जनाश्च गीतार्थाचार्यादिलोकाः, तेषां सम्मता अभिप्रेतास्तेषाम् । प्रवचनं संघः, तस्य वात्सल्यमनुकूलता तस्मिन युक्ता सबद्धास्तेषाम् ॥ २ ॥ कुग्रहः स्वाभिप्रायेण दुष्टाभिनिवेशः तेन विवर्जिता रहितास्तेषाम् । अनिन्दनीयानां—गीतार्थादिजनादूष्याणाम् । परिणतवयसां वयःस्थविराणाम् । देशादिज्ञानां-क्षेत्रकालादिपरिज्ञानवताम् । अनुद्धतानां-गर्वविवर्जितानाम् । गुणाः क्षमादयः तैराढ्याः ईश्वरास्तेषाम् ॥ ३ ॥ संवेगभावितानां–मोक्षाभिलाषिणाम् ।

अनुयोगपराणां सिद्धान्तव्याख्याननिष्ठानाम् । परहितरतानां-परे आत्मव्यतिरिक्ता जीवास्तेषां हितं सम्यक्त्वादिगुणाधानं तत्र रताश्चासक्तास्तेषाम् । उस्सग्गववायाणंति " बहुवयणेण दुवयणं " इति प्राकृतलक्षणनिर्देशाद् उत्सर्गापवादयोः सामान्यविशेषोक्तलक्षणयोर्विषयविभागे—गोचरविच्छित्तौ छेकानाम् । एतेषु च विशेषणेषु परस्परं कथंचिदन्तर्भावेऽपि न पौनरुक्त्याशङ्का विधेया, प्राधान्यख्यापनार्थत्वादेतदुपन्यासस्य । एवंविधसूरीणां उक्तप्रकाराचार्याणां वचनेषु भणितिषु, अनुस्वारश्चात्र " नीयाऽलोयमभूया य आणियाएए बिंदुदुब्भावा । " इति प्राकृतलक्षणप्रभवः. देहि प्रयच्छ मानसं—चित्तं नित्यं सर्वदा. यदीति हृदयाभिप्रायविकल्पार्थः. भवसंसरणात्—संसारसंसृतेः निर्विण्णः खिन्नः ' रे ' इत्यामन्त्रणद्योतनार्थं , त्वं भवान् जीव-आत्मन् ? । अयमभिप्रायः—'इत्थं भवति इत्थं न भवति. एवं क्रियते एवं न क्रियते, इदं वस्तु ' इत्यादि वस्तुविचारापेक्षयैवेदमुपदिश्यते. सामान्यदेशना तु किंचित्पूर्वोक्तगुणरहितेष्वपि श्रोतव्या । इति गाथाचतुष्टयार्थः ।

ननु किमन्यथापि केचिद् व्याचक्षते ? येनेत्थमुपदिश्यते । सत्यम्, ' व्याचक्षते ' इत्याद्यावेदयन् यदर्थं च जानन्तोऽप्यगणितापाया यादृशाः स्वमन्यन्ते कथयंश्च गाथात्रयमाह—

जं दूसमभावाओ एगे अलसा सधम्मकज्जेसु ।
अन्ने नट्ठोसविकत्थणाए लोयाण सावेक्खा ॥ ६ ॥
नह पन्नविंति धम्मं जह नियपक्खस्स होइ परपुट्ठी ।
जाणंति णय मूढा अत्ताणं वंचिमो एवं ॥ ७ ॥
जह मरणमुवगयाणं जीवाणिच्चाइ निसुणिऊणंपि ।
अवगणियभवदंडा किर सच्चपरूवया अम्हे ॥ ८ ॥

यद्-यस्माद् दुःषमानुभावात्-समयोक्तलक्षणकालविशेषमाहात्म्यात् एके केचन अलसाः-मन्दोत्साहाः स्वधर्म्मकार्येषु प्रत्युपेक्षणादिव्यापारेषु , अन्ये

---

१ नीतौ लोपमभूतौ चानीतौ एतौ बिन्दु-द्विर्भावौ ।-

एतौ अनुस्वारद्विर्भावौ विद्यमानौ लोपं नीतौ-प्राप्तौ भवतः अविद्यमानौ तर्हि आनीतौ भवतः ।

अपरे तद्दोषविकत्थनया अत्याचरणपुनःपुनर्भणनेन लोकानां श्रावकाणां सापेक्षाः तदभिप्रायानुवर्तकाः ॥ ६ ॥ तथा तेन प्रकारेण प्रज्ञापयन्ति कथयन्ति 'धर्मं' श्रुतचारित्रलक्षणं 'यथा' येन प्रकारेण 'निजपक्षस्य' स्वमतस्य 'भवति' जायते 'परा' प्रधाना ह्रस्वत्वं चात्र "एए च्छ समाणा" इति प्राकृतप्रभवम् 'पुष्टिः' पोषः । 'जानन्ति' अवबुध्यन्ते 'नैव' न च मूढाः परमार्थतोऽत्र 'आत्मानं' स्वं वञ्चयामो विप्रतारयामः 'एवं' अमुना प्रकारेण ॥ ७ ॥ यथा शरणमुपगतानां जीवानामित्यादि निश्रुत्याऽपि न केवलमश्रुत्वा इत्यपेरर्थः । आदिग्रहणादेवं दृश्यं — "निर्कियइ सिरे जोउ एवं आयरिओ वि हु उस्सुत्तं पन्नविंतो उ" सुगमं च । 'अपकर्णितभवदंडा' अवधीरितसंसारभयाः, किलेति आत्मरुचिसंसूचकाः 'सत्यप्ररूपकाः' अवितथदेशकाः 'अम्ह' त्ति वयम् । इति गाथात्रयार्थः ॥ ८ ॥

यदि ते एवंविधास्तर्हि किं कर्त्तव्यम् ? इत्याह--

मा देसु तेसु मणयपि माणसं माणमुव्वहंतेसु ।
धम्मरयपुव्वसूरीण मग्गभंगं कुणंतेसु ॥ ९ ॥

'मा' इति निषेधे 'देहि' प्रयच्छ 'तेषु' अभेदोपचारात्तद्वचनेषु, 'मनागपि' स्तोकमपि 'मानसं' अन्तःकरणं, मानं गर्वं 'उद्वहत्सु' धारयमाणेषु, 'धर्मरतपूर्वसूरीणां' उग्रकविहारिचिरन्तनाचार्याणां 'मार्गभंगं' पद्धतीलोपं 'कुर्वत्सु' विदधत्सु । 'शीतलविहारिसमाचीर्णमार्गभङ्गेऽपि न दोषः' इत्यावेदनार्थं 'धर्मरत' इति विशेषणम् । अयमभिप्रायः—यत्किमप्यत्र प्रकरणे प्रतिपादयिष्यति प्रकरणकारस्तत्सर्वं धर्मरतपूर्वाचार्यैरनुष्ठितं किंचित्करणतः किंचित्कथनतः किंचिच्चानुमतेरिति मत्वा मोहं हित्वा स्वाग्रहं विहाय आदरं विधाय धर्मार्थिभिरत्रोक्तं तथेति प्रतिपत्तव्यम् इति गाथार्थः ॥ ९ ॥

साम्प्रतं यदुक्तं 'धर्मरतपूर्वाचार्यमार्गभङ्गं कुर्वत्सु' इति दर्शयन्निदमेकीयमतं गाथया प्राह । अयं च संबन्धसमर्थोऽन्यत्राप्यधिकारेषु सम्बन्धनीयः सामान्येन, अतः प्रत्यधिकारं तत्र भणिष्यामः । आद्याधिकारद्वयस्य तु विशेषेण पूर्वमुपादानं सम्यक्त्वनिर्म्मलीकरणार्थम् । सर्वज्ञप्रतिकृतिः साधुः, यथावस्थि-

ताकरणे हि मालिन्यादि सम्यक्त्वस्योपजायते, तच्च कुश्रवणतो भवति. अतस्त-द्दर्शयन् जिनप्रतिकृतिविषयं तावदाह—

दव्वत्थउत्ति केइ बिंबपइट्ठं भणंति सड्ढस्स ।
तह कप्पे भणियमिणं संति पइट्ठवणवयणाओ ॥ १० ॥

द्रव्यं—वासकुसुमधूपकषायमृत्तिकानेत्रोन्मिलनकारिलक्षणं तत्प्रधानस्तवो द्रव्यस्तवः भावप्रधानत्वान्निर्देशस्य ततो द्रव्यस्तवत्वात्कारणात्, इति-हेतौ. स च प्रदर्शित एव । केचन एके ' बिम्बप्रतिष्ठां ' सर्वज्ञप्रतिनिधेस्तद्गुणा-रोपलक्षणां भणन्ति जल्पन्ति श्राद्धस्य श्रावकस्य । अयं तेषामाशयः—यति-धर्मो हि भावस्तवप्रधानः, स च प्रतिष्ठायां क्रियमाणायां पूर्वोक्तद्रव्यव्यापार-णतो न सम्यग् जायतीति । तथा परं कारणं—' कल्पे ' छेदग्रन्थविशेषे ' भणितं ' प्रतिपादितं ' इदं ' प्रतिष्ठाविधानम् तद्धि ' प्रतिष्ठापनवचनात् ' " सावओ कोइ पढमं जिणपडिमाए पइट्ठवणं करेइ " त्ति भणनात् श्रावकः कश्चित्प्रथममात्र जिनप्रतिमायाः जिनमूर्त्तेः प्रतिष्ठापनं प्रतिष्ठां करोति विदधाति । गाथायां प्रथमं करोत्यादिशब्दानुपादानं छन्दोवशान्न कृतं सूचनाच्च सूत्रस्येति लभ्यते । अतः स्थितमेतत् कारणद्वयादुक्तलक्षणात् श्रावक एव प्रतिष्ठां करोति-न साधुरिति पूर्वपक्षार्थः ॥ १० ॥

साम्प्रतं प्रथमपक्षस्य परिहारं दातुकामस्तदनुष्ठानेनैव चोत्तरं गाथार्द्धेनाह

सयमभिलाणं दामं खिवंति सड्ढीण खंधदेसंमि ।

स्वयं—आत्मना ' अम्लानां ' सार्द्रां, ' दाम ' मालां ' क्षिपन्ति ' आरो-पयन्ति ' श्राद्धीनां ' श्राविकाणां ' स्कन्धदेशे ' ग्रीवायाम् । अयमभिप्रायः—यदि द्रव्यस्तवभीतिमद्भिः प्रतिष्ठा न क्रियते किमित्युपधानविधौ मालारोपणं विधीयते ? अम्लानादित्वेनास्याऽपि साध्वनुचितद्रव्यस्तवत्वाद् इदमपि कर्तुं न युज्यते इति ।

एवमुक्तः परः स्वमतस्थित्यर्थं कदाचिद्वदिष्यत्येवं तत्तृतीयपादेनाह—

अह सत्थे भणियमिणंति ।

' अथ ' इत्याचार्यवचनानन्तर्यार्थः, ' शास्त्रे ' महानिशीथाख्ये ' भणितं '

उक्तं, 'इदं' मालारोपणविधानम्, इतिहेतो, अतो विधीयते इति अस्याऽपि न्यायत उत्तरं चरमपादेनाह —

तत्थिमा त्ति वत्तव्वा ॥ ११ ॥

'तत्र' शास्त्रभणने 'इमा' त्ति इयं वक्ष्यमाणा युक्तिः अवितथभणितिः, 'वक्तव्या' वाच्या इति गाथार्थः ॥ १० ॥

तामेवाह —

सत्थंपि बहुमयं ते रइयं जं पुव्वसूरिपवरेहिं ।
ताणायरणं नणु मूढ होइ गिज्झं विसेसेण ॥ १२ ॥

शास्त्रमेव महानिशीथादिलक्षणं, अपिशब्दः एवकारार्थः, स च दर्शित एव, 'बहुमतं' अतीवाभीष्टं 'ते' तव 'रचितं दृब्धं यत् 'पूर्वसूरिप्रवरैः' चिरन्तनाचार्यप्रधानैः, 'तेषां' आचार्यवृन्दारकाणां 'आचरणं' चेष्टितं नन्वित्यक्षमायां 'मूढ' मन्दमते ! 'भवति' 'जायते, 'ग्राह्यं' स्वीकर्त्तव्यं 'विशेषेण आदरेण । इदमत्र तत्त्वम्—यदि तव पूर्वाचार्यवचनं शास्त्रस्थितं प्रमाणं ततस्तच्चेष्टितं विशेषतः कर्तुं युज्यते, न हि ते अनुचितं कुर्वन्ति । अत्र बहुवचनप्रक्रमेऽपि यदेकवचनेन निगमनं कृतं "तद्बह्वादेशोऽपि एकादेशः" इति वचनाददुष्टं मन्तव्यं, एवमन्यत्राऽपि इति गाथार्थः ॥ ११ ॥

अत्र यदि परो ब्रूयात् न मम तदाचरितं प्रमाणं, अतस्तत्साधनार्थं गाथार्द्धमाह—

असढेहिं समाइन्नं इच्चाइवयणओ तयं सिद्धं ।

असढैः—अमायिभिः समाचीर्णं आसेवितं 'इत्यादिवचनतः' एवं प्रभृतिभणनात् 'तकत्' पूर्वाचार्यानुष्ठितं 'सिद्धं' प्रतिष्ठितम् । आदिग्रहणादेवं दृश्यं—जं कत्थ य केणई असावज्जं न निवारियमन्नेहिं बहुमणुमयमेव-मायरियं' । सुगमं च । एतच्च पराभिप्रायमभ्युपगम्यास्माभिरुक्तम् । तत्त्वतस्तु द्रव्यस्तव एवेयं बिम्बप्रतिष्ठा न भवति, निरवद्याचार्यमन्त्राद्यनुष्ठानपूर्वकं गुणाध्यारोपणेन भावस्तवत्वादस्याः । किंच आचार्यप्रतिष्ठाकरणे श्रीमदुमास्वातिवाचक-समुद्रसूरि—हरिभद्राचार्यादिरचिताः प्रतिष्ठाकल्पा दृश्यन्ते, श्रावक-

प्रतिष्ठाकरणविधौ तु न किमपि दृश्यते विधानं, ततः कथं ते तां कुर्वन्तु ? मा वा भवतु, यदि श्रावकेण कुत्रचित्कदापि च कृता भवति भवद्वचनात् पूर्वं प्रतिष्ठा, ततो युज्येतेदमपि वक्तुम् । यदप्युच्यते अष्टापदजैनालये कृता भविष्यति तदपि युक्तं स्यात् यदि साधुव्युच्छित्तौ निष्पन्नं तत्स्यात् । किंच–आवश्यकचूर्ण्यां तत्करणविधिः सर्वः प्रतिपादितः न तु साधुना श्रावकेण वा प्रतिष्ठा कृता इत्युक्तम् । यच्च सम्प्रतिराजनिर्मापितानार्यदेशचैत्येषु साध्वभावात् कृता भविष्यति, तत्रापि पश्चाद् गतैः साधुभिः प्रतिष्ठा कृता भविष्यति तदपि वक्तुं शक्यते, तस्मात् किमेभिः कुशकाशावलम्बनैरिति

द्वितीयविकल्पशोधनायोत्तरार्द्धमाह–

कप्पंमि वि जं भणियं तं अणुजाणाइगारंमि ॥ १२ ॥

व्याख्या—कल्पेपि, न केवलं प्रथमविकल्पेन तव न किंचित्समीहितं जातं, द्वितीयेनापि तेन्यपिशब्दार्थः । यद्वचन भणितं तद्वचनमनुयानाधिकारे–रथस्य पृष्ठतोऽनुव्रजने, न प्रतिष्ठाधिकारे इति गाथार्थः

अस्यैवार्थस्य सुखावगमार्थं संबन्धपूर्वकमिदानीं कल्पोक्तं तदक्षरैर्लिख्यते । तत्र रथयात्रादौ प्रभूतजनसंसर्गाकुले सुसाधुभिर्न प्रवेष्टव्यं उत्सर्गतः । किं कारणं ? ' गच्छता मार्गे ईर्याशुद्धिर्न भवति भक्तादिशुद्धिश्च न भवति, प्रासानां च तत्स्थाने श्रावकादिलोकैरवरुद्धानि गृहाणि भवन्ति, ततो देवगृहेऽपि स्थातव्यं स्यात्, तथा स्त्र्यादिसंघट्टनतो रागद्वेषौ स्याताम् ' एतमाद्यर्थप्रतिपादिका विस्तरेण द्वारगाथा प्रतिपादिता, सा चात्र ग्रन्थविस्तरभयान्न लिखिता । " इमेहिं पुण कारणेहिं पविसियव्वं, जइ ण पविसइ तो चउगुरुयं पच्छित्तं । काणि य कारणाणि ? चेइयगाहा–

" चेइयपूया रायाणिमंतणं सन्निवाइखवगधम्मकही ।
संकियपत्तपभावणपवित्तिकज्जा य उड्डाहो ॥ (दारगाहा)

चेइय(पूया)रायानिमंतणं च दोवि दारे एगट्ठे वक्खाणेइ पविसंते इमे गुणा भवंति । सड्ढागाहा—

---

१ विधानमिति शेषः.

सद्धावुड्ढी रन्नो पूयाए थिरत्तणं पभावणया ।
पडिघाओ य अणत्थे अन्था य कया हवइ तित्थे ॥

रन्नो सद्धा वड्ढिया भवइ । चेइयपूया थिरीकया भवइ, तीर्थं प्रभावितम्, ये चार्हच्छासनप्रत्यनीका बहुजनं दोषान् ख्यापयन्ति एवंविधानामनर्थानां प्रतिघातः कृतो भवति । आस्था नाम स्वपक्षपरपक्षाणां अर्हत्कृते तीर्थे बहुमानत्वमुत्पादितं भवति । निमंतणं ।

सन्निति सावगा वाट एए दोन्नि दारे एगट्ठे वक्खाणेइ, एमेवय गाहा—

" एमेव य सन्नीण वि जिणाण पडिमासु पढमपट्ठवणे ।
मा परवाई विग्घं करेज्ज वाट नओ विसइ ॥ "

कंठ्या । सावओ कोइ पढमं जिणपडिमाए पट्ठवणं करेइ ! वाइणा य पविट्ठेणं इमे गुणा -परवाइनिग्गहे दट्ठं नय 'धम्माण' गाहा-

नयधम्माण थिरत्तं पभावणा सासणे अ बहुमाणो ।
अभिगच्छंति य विउसा अविग्घपूयाए सेयाए ॥

कंठ्या । सेयाएत्ति । अविग्घेणं पूआए कयाए सपक्खस्स इहलोए पर-लोए य सेयं । इह लोए असिवाइउवद्दवा न हुंति, परलोए नित्थगरपूयाए दरिसणविसुद्धी निव्वत्तिया भवइ ।

खवगत्ति दारं । इयाणिं 'आयाविंति' गाहा -

आयाविंति तवस्सी भावणया परप्पवाएणं ।
जइपरिस्साबि महिमं उवेंति कारिंति सड्ढा य ॥

कंठ्या । कारिंति सड्ढायत्ति । जइपरिसा तवस्सिणो उवेंति, तओ सावगा महिमं कारिंति कारविंति य ।

इयाणिं धम्मकहित्ति दारं । ' आयपर ' गाहा-

आयपरसमुत्तारो तित्थविवुड्ढी य होइ कहयंत ।
अन्नोन्नाभिगमेण य पूयाथिरया सबहुमाणो ॥

कण्ठ्या ।

इयाणिं संकियत्ति दारं । निस्संकियगाहा—

निस्संकियं च काहिइ उभये जं संकियं च सुअहरेहिं ॥ (दारं)
पत्तदारमियाणिं

अव्वोच्छित्तिकरं वा लब्भइ पत्तं दुपक्खाओ । (दारं)
पभावणादारमियाणिं –

जाइ–कुल–रूव–धण बलसंपन्ना इड्ढिमंत निस्संका ।
जयणाजुत्ता य जई समेच्च तित्थं पभाविंति ॥

उक्तं च –

प्रावचनी धर्मकथी वादी नैमित्तिकस्तपस्वी च ।
जिनवचनरतश्च कविः प्रवचनमुद्भावयन्त्येते ॥

जो जेण गुणेण रहिओ जेण विणा वा न सिज्झए जंतु ।
सो तेण धम्मकज्जे सव्वत्थामं न होवेइ ॥ (दारं)

इयाणि परिवित्तिदारं—

साहम्मियागयाणं खेमसिवाणं च लब्भइ परिवित्ति
गच्छंति जहि ताइं होहिंति तयावि अच्छइ वा ॥ (दारं)

इयाणि कज्जदारं सड्ढाइदारं

कुलमाईणं कज्जाइ साहिस्सं लिंगिणो य सासिस्सं ।
जं लोगविरुद्धाइं कारिंति लोगुत्तराइं च

समाप्ता द्वारगाथा ।

अत्र संज्ञिद्वारेणैव प्रयोजनं तदर्थव्याख्यानायाह—

तत्थ य पढमं ठवणं पढमं णामणं भणंति समयविऊ ।
पुव्वं पइट्ठियाए रहंमि अणुयाण अहिगारा ॥१३॥

व्याख्या– ' तत्र ' संज्ञिद्वारव्याख्याने, चः पुनरर्थः, प्रथमं स्थापनं प्रथमं न्याससमारोपणमिति यावत्, ' भणन्ति ' जल्पन्ति ' समयविदः ' सिद्धान्तज्ञाः । ' पूर्वं ' प्रथमं क्व न्यसन ? ' रथे ' जिनस्यन्दने भनुयानाभिकारात् उक्तलक्षणाद्धेतोरिति गाथार्थः ।

स्यान्मतं–कथमिदं ज्ञायते ? यदुतास्यायमर्थो न पुनर्मयोक्तः, अत आह—

जइ पुण पइट्ठअत्थो हवेज्ज तो महुरणयरिगेहेसु ।
मंगलपडिमाणंपि हु तुम्ह मया पावइ पइट्ठा ॥

व्याख्या–यदि पुनरिति पराभिप्रायाभ्यासनार्थः, प्रतिष्ठालक्षणोऽर्थोऽभिधेयो ' भवेत् ' जायेत ततो मथुरानगरीगेहेषु ' मथुराभिधानपत्तनसदनेषु मङ्गलप्रतिमानामपि, न केवलं तत्र संमतानामित्यपिशब्दार्थः हुः पूरणे, ' युष्माकं ' भवतां ' मताद् अभिप्रायात् प्राप्नोति ' भवति प्रतिष्ठा भवत्संमता । अत्राप्यस्य शब्दस्य विद्यमानत्वादित्यभिप्रायः । मङ्गलप्रतिमाश्चेह ता उच्यन्ते, यासामकरणे गृहस्योपद्रवादिकं भवति । यथाऽत्र देशरूढ्या गृहद्वारस्योपरि विनायकमूर्तिर्वास्तुविद्योपदेशात् क्रियते, तथा मथुरायां गृहे गृहे पार्श्वनाथजिनप्रतिमा ब्राह्मणादिभिरपि गृहद्वारस्योपरि कार्यन्ते; यदि न क्रियन्ते ततो गृहाणां पतनादिकं भवति । तथा च तत्रैव कल्पे भणितं मङ्गलचैत्यप्ररूपणावसरे–"महुराए नयरीए जिणपडिमाओ गिहे गिहे पइट्ठाविज्जंति । " प्रतिष्ठाप्यन्ते न्यस्यन्ते इति भवतोऽपि संमतम्, न हि तासां मिथ्यादृष्टिभिस्तत्र सम संमतं प्रतिष्ठाविधानं क्रियते । एतदिहाकूतं–अस्य शब्दस्यात्र न्यसनमेव वाच्यम् । किंच-प्रथमशब्दस्य नैरर्थक्यं प्राप्नोति, न ह्येकस्या एव प्रतिमाया द्वितीया प्रतिष्ठा क्रियते, येन तद्व्युच्छित्तये प्रथमशब्दोपादानं क्रियते । अस्मत्पक्षे तु प्रथमं रथारोपणं संभवत्येव । पुष्टालम्बना चाऽत्र करोतिभणनेऽपि कारापणं द्रष्टव्यं, ततश्च साधुभ्य उपदेशात् श्रावकः प्रतिष्ठां कारयतीत्यर्थः । यथा उमास्वातिवाचकोक्ताऽऽर्यायामस्यां -

" जिनभवनं जिनबिम्बं जिनपूजां जिनमतं च यः कुर्यात् ।
तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥ "

अत्र कुर्यादित्युक्तेऽपि कारयेदिति द्रष्टव्यं, न हि श्राद्धः स्वयं जिनमन्दिरं तत्प्रतिमां वा करोति, एवमत्रापि । प्रथमशब्दसाफल्यं त्वेवं कथयन्ति–तेन श्रावकेण प्रथममेव प्रतिमा कारिता निर्ग्रन्थेऽपि कारापणस्थाने करणशब्दप्रयोगः स्थाने स्थाने प्रतिपादित एवेति गाथार्थः ॥

एवं भणितेऽप्यप्रतिपद्यमानानां मायायं तेषां दूषणमाह—

तह कासहद सिरिभिल्लमाल सच्चउरबिंबमाईणं ।
अपमाणयं कुणंतेहिं तेहिं अप्पा भवे खित्तो ॥ १४ ॥

तथेति दूषणान्तरसमुच्चयार्थः । कासहद श्रीभिल्लमाल–सत्यपुरबिम्बादीनाम् । तत्र कासहदनगरमाबूपर्वतनिकटवर्त्ति, श्रीमालं साम्प्रतं यद् भिल्लमालमिति रूढं, सत्यपुरं म्लेच्छकुलजयलब्धदर्पभञ्जनलब्धमाहात्म्यश्रीमहावीरमहद्भक्तिस्थितं तत एषां कुलेष्वपि बिम्बादि सकल प्रतिमा, आदिशब्दात् शत्रुंजयगिरिमहातीर्थ (उज्जयन्तमहातीर्थ मोढेरपुर मथुरागिरि(नार) अर्बुदगिरि-स्तम्भनकस्थानादिपरिग्रहस्तावत्साम् । एतदिह हृदय-एताः साधुभिः प्रतिमाः प्रतिष्ठिताः । तथा च कासहदीयजिनस्तोत्रे पठ्यते

" नमिविनमिकुलान्वयविद्याधरनाथकालिकाचार्यैः ।
कासहदशैलनगरे प्रतिष्ठितो जयति जिनवृषभः ॥ "

एषास्तु सर्वजनवन्दिता ' वचनाणता ' आचार्यप्रतिष्ठितत्वेन ' अविधिप्रतिमा एता ' इति वदन्तः एषा सुरजनमानवसारतदनौचित्यलक्षणां कुर्वद्भिर्विदग्धैस्तैः श्रावककारितप्रतिष्ठाप्रतिपादनपरैरात्मा जीवो ' भवे ' संसारे ' क्षिप्तः ' प्रणुन्न इति गाथार्थः ।

ननु किमेतावता एतावान् दोषो भवति ? ' भवत्येव ' इत्यस्यार्थस्य साधनाय सिद्धान्तोक्तमाह

कप्पुत्तमववमाइं अवि पडिमासुवि तिलोयमहियाणं ।
पडिरूवमकुव्वंतो पावइ पारंचियं ठाणं ॥ १५ ॥

व्याख्या—कल्पस्यच्छेदग्रन्थस्योक्तं संवादक वचनं, परमेतावान् विशेषः– तत्र ' अन्नं च ' इत्यादौ गाथायां पठ्यते तीर्थकराशातनाधिकारे ।

'एवमादि' पूर्वोक्तप्रकारम् । अपीति संभावने, संभवत्येवैतत् 'प्रतिमास्वपि' जिनमूर्त्तिष्वपि, न केवलं साक्षाद्भावतीर्थकृतामित्यपिशब्दार्थः । 'प्रतिरूप' यथोक्ताशातनादिवर्जनमकुर्वन्नविदधानः 'प्राप्नोति' लभते 'पारंचिकं' प्रायश्चित्तं लिङ्गादिकम्, ठाणमिति । तिष्ठन्त्यस्मिन्निति कर्माणि प्रायश्चित्ता-नाचरणत इति स्थानं कर्माधारः कर्मभिश्च भवः, अतःसिद्धमिदं-'तेहिं अप्पा भवे खित्तो'त्ति । किंच-आचाराङ्गनियुक्त्यां दर्शनविशुद्धिं वर्णयता श्रुतकेवलिना भणितं-चिरन्तनचैत्यवन्दने दर्शनशुद्धिर्भवति सद्दहिणं तच्चेदं—

तित्थयराण भयवओ पवयणपावयणिअइ सड्ढीणं ।
अभिगमण-नमण-दरिसण-कित्तण-संमणय संथुणणं ॥ १ ॥
जम्माभिसेय-निक्खमण-चरण नाणुप्पाया य णिव्वाणे ।
दियलोयभवणमंदिर नंदिसर भोमणगरेसु ॥ २ ॥
अट्ठावयमुज्जंते गयग्गपयये य धम्मचक्के य ।
पासरहावत्तं चिय चमरुप्पायं च वंदामि ॥ ३ ॥
गणियनिमित्तं दुत्तीभं दिट्ठी अ वितहं इमं नाणं ।
इय एगंतमणुगया पुण पव्वगा इमे अन्था ॥ ४ ॥
गुणमाहप्पं इसिनामकित्तणं सुरर्नारंदपूया य ।
पोराणचेइयाण य इय एसा दंसणे होइ ॥ ५ ॥

चिरन्तनचैत्यानि च पूजयतो दर्शनशुद्धिर्भवति, न केवलं पूर्वगाथोक्तं कुर्वतः, अतः स्थितमिह चिरन्तनचैत्यानामवगणनादि न कार्यम् ।

ननु किमेवं बहुश्रुतवचनसन्दर्भश्रवणेऽपि ते एवं नूतनं प्रतिपादयन्ति ? उच्यते, विकृत्याद्यर्थम् । तथा चोक्तं व्यवहारे यथाच्छन्दलक्षणं कथयता-"सच्छन्दमई विगप्पियं काउं तं पन्नवेइ तओ तस्स गुणेण विगईओ लहइ, सायपडिबद्धो सुहं अच्छइ, तेण य सच्छन्दकप्पिएण पन्नविएणं समाहिओ समाणो पूइओ य निहि इड्ढिमाइगारवेहिं सज्जइ ।" इत्यादि । एतच्चाग्रेतनेष्वप्यधिकारेषु यथासंभवमायोज्यमिति गाथार्थः ।

इदानीं पूर्वोक्तार्थनिगमनगर्भं जीवोपदेशमाह—

जह समयण्णू जंपंति मुणसु तह जीव! समयवयणाइं
पुव्वुत्तदोसजालस्स जेण नो भायणं होसि ॥ १६ ॥

व्याख्या—'यथा' येन प्रकारेण 'समयज्ञाः' सिद्धान्तविदो 'जल्पन्ति' वदन्ति 'मुणसु' जानीहि 'तथा' तेन प्रकारेण, न पुनः स्वमत्यवबोधेन, 'जीव!' आत्मन्! 'समयवचनानि' सिद्धान्तवाक्यानि। तत 'पूर्वोक्तदोष-जालस्य' भवपातादिदूषणव्रातस्य येन कारणेन 'नो' नैव भाजनं पात्रं भवसि जायसे इति गाथार्थः।

समाप्तो विधिप्रतिष्ठापनलक्षणप्रथमाधिकारः।

पूर्वोक्तसम्बन्धमिदानीं द्वितीयमधिकारं सपूर्वपक्षोत्तरं गाथात्रयेणाह—

उम्मग्गतरलियमई करिंति नो कारविंति वंदणयं।
पासत्थाईयाणं तं न जओ कप्पमाईसु ॥ १७ ॥
कारणजाए जाए पासत्थाईण वंदणं कुज्जा।
अह नो करेइ साहू इमं तओ होइ पच्छित्तं ॥ १८ ॥
भणियं सुद्धजईणं एयं जं उण हवंति पासत्था।
एएहिं गुणेहिं तओ नो कुज्जइ तारिसं भणिउं ॥ १९ ॥

उन्मार्गेण सामान्योक्तविधिना—

पासत्थाइ वंदमाणस्स नेव कित्ती न निज्जरा होइ।
कायकिलेसं एमेव कुणइ तह कम्मबंधं च ॥ "

इत्यवमादिना तरलिता अन्यथान्यथाभिमता मतिबुद्धिर्येषां ते उन्मार्गतर-लितमतयः 'कुर्वन्ति' विदधति स्वयं, 'नो' इति निषेधे नोशब्दस्य डमरुकग्र-न्थिन्यायेनोभयत्र सम्बन्धात् न च कारयन्त्यन्यस्मात् आत्मव्यतिरिक्तात् वन्दनकं शोभनवन्दनादिकम्। केषाम्? इत्याह—पार्श्वस्थादीनां सिद्धान्तो-क्तलक्षणानाम्, आदिशब्दादवसन्नादिग्रहः। 'तत' तरलितमतिकरणा-दिकं नेति निषेधे। 'यतो' यस्मात्कारणात कल्पादिच्छेदग्रन्थादिषु आदिशब्दादावश्यकचूर्णि-तद्वृत्ति-निशीथादिपरिग्रहः, 'कारणजाते' प्रयोजन-प्रकारे 'जाते' सम्पन्ने पार्श्वस्थादीनां वन्दनमुक्तरूपं 'कुर्याद्' विदध्यात्।

अथेति विकल्पार्थः, नो इति निषेधे, करोति विदधाति साधुर्यतिः ' इमं ' ति इदमुक्तस्वरूपं, ततस्तस्मात्कारणाद्भवति जायते ' प्रायश्चित्तं ' चारित्ररत्नमालिन्यकं करोति । ' भणितं ' प्रतिपादितं ' शुद्धयतीनां ' निष्कलङ्कचारित्रिणां ' एयं ' ति एतत्पूर्वोक्तम् । तथाहि तत्र निशीथोक्तं सविशेषणमिति कृत्वा तदेवादौ दर्श्यते —

" मुक्कधुरा संपागडसेवी चरणकरणपरिहीणे ।
लिंगावसेसमेत्ते जं किरइ तारिसं वोच्छं ॥ १ ॥
वायाए णमोक्कारो हत्थुस्सेहो य सीसणमण च ।
संपुच्छणत्थणं थोभवंदणं वंदणं वावि ॥ २ ॥

तत्र ' वायाए नमोक्कार ' इत्यादीनि थोभवन्दनपर्यन्तानि सुबोधानीति कृत्वा न वितन्यन्ते । परमेतावान् विशेषः -तत्र ' सिद्धयरे उभयसहावे वा हत्थुस्सेहो ' इत्यादि सर्वेषु पदेषु योज्यम् । अन्यदप्यस्येयं पातना-निशीथे पुरिसविसेसं जाणिउं वारसावत्तंपि वंदणं देइ । तस्य वंदणविसेसकारणा इमे परियागगाहा —

परियागपरिसपुरिसं खेत्तं कालं च आगमं नाउं ।
कारणजाए जाए जहारिह जस्स जं जोग्गं ॥ १ ॥
बंभचेर अभग्गं चिरोसिओ दीहपरियाओ ।
सेसुत्तरगुणेसु सीयइ परिसा परिवारो ॥ "

से संजमविणीओ मुलुत्तरगुणउज्जुओ पुरिसो रायाइ दिक्खिओ बहुसम्मओ वा पवयणुब्भावगो वा खेत्तं पासत्थाइभावियं तत्थ तयाणुगएहिं वसियव्वं । ओमकाले जो तत्थ वट्टावणं करेइ तस्स जहारिहो सक्कारो कायव्वो । आगमो से सुयं अत्थि अत्थं वा पन्नवेइ ॥ " चारित्रगुणान् ज्ञापयतीत्यर्थः, कारण कुलाइगा, जायसद्दो सम्पन्नवाची, वीओ जायसद्दो पकारवाची, तस्स पुरिसस्स जं वंदणं अरहं तं कायव्वं । चोयग आह-जोग्गगहणं णिरत्थयं, पुणरुत्तं वा । आयरिओ आह-न निरत्थगं, अन्नपि करणिज्जं अब्भुट्ठाण-विस्सामण-भत्तवत्थाइपयाणं तंपि सव्वं कायव्वं । एयं जोग्गगहणा गहियं, एयाइं अकुव्वंता

जहारिहं अरिहदेसिए मग्गे (न) हवइ पवयणभत्ती अभत्तिमंतादयो दोसा ॥"
एतस्या व्याख्यानं सुबोधमिति कृत्वा न लिखितं, विशेषस्तु लिख्यते-' अभत्तिमंतादयो दोसा ' अत्रादिशब्दस्य तत्रत्य आऽयहाओ णिज्जरसुयलाभस्स अणाभागी भवइ । ननु विरुद्धमेतत्-प्रथमगाथायां ' न कीर्त्तिर्न निर्जरा कर्म्मबन्धश्च भवति'-इत्युक्तं, अस्यां तु 'प्रवचनभक्तिर्भवति, अकुर्वतो अभक्तिः, निर्जराश्रुतलाभौ च न भवतः ' इत्युक्तं अतः कथं न विरोधः ? आचार्य आह—सत्यमुक्तं, परं सुकुमारमतित्वाद्विषयविभागं न वेत्सि त्वं अवहितो भूत्वा शृणु, कथ्यते अस्माभिः—निश्राव्यम् । यदि कारणं विना सुसाधुः पार्श्वस्थादीनां वन्दनादिकं करोति ततः कीर्त्यादिर्न भवति, यैः पुनः कारणैरुक्तस्वरूपैः सुविहितोऽपि वन्दनादि न करोति ततः प्रवचनभक्त्यादि कृतं न भवति, अत स्थितमेतत् कारणे सर्वमप्येतेषां कार्यम् । कल्पेऽप्येतत्सर्वं भणितं, नवरं परियागस्थाने ' परिवार ' इत्युक्तं, परिसस्थाने परिषदिति व्याख्यातम् । तथाहि तद् गाथार्द्धम्-"परिवारो से सुविहिओ परिसगओ साहइ व वेरग्गं" ति। आवश्यकचूर्ण्यामपि सर्वं प्रायः समं, नवरं किंचिद्विशेषोऽस्ति स लिख्यते—
" परियाओ दीहो बंभचेरस्स पुच्वंति प्रथमद्वारं, तथा परिसद्वारे अप्पवओ वा जइ नवं दीहामिनो लोगो सन्नीइं मुइहित्ति । अपि च ' प्रावचनी धर्मकथी ' इति श्लोकः, तथा पवयणभत्ती ण कया होइ एतस्याग्रे तत्र ' जे अभत्तिमंत हिंतो दोसा ते सो करेज्जा, रुट्ठो जहा अद्दालगवायगेण वंभाविया साहू जो य सो अभत्तिमंतो दोसे कादिइ तो तेण सव्वे चेव कया भवंति, एसा अम्ह विही, तस्स जं जोगं तस्स तं कायव्वं ति । " अतः स्थितमिह शुद्धयतिभिरपि कारणे वन्दनादिकं विधेयं पार्श्वस्थादीनाम् । ये पुनर्भवन्ति पार्श्वस्था उपलक्षणत्वादस्य अवसन्नादयश्चेत्यपि द्रष्टव्यम्, एतैर्मलिनाचाररूपैर्नो नव युज्यते घटते तेषामुत्सर्गवादिनामिदं वन्दनादिनिषेधं भणितुं वक्तुमिति गाथत्रयार्थः ।

तानेव पादोनगाथाचतुष्केणाह—

मुत्तत्थपोरिसिं नो करेइ गिण्हेइ परपरं वायं ।
पढइ धम्मकहाओ पडिलेहइ णेय थंडिले ॥ १८ ॥
विगई आहारेइ निच्चं कडिपट्टयं च बंधेइ ।
गामं कुल ममायइ परिहवइ तहय रायणिए ॥ १९ ॥

मणं मउयं ।'-इति वचनात् । शयनं स्वापो दिवसस्य वासरस्य मध्ये । तदवस्थितता कारणं विनेति सर्वत्र यथासंबंधं योजनीयम् । एषणाशुद्धिमागमोक्तस्वरूपां न करोति न विदधाति । अस्या एव साधनायाह—अनेकसाधुषु प्रचुरयतिषु, येन यस्मात् कारणात्, पञ्चदश इति संख्यार्थः, दोषा आधाकर्मादयः । अत्र चाध्यवपूरको मिश्रदोषमध्ये क्षिप्त इति पञ्चदश । परमार्थतस्तु षोडशापि भवन्ति जायन्ते । अयमभिप्रायः— येषु गृहेषु प्रभूता यतिसंघाटका भिक्षार्थं प्रविशन्ति तेषु तत्तद्द्रव्यापेक्षयैकस्मिन्नपि गृहे इत्यन्यगृहापेक्षया वा दीनापेक्षया च षोडशापि आधाकर्मादयो भवन्ति । उपलक्षणं चैते, उपधिप्रमाणातिरिक्ताविधिपरिभोगादयोऽन्येऽपि वाच्या इति पादोनगाथाचतुष्टयार्थः ।

यत एवमतः सपादगाथया जीवोपदेशमाह—

तम्हा ववहारणयं सरंतेण रे जीव ! ॥२१॥

तए णिच्चं कायव्वं तत्थ तेत्तियं ताण ।
जेण नियधम्मवुड्ढी जायइ ण हु पदुस्संति ॥२२॥

व्याख्या—तस्मात्कारणाद् व्यवहारनयं निश्चयनयेतरं सरता गच्छता स्मरता वा चित्ते धारयता रे 'जीव' इत्यामन्त्रणं त्वया भवता नित्यं सर्वकालं कर्तव्यं विधेयम् । तत्र पार्श्वस्थादिक्षेत्रे तावन्मात्रमुक्तस्वरूपं तेषां पार्श्वस्थादीनां, येन यस्मान्निजधर्मवृद्धिः स्वचारित्रोपचयो जायते प्रादुर्भवति । न च नैव ते पार्श्वस्थादयः प्रद्विषन्ति रुष्यन्तीति सपादगाथाऽर्थः ।

समाप्तः पार्श्वस्थवन्दनादिप्रतिपादको द्वितीयोऽधिकारः ।

साम्प्रतं तृतीयं गाथात्रयेणाह –

पक्खपडिक्कमणकए विवयंति केइ णेय जाणंति ।
णियधम्मधणं अम्हे हारेमो उभयहा जेण ॥२३॥
सत्थभाणिअंपि जत्तो आयरिअं पुव्वसूरिपवरेहिं ।
नो जुज्जइ काउं अणवत्था जेण तक्करणे ॥२४॥
जंपि हु पुव्वसूरीहिं णिच्छियं तंपि धम्मनिरयाणं ।
स हु णिच्छइउं जुज्जइ छउमत्थाणं विसेसेणं ॥२५॥

व्याख्या—पक्षप्रतिक्रमणकृते पाक्षिकातिचारशुद्धिनिमित्तं विवदन्ते निजनिजाभिप्रायोक्तिप्रत्युक्तिभिः स्पर्द्धन्ते । अयमभिप्रायः एके वदन्ति, पञ्चदश्यां पाक्षिकप्रतिक्रमणं विधीयते, अन्ये तु चतुर्दश्यां, उभयेषां मतस्यात्रोक्तत्वात् केऽपि न सर्वे, नैव नच जानन्ति बुध्यन्ते निजधर्मधनं स्वद्रूपवित्तं 'अम्हे 'ति वयं हारयामः औद्धत्यकरणतः स्फोटयामः, उभयथा पञ्चदशीपरिग्रहेण चतुर्दशीग्रहणेन च, येन यस्मात्कारणात् । शास्त्रभणितमपि आस्तामभणितमित्यपिशब्दार्थः, यत्प्रतिक्रमणादिकं नो नैव आचरितं सेवितं पूर्वसूरिभिश्चिरन्तनाचार्यैस्तत्प्रतिक्रमणादिकं नो निषेद्धुं युज्यते घटते कर्तुं, अनवस्था 'प्रतिष्ठापक एतदन्यश्चान्यदन्यथा–करिष्यति' इत्येवंरूपा, येन यस्मात् तत्करणे पूर्वाचार्यानासेवितविधाने भवतीति क्रियाऽध्याहारो दृश्य ॥ यदपि नहु नैव पूर्वसूरिभिर्बहुश्रुतचिरन्तनाचार्यैर्निश्चितं तदपि अनिर्णीतमपि न केवलं स्वयमनिश्चितं न निश्चीयते इत्यर्थः । धर्मनिरतानां प्रधानोपशमामृतरसलम्पटानां विशेषेण आदरेण । तथाहि-पञ्चदश्यां पाक्षिकं चतुर्दश्यां वा पाक्षिकमिति निर्द्धार्य नोक्तं, पाक्षिकं तु प्रोक्तं सामान्येन । तत्र दशाश्रुतस्कन्धे तावदित्थम्–" पक्खियपोसहिए सुसमाहिपत्ताणं झियायमाणाणं इमाइं दस चित्तसमाहिठाणाइं असमुप्पन्नपुव्वाइं समुप्पज्जेज्जा " । इदं सूत्रं, चूर्णिरस्य–पक्खियं पक्खियमेव, पक्खिए पोसहो पक्खियपोसहो चाउद्दसीसु अट्ठमीसु वा । 'समाहिपत्ताणं 'ति नाणदंसणचरित्तसमाहिपत्ताणंति नाणे वट्टमाणाणं । झियायमाणाणं इमाइं दस चित्तसमाहिठाणाणि असमुप्पन्नपुव्वाणि समुप्पज्जेज्जा ॥" अत्र पाक्षिकं भिन्नं, चतुर्दशी अष्टमी च भिन्ने इति केचिद्व्याचक्षते । पोषधशब्देन चतुर्दश्यष्टम्योः संबन्धकरणात् 'चाउद्दसी अट्ठमीसु वा पोसहो' इति । एवं व्याख्याने पञ्चदश्यां पाक्षिकम्, अत्र तु पाक्षिकशब्देन संबन्धकरणात् । नच चतुर्दश्यष्टम्योः 'चाउद्दसी अट्ठमीसु वा पक्खियपोसहो ' इति पाक्षिकं चतुर्दशीं (श्यां) कथयति, परमत्र मते चतुर्दशीग्रहणं निरर्थकं भवति, पाक्षिकशब्देनैव चतुर्दश्या ग्रहणात् 'अट्ठमीए वा ' इत्येतदेव भणितव्यं स्यात्, पूर्वव्याख्याने तु पोषधप्रस्तावाच्चतुर्दशी अष्टमी पौषधमिति प्रतिपादितमित्यनिन्द्यम् । व्यवहारे चेदं कारणेनाचार्यः पृथगेकाकी एकरात्रादिकं वसतीत्येतस्मिन् प्रस्तावे—

" विज्जाणं परिवाडी पव्वे पव्वे य दिंति आयरिआ ।
मासद्धमासियाणं पव्वं पुण होइ मज्झं तु ॥

पक्खपव्वस्स विभासा मज्झगाहा—

“ पक्खस्स अट्ठमी खलु मासस्स पक्खियं मुणेयव्वं ।
अन्नंपि होइअव्वं उवरागो चंदसूराणं ॥

पक्खपव्वस्स मज्झं अट्ठमी बहुलाइआ मासत्ति काउं मासस्स मज्झं पक्खियं किण्हचउद्दसीए विज्जासाहणोवयारो ॥ आह—यद्येवं एगरायगहणं कायव्वं, दुरायं तिरायं वेति न वत्तव्वं । अत उच्यते चाउद्द (सी) गाहा—

चाउद्दसिग्गहो होइ कोइ अहवावि सोलसिग्गहणं ।
वत्त तु अणज्झंते होइ दुरायं तिरायं वा ॥ ”

इय गाथा व्याख्यानाऽर्हा, परं न व्याख्याता कण्ठ्येत्युक्तम् । सर्वस्याप्येतस्य किंचिद् व्याख्यातस्यापि पूज्यकथितोऽर्थः कथ्यते—विद्यानां देवताद्यधिष्ठितमन्त्राणां, परिपाटिं परावर्तनं, पर्वणि पर्वणि वक्ष्यमाणलक्षणे, चकारोऽवधारणे स च व्यवहितो योज्यः, ददन्त्येव अनेकार्थत्वाद्धातूनां कुर्वन्ति, आचार्याः सूरयः । पर्वस्वरूपमाह- मासार्द्धमासिकयोः पर्व पुनर्भवति मध्यं वक्ष्यमाणं, तु पुरणे । तदेवाह पक्षस्य प्रतीतस्य अष्टम्येव तिथिलक्षणा, खलु अवधारणे, स च योजित एव, मासस्य पुनः प्रतीतस्य पाक्षिकमनिश्चितरूपं, यदि पुनरत्र चतुर्दशी पञ्चदशी वाऽभणिष्यत्ततो निश्चितं स्यात् । यत्तूक्तं चूर्णिकृता पाक्षिकव्याख्यान कुर्वता—“ मासस्य मज्झं पक्खियं किण्हपक्खस्स चउद्दसीए विज्जासाहणोवयारो ” तत्सम्यग्नावगम्यते । तथाहि—यदि कृष्णचतुर्दशी पाक्षिकमित्युच्यते ततो ‘ विज्जासाहणोवयारो ’ अत्र उपचारशब्दो नावबुध्यते, नहि उपचारशब्देन परिपाटिर्भण्यते स्वसमये परसमये । किञ्च—एवं व्याख्याने शुक्लचतुर्दशी पाक्षिकशब्दवाच्या न स्यात्; भण्यते चैतन्मते शुक्लचतुर्दश्यपि पाक्षिकम् । पूज्यास्तु वदन्ति—उपचारशब्देन पूर्वसेवाऽत्र भण्यते, ततः कृष्णचतुर्दश्यां पूर्वसेवा नूतनमन्त्र ग्रहणजपलक्षणा क्रियते, पाक्षिके च पञ्चदशीलक्षणे परिपाटिः परावर्त्तनं विधीयते, इत्थं व्याख्याने पौर्णमास्यपि पाक्षिकं भवति, परिपाटी च घटते । शुक्लचतुर्दश्यां तु पूर्वसेवा न क्रियते इति सर्वजनप्रतीतं कृष्णचतुर्दश्यां च स्फुटो मन्त्रो भवति, अतस्तत्र पूर्व्वसेवा । द्विरात्रत्रिरात्र साधकगाथाया अपि पूज्यव्याख्येयं—चतुर्दश्यां कृष्णायां ग्रहोऽभिनवविद्याग्रहणा-

दिवसो भवति जायते कोऽप्यनिर्दिष्टनामा। अथवाऽपीति विकल्पार्थः, षोडश्यां प्रतीतायां ग्रहणं सूर्योपरागलक्षणं भवतीति सम्बध्यते, व्यक्तं स्पष्टं पञ्चदश्यां षोडश्यां वा ग्रहणं जातमित्यज्ञायमानेऽनवबुद्ध्यमाने द्विरात्रं त्रिरात्रं भवति वसितव्यम्। आचार्यस्य अयमभिप्रायः--यदि कृष्णचतुर्दश्यां मत्रग्रहणं न कृतं भवति ततः पञ्चदशीषोडशीरूपदिनद्वयं, कृते तु ग्रहणे कृष्णदतुर्दशीसहितं तदेव त्रयमज्ञातं भवति। ज्ञाते तु यदि कृष्णचतुर्दश्यां ग्रहणं पूर्वसेवालक्षणं कृतं ततो दिनद्वयं। कृते त्वेकमेवेत्यादि ग्रहणे-चन्द्रग्रहणे तु ज्ञाते एकं दिनं ज्ञाते तु दिनद्वयम्। नहि शुक्लचतुर्दश्यां पूर्वसेवा भवति, ये तु चतुर्दश्यां पाक्षिकं वदन्ति ते चन्द्रग्रहणे दिनद्वयं पौर्णिमाप्रतिपल्लक्षणमज्ञाते, ज्ञातेत्वेकमेव शुक्लपक्षे परिवर्तनं नेत्युभयोरपि मतत्वात्, आदिग्रहणे च ज्ञाते दिनद्वयं अज्ञाते तु दिनत्रयं भवति। किञ्च यन्मते चतुर्दशी पाक्षिकं तन्मते चतुर्दशीग्रहणं " चाउद्दसिग्गहो होइ कोइ " इत्यत्र तन्निरर्थकं स्यात्, चतुर्दश्या अवस्थितत्वात् किं तद्ग्रहणेन। अन्यच्च पूज्या अत्रार्थे वदन्ति--यदा सांवत्सरिकं पञ्चम्यामासीत् तदा पाक्षिकाणि पञ्चदश्यां सर्वाण्यभूवन्। यतः -"इय सत्तरी जहन्ना"। इत्येतत् पदमित्थं घटते। तथाहि - भाद्रपददिनानि दश, अश्वयुक्कार्तिकमासदिनषष्टिश्च, मीलिते च सप्ततिर्भवति। अभिवड्ढियंमि वीसा इयरंमि सवीसई मासो।" यतः श्रावणः परिपूर्णः भाद्रपददिनानि च विंशतिर्मीलिते च पञ्चाशत्, एवमनभिवर्द्धिते तु विंशतिरेव श्रावणदिनरहिता। साम्प्रतं चतुर्थ्यां पर्युषणा ततश्चतुर्दश्यां पाक्षिकाणि घटन्ते, यतो भाद्रपददिनान्येकादश, अश्वयुक्दिनानि त्रिंशत्, कार्तिकदिनान्येकोनत्रिंशत्, सर्वमीलने सप्ततिः। सविंशतिमासश्च एकं आषाढदिनं श्रावणदिनानि त्रिंशत्, भाद्रपदस्य चैकोनविंशतिश्च तथैव, परमेकं दिनं आषाढमासान्त्यं क्षेपणीयमिति। यच्चोच्यते एवं सति षष्ठं स्यात् पाक्षिके, भवतु, मासेन हि पाक्षिकं षष्ठेन क्रियत इत्यस्माभिरुच्यते, किन्तु चतुर्थेन, चतुर्दश्युपवासश्च पर्वतिथितपोविधानं, मा ततत्र लगत्वेतदप्यनिश्चयः। तथा दिवसो पोसहो पक्खो वइक्कंतो " इत्यादिकस्य पाक्षिकक्षामणकस्य चूर्णौ साक्षरं व्याख्यानमिदं-पौषधोऽष्टमीचतुर्दश्युपवासकरणं, 'पोषधं तु मतीतं'-इति न व्याख्यातं, अस्मादपि व्याख्यानात् चतुर्दशीव्यतिरिक्तः पक्षः प्रतीयते तथा च तत्रोक्तं " पोसहोत्ति अट्ठमीचउद्दसीसु उववासकरणं सेसं कंठमिति। यदि त्वत्रापि किञ्चिद्व्याख्यानान्तरं

क्रियते ततः सन्देहोऽपि स्यात्, परं तन्न मध्यस्थामृतरसतृप्तानां मनांसि प्रीणयति एवमन्यशास्त्रान्तरोक्तमपि मध्यस्थैर्भूत्वा विचारणीयं, तत्त्वं तु सर्वज्ञा विशिष्ट-श्रुतविदो वा विदन्ति। श्रावकापेक्षया तु पञ्चदश्यपि विशेषेणोक्ता। तथा चाव-श्यककचूर्णौ—

" सव्वेसु कालपव्वेसु विसिट्ठो जिणमए तवो जोगो।

अट्ठमीं पन्नरसीसु णियमेण हवेज्ज पोसहिओ॥" सामान्यतस्तुतेषामपि भगवत्यादाविदमुक्तं-" चाउद्दसमट्ठमुद्दिट्ठपुन्नमासीसु णं पडिपुन्नपोसहं समणु पालेमाणेत्ति "-इति सप्तपञ्चभावनायुक्त गाथार्थः॥

यद्येवं ततः किम्? इत्याह—

तम्हा रे जीव! तुमं मन्नसु धम्मत्थमप्पणो एवं।
तं कुण जं आयरियं जं सत्थे तस्स सद्दहणं॥२६॥

व्याख्या--तस्मात्कारणात् रे जीवेत्यात्मन् त्वं भवान् मन्यस्व जा-नीहि धर्मार्थं क्षान्त्यादिनिमित्तमात्मनो जीवस्य एवं वक्ष्यमाणन्यायेन, तत् कुरु विधेहि, यत् पाक्षिकादिकमाचरितमासेवितं पूर्वाचार्यैरिति गम्यते यत् शास्त्रे सिद्धान्ते तस्य शास्त्रोक्तार्थस्य श्रद्धानमेतदिति। अयमभिप्रायः-शास्त्रो क्तं निश्चितमपि यन्नासेवितं पूर्वपुरुषैः केनचित्कारणेन तदन्यथा न क्रियते तदाचरणाभङ्गात्, तत्कृतं तु क्रियते, यथा बहुगुणं भवति तथा त एवजानते इति गाथार्थः॥

समर्थितः तृतीयः पाक्षिकविचारणलक्षणोधिकारः।

इदानीं चतुर्थमाह—

अन्ने सिद्धंतमहोयहिस्स गंभीरिमं अयाणंता।
वंदणतियं दाविंति नेय बुज्झंति भणियावि॥२७॥

व्याख्या—अन्ये अपरे सिद्धान्तमहोदधेरागमरत्नाकरस्य गाम्भीर्यमल्प-शेमुष्यज्ञातमध्यत्वमजानाना अनवगच्छन्तो वन्दनकत्रिकं कृतिकर्मत्रयं दापयन्ति। नैव नच बुध्यन्तेऽवगच्छन्ति भणिता अपि न केवलमभणिता इत्यपिशब्दार्थः। आगमज्ञैरितिशेष इति गाथार्थः।

ननु किमत्रदूषणं ? यदि प्रत्याख्यानालोचनापराधक्षामणार्थं वन्दनकत्रयं दीयते, आचार्यः प्राह—शास्त्रोक्तव्याहतेः। कथम् ? अत आह गाथे—

जम्हा पच्चरकाणे कयंमि अहिगे य जायसड्ढस्स ।
वंदणयं दाऊणं नं कीरइ ण उण सव्वत्थ ॥२८॥
आलोयणेवि गामा- गयस्स साहुस्स वंदणं भणियं ।
पच्चक्खाणालोयणधणिंमि मुज्झंति मंदमई ॥२९॥

व्याख्या—यस्माद्यतः प्रत्याख्याने एकाशनादिके कृते विहिते सति अधिके पुनरत्यर्गले, चः पुनरर्थः स च दर्शितः जातश्रद्धस्योत्पन्नवाञ्छस्योपवासो मया कर्तव्य इति उपलक्षणत्वादस्याहारपरिणामाभावेऽभक्तं ग्रहीतुकामस्य तृतीयपौरुष्यां वा भुक्तोत्तरप्रत्याख्यानं कुर्वाणस्येत्यपि द्रष्टव्यम्। वन्दनकं द्वादशावर्तलक्षणं दत्त्वा वितीर्य तत्प्रत्याख्यानं क्रियते विधीयते, न पुनर्नैव सर्वत्र प्रत्याख्याने आलोचनेऽपि न केवलं प्रत्याख्याने पूर्वोक्तयुक्त्या विशेष इत्यपिशब्दार्थः ग्रामागतस्य विहारान्निवृत्तस्योपलक्षणत्वादपराधालोचनोपसदालोचने अपि दृश्ये। साधोर्यतेर्वन्दनं द्वादशावर्त्तं भणितं प्रतिपादितम्। अयमभिप्रायः पूर्वं प्रत्याख्यानं विहितं, पश्चादधिकतपोवाञ्छा जाता, अपरिणतिर्वा भुक्तोत्तरे वा, ततो वन्दनं दत्त्वा प्रत्याख्याति, न पुनः प्रथमतः प्रत्याख्याने विहाराद्यागत आलोचनां दास्यति, स्थानस्थितो वाऽपराधालोचनां दत्त्वा प्रायश्चित्तं लास्यति, उपसम्पदर्थं वाऽऽलोचयिष्यति, ततो वन्दनं दत्वा आलोचयति नेत्थं सामान्यालोचने। नन्वपराधालोचनाऽत्र भविष्यति, ततः को दोष ? सत्यं, संख्याविरोधः स्यात्। अस्यां हि वन्दनकद्वयं दीयते, ततश्चत्वारि स्युः, न त्रीणि। तथा चोक्तं चूर्ण्याम्—"विगई आयंबिले काउस्सग्गो परियट्टिए समाणे। उवसंपज्जणअवराहविहारउत्तमट्ठालोयणा एया। एएसु सत्तसु दो दो वंदणगा।" किञ्च—यद्याचार्यपुरतोऽपराधान्निवेद्य प्रायश्चित्तं लाति, ततो भवति वन्दनं श्रावकस्य वृद्धाचरणतो नतु सूत्रतः, नहि श्रावकस्य सूत्रे आलोचनाविधानमस्ति, वृद्धसामाचारी चास्माकं सम्मतैवेति। तथाचोक्तं—"वन्दनकस्थानप्रतिपादिका—

पडिकमणे सज्झाए काउस्सग्गावराहपाहुणए ।
आलोयणसंवरणे उत्तिमट्ठे य वंदणयं ॥"

एवंरूपामावश्यकगाथां व्याख्यानयता तच्चूर्णिकारेण–" आलोयणत्ति जाहे विहारालोयणा वा अवराहालोयणा उवसंपज्जणालोयणा वा संवरणं वेआलियं अंतरावा वा भत्तट्ठं गहिए इच्छा जाया 'अज्ज अभत्तट्ठं करेमि'त्ति अहवा 'ण जीरइ'त्ति एयं संवरणं नावस्थितमत्र त्रीणि वन्दनकानि न भवन्ति। एकवन्दनपूर्व्वकं तु यथा पूर्व्वाचार्यैः कारितं प्रत्याख्यानालोचनं तथा कार्यते, नत्वपराधार्थं वा। तथा चोक्तं चूर्ण्यां—"अवराहो गुरूणं कओ तंपि वंदित्ता खामेइ विणओवयारे।"—इत्यादि गाथोक्तार्थं चेति। किञ्च-ये प्रतिक्रमणं कुर्व्वन्ति तेषामेकमपि वन्दनं न भवति। तथा चोक्तं व्यवहारे–" कारणेन पृथग्वसतिस्थिता अपि साधवः प्राभातिकं प्रतिक्रमणमाचार्यसमीपे समागत्य कुर्व्वन्तीति स्थितिः, यदि तु सापायमागच्छतां ततो यद्यत्र कृतं तस्सर्व्वमागत्य कुर्व्वन्तीति।" एतस्मिन् प्रस्तावे "अहवा समत्तं आवस्सयं काउं जेट्ठो आयग्यिसगासे आलोइत्ता पच्चक्खाणं गेण्हइ।" इदमत्रहृदयं--वन्दनकं विनाऽपि आलोचनप्रत्याख्याने कृते। ननु यद्येवं यो न प्रतिक्रामति तस्य त्रीणि तानि भवन्तु, तस्यापि नाम प्रतिक्रमणविधिः, कथमन्यथाप्रतिक्रमणद्वारात् आलोचनसंवरणद्वारे पृथगुपात्ते? अतो यद्यत्र भणितं तत्तत्रैव कर्त्तव्यम्, अन्यथा सूत्रार्थपौरुषीव्यतिक्रमकरणे कथमवसन्नतादोषः? प्रायश्चित्तं च साधोर्भणितमिति। ननु यथा किञ्चित्कर्त्तव्यमाचरणोक्तं भवति, तथा वन्दनकत्रयमपि भवतु नाम यदि तल्लक्षणमुपपद्यते, परम्परागतबहुनुमतान्यानिवारितादिकं, येऽपि साम्प्रतं दापयन्ति तेषामपि पूर्व्वाचार्यैर्न दापितं, पूज्यैर्दृष्टत्वात्, येन तु दापितं स तदैव निषिद्धोऽन्यैर्नापि तत्करणं सम्मतमिति स्थिते प्रत्याख्यानालोचनाख्ये शब्दे मुह्यन्ति सन्दिह्यन्ते मन्दमतयस्तुच्छधिषणा इति सुष्ठूक्तं–" अन्यच्च यानि वन्दनानि चतुर्दशयतीनामवस्थितानि भणितानि। तथा चोक्तमावश्यके—

" चत्तारि पडिक्कमणे किइकम्मे तिन्नि होंति सज्झाए।
पुव्वण्हे अवरण्हे किइकम्मा चोद्दस हवन्ति ॥"

तेषां वार्तामपि स्वयं न कुर्व्वन्ति, अभणितेषु च श्रावकाणां वन्दनकेष्वेवं बद्धाग्रहता अहो मतिरिति गाथार्थः॥

अत्राप्यर्थे जीवोपदेशमाह—

तत्थवि तुमं मज्झसु हे जीव! तह माणधरसु।
जो पुव्वसूरिमग्गो, सो सग्गपसाहगो अम्ह ॥३०॥

प्रकटार्था । नवरं 'स्वर्ग' इति उपलक्षणत्वान्मोक्षसाधकश्चेत्यपि द्रष्टव्यम् । ननु मोक्षस्य प्रधानत्वात्कथं तस्योपादानं सूत्रे न कृतम्? सत्यं, साम्प्रतकालापेक्षया अनन्तरं स्वर्गस्यैव भावादिति गाथार्थः ॥

समाप्तो वन्दनकत्रयविचारलक्षणश्चतुर्थोऽधिकारः ॥

साम्प्रतं पञ्चमः—

अइगरुयमोहविहुणियसुहबोहा केइ धम्ममगणिंता ।
कारिंति णंदिमाई सड्ढीणं संजईहिंतो ॥ २४ ॥

व्याख्या—अतिगुरुकमोहविधूनितशुभबोधा बृहत्तरमूढताकम्पितप्रधानमतयः केचनैके धर्म्मं क्षान्त्यादिकमगणयन्तस्तिरस्कुर्वाणाः कारयन्ति नन्द्यादिकम्, मकारोऽत्र प्राकृतप्रभवः । आदिशब्दान्निषिद्धानुष्ठानादिग्रहः । तत्र नन्दिरुपधानादिषु समयप्रनीतो विधिः, श्राद्धीनां श्राविकाणां 'संजईहिंतो' त्ति संयतीभ्यो व्रतिनीभ्यः सकाशात् 'हिंतो' त्ति पञ्चम्याः स्थाने निर्देशः, "उर्हिंतोलोपान्नस्यातः पञ्चम्याः (?) ।" इति प्राकृतलक्षणेन, स च दर्शित एव । अयमभिप्रायः-स्वयं विहारं व्रजन्तोऽन्येषु आचार्येषु बहुश्रुतादिषु विद्यमानेषु निजार्यिकाभिः श्राविकाणां नन्द्यादि कारयन्ति, यदि पुनरेकोप्याचार्यस्तत्र न भवति ततः सामाचार्या अविरुद्धमपि भवेदिति गाथार्थः ॥

एतस्यापि आगमसंवादपूर्वकं प्रतिषेधपूर्वं जीवोपदेशमाह—

आरेण अज्जरक्खिय इच्चाइवयणओ न तं जुत्तं ।
रागद्दोसविमुक्को रे जीव तहिंपि मा मुज्झ ॥ २५ ॥

व्याख्या—आरेणेत्यर्वाक् आर्यरक्षितेत्यादिवचनतः, आदिग्रहणात् "कालाणुभावओ नत्थि अज्जाणं सामइयं तह वयारोवणं च पच्छित्तदाणं चेति" इत्यं सुबोधश्च । अयमभिप्रायः— निगोदजीवविचारार्थायातदेवेन्द्रवन्दितार्यरक्षिताचार्यात् पूर्वमासीत् कालादिषु आर्यिकाणामनुज्ञा, अर्वाक् पुनर्नास्ति, सामायिकादिकं च नन्दिपूर्वकं क्रियते, ततः तत्प्रतिषेधात् एतदपि प्रतिषिद्धं बोद्धव्यम् । अतो नेति निषेधे, युक्तं संमतं, रागद्वेषविमुक्तोऽभिष्वङ्गमत्सररहितो जीवेत्यामन्त्रणे, नन्द्यादिकरणेपि न केवलं पूर्वोक्तेषु इत्यपिशब्दार्थः । मेति निषेधे मुह्यस्व मोहं विधेहि इति गाथार्थः ॥ २५ ॥

समाप्तोऽयमार्यिकानन्दिवक्तव्यतार्थः पञ्चमः ॥

अधुना षष्ठः—

आगमरहस्सबज्झा केइ असणाइं णिवारेंति ।
तं नो कप्पइ सुविहियजईण जेण सुए भणियं ॥ २६ ॥

व्याख्या—आगमरहस्यबाह्याः सिद्धान्तपरमार्थानभिज्ञाः केचनापरे-अशनादिकं भोजनादिकं, आदिशब्दात्पानीयादिग्रहः, निवारयन्ति निषेधयन्ति । तन्निवारणं नैव कल्पते युज्यते सुविहितयतीनां प्रधानव्रतिनां, येन यस्मात् श्रुते द्वितीयाङ्गे भणितमुक्तमिति गाथार्थः ॥ २६ ॥

एतदेवाह—

जे उ दाणं पसंसंति वहमिच्छंति पाणिणं ।
जे उ णं पडिसेहन्ति वित्तिच्छेयं कुणंति ते ॥ २७ ॥

निगदसिद्धम् । नवरं वृत्तिच्छेदमन्तरायं कुर्वन्ति । इदमिह तत्त्वं–परमते कृपनरसत्रादिदानेऽपि राजादिभिः पृष्टे निषेधादि निषिद्धं, किं पुनः स्वमते इति तात्पर्यार्थः ।

तर्हि किं तेषां युज्यते ? इत्याह—

कप्पइ पुण भणिउं जे अम्हाणं णेय कप्पई एवं ।
सुविहियजईण परलोयमग्गमुग्गं पवन्नाणं ॥ २८ ॥

व्याख्या—कल्पते युक्तं भवति पुनर्भणितुं वक्तुं, 'जे' इति निपातः पूरणार्थः, 'अम्हाणं' ते अस्माकं नैव नच कल्पते, एवं आधाकर्मादिकं सुविहितयतीनां प्रधानमुनीनां परलोकमार्गं स्वर्गादिविधिमुग्रं प्रधानं प्रपन्नानामाश्रितानामिति गाथार्थः ॥ २८ ॥

ननु पिण्डविशुद्धिकथनमज्ञातं तेषां, ततः स्वयमेव ज्ञाते ज्ञास्यन्ति, किमस्माकं तत्र दोषः ? इत्याह—

जंपि य पिंडविसोहीकहणं सड्ढाण देसियं समए ।
तंपि य गीयत्थाणं केसिंची ण उण सव्वेसिं ॥ २९ ॥

व्याख्या–यदपि पिण्डविशुद्धिकथनं–आधाकर्मादिदोषोज्झितभक्तभणनं श्राद्धानां श्रावकाणां देशितं कथितं समये सिद्धान्ते, तदपि च गीतार्थानां यतिसामाचारीकुशलानां केषाञ्चित्, तकारस्य च लोपः प्राकृतलक्षणेन, दीर्घत्वं चेकारस्य पूर्ववत्, नपुनर्नैव सर्वेषां सामान्येनेति गाथार्थः ।। ३० ।।

यदि यतेरित्थं तर्हि श्रावकेण किं कर्त्तव्यं ? इत्याह—

विहवाणुसारओ पुण सड्ढेणं संजयाण दायव्वं ।
गुणविरहिआणमुचियं सगुणाण पुणो सुभत्तीए ।। ३१ ।।

व्याख्या विभवानुसारतो निज द्रव्यौचित्येन पुनः श्राद्धेन श्रावकेण संयतेभ्यः साधुभ्यः " छट्ठीविभत्तीए भण्णइ चउत्थी " इति लक्षणाचतुर्थी, अत्र दातव्यं देयम् । किमविशेषेण ? इत्याह–गुणविरहितानां ज्ञानादिगुणशून्यानामुचितं तद्योग्यं, सगुणानां पुनर्विशिष्टज्ञानादिवतां भक्त्या आन्तरप्रीत्या इति गाथार्थः ।।

' सगुणानां भक्त्या ' इत्युक्तम्, अतः के ते गुणाः ? अत आह—

ते य गुणा दंसणाई, विजुया वा संजुया वा सव्वेसिं ।
पुज्जा कप्पाइसुं गंथेसु जेणिमं भणियं ।।३२।।

ते पुनर्ये पूर्वमूचिताः, चः पुनरर्थः, गुणा दर्शनादयस्सम्यक्त्वादयः आदिशब्देन ज्ञानादिग्रहः । ननु यद्यमी गुणाः ततः किं असमुदिताः समुदिता वा पूज्याः ? अत आह–वियुताः पृथक् स्थिताः, संयुता एकत्र स्थिताः, वाशब्दः समुच्चायार्थः, सर्वेषां समस्तानां पूज्याः पूजनीयाः कल्पादिषु, आदिशब्दान्निशीथादिग्रहः, ग्रन्थेषु शास्त्रेषु यस्मादिदं वक्ष्यमाणं भणितमिति गाथार्थः ।।

तदेवाह—

दंसणनाणचरित्तं तवविणयं जत्थ जत्तियं जाण
जिणपन्नत्तं भत्तीए पूयए तत्थ तं भावं ।। ३३ ।।

व्याख्या—दर्शनज्ञानचारित्रतपोविनयं यत्र साध्वादौ यावन्मात्रं जानीयादवबुध्येत, किमविशेषेण ? नेत्याह–जिनप्रज्ञप्तं सर्वज्ञोक्तं भक्त्या सर्वादरेण पूजयेदर्चयेत् तत्र यत्यादौ तं सम्यक्त्वादिकं भावम् । गुणवत्सु तत्र दर्शनं सम्यक्त्वं,

ज्ञानं मत्यादि, चारित्रं शीलतपोऽनशनादि, विनय आचार्याद्यौचित्यकरणमिति। न चात्रेदमाशङ्कनीयम्-एकविभक्तिनिर्देशात् समुदिता एवामी पूज्या न वियुताः, ततः पूर्वोक्तव्याहतिः, यतस्तत्रैव निषेधे एकत्रेदमुक्तं-"नाणमंतेसु भत्तीवहुमाणो कायव्वो।" " तथा नाणाइमंतेसु भत्ती " इत्यादि। दर्शनज्ञाने तु यद्यपि युक्ते सर्वदैव भवतः, तथापि विशिष्टज्ञानरहितं केवलं दर्शनं भण्यते इत्यादि स्वधियाऽभ्युह्यं गीतार्थैरिति गाथार्थः ॥

अत्रार्थे जीवोपदेशमाह-

रे जीव ! तुमं तम्हा सिहरट्ठियधयवडोव्व मा चलसु।
काउणं थिरचित्तं गुणाणुराइत्तणं धरसु ॥ ३४ ॥

व्याख्या-रे जीव ! त्वं तस्मात्कारणाच्छिखरस्थितध्वजपटवत् चैत्यशृङ्गदण्डचेलाञ्चल इव मेति निषेधे चल कम्पस्व, कृत्वा विधाय स्थिरचित्तं-अविचलमानसं,गुणानुरागित्वं गुणवत्प्रीतिलक्षणं धारय स्वीकुरु इति गाथार्थः॥

समाप्तोयं दाननिषेधविचारवर्णनः षष्ठोधिकारः॥

इदानीं सप्तमः प्रारभ्यते—

कुग्गाहुच्छाइयसुहविवेयपसरा रसंति एवन्न।
नो माहमाल जुत्ता सिद्धंते जेण पडिसिद्धा ॥ ३५ ॥

व्याख्या—कुग्राहेण दुराग्रहाभिप्रायेणोच्छादितोऽपनीतः शुभः प्रशस्तः विवेकप्रसरः कृत्याकृत्यानुष्ठानविभागो येषां ते रसन्ति जल्पन्ति एवं वक्ष्यमाणप्रकारेणान्येऽपरे। तदेवाह-नो नैव माघमाला प्रतीता युक्ता सङ्गता; किम्? इत्याह-सिद्धान्ते आगमे यस्मात् प्रतिषिद्धा निवारितेति गाथार्थः॥

तमेव निषेधं दर्शयितुं पराभिप्रायेण किञ्चिदूनं गाथार्द्धमाह-

लोइयतित्थेसु ण्हाणदाणाइवाइवयणओ

व्याख्या—लौकिकतीर्थेषु पराभिमतपुण्यक्षेत्रेषु अनुस्वारोऽत्र पूर्ववत्-, स्नानदानमित्यादिवचनतः, आदिशब्दात्संक्रान्तिग्रहणादिग्रहः, तत्र स्नानं तत्तीर्थेषु जलादिना, दानं तु तत्सम्मतक्षेत्रे द्रव्यादिवितरणेन कार्यमिति प्रक्रमाद् दृश्यं

श्रावकेण। अयमभिप्रायः-यत्किमपि लौकिकैर्धर्मार्थं विधीयते पूर्वोक्तं तच्छ्रावकस्य कर्त्तुं न युज्यते, माघमालामपि ते आदिशब्दाद् गृह्णन्तीति भावः ॥

अत्रोत्तरार्थं सार्द्धां किञ्चिदधिकां गाथां पराभिमतयुक्तिसहितामाह-

तं नो। जं जं लोए कीरइ तं तं जइ सव्वमकज्जं ॥ ३६ ॥
तो जत्ता रहभमणं उववासो देवभवणपूयाई।
मा कुणह सया तुम्हे लोए किज्जन्ति जुत्तीतो ॥

व्याख्या—तत्परोक्तं नेति निषेधे, यद्यल्लोके परदर्शने क्रियते तत्तद्यदि सर्व्वं समस्तमकार्यं ततस्तस्माद्यात्रा-विशिष्टमहिमा, रथभ्रमणं-जैनस्यन्दनपर्यटनं, उपवासो-भोजनत्यागरूपः, देवभवनपूजादि-तत्र देवभवनं जिनसदनं, पूजा सपर्या; आदिशब्दात्प्रतिप्रेक्षणकादिग्रहः, मेति निषेधे, कुरुत विधत्त, कर्म्मपदं तु सर्वत्र स्वयं सम्बन्धनीयम्, सदा सर्वदा तुम्हेत्ति यूयं कस्माल्लोके परमते क्रियते विधीयते, युक्तेः कारणादिति गाथार्थः ॥

पराश्वासनपूर्व्वं स्वपक्षस्य पुष्टिमाह—

एयंपि जुज्जइ च्चिय जइ सक्खा वारियं भवेज्ज इमं।
समईए वारिंताण अंतरायं जओ भणियं ॥ ३७ ॥

व्याख्या—एतदपि भवदुक्तमपि न केवलं मदुक्तम् युज्यते एव घटते एव, यदि साक्षात् प्रकटं वारितं निषिद्धं भवेदिदं मालारोपणं 'माघमाला न क्रियते' इति स्वमत्या निजाभिप्रायेण वारयतां प्रतिषेधं कुर्व्वतामन्तरायोऽष्टमप्रकृतिविशेषलक्षणं भवतीति गम्यते यस्माद् भणितं गदितं शतककर्म्मग्रन्थ इति शेष इति गाथार्थः ॥

तदेवाह—

पाणिवहाईनिरओ जिणपूयामोक्खमग्गविग्घयरो।
अज्जेइ अंतरायं ण लहइ जेणिच्छियं लाभं ॥ ३८ ॥

व्याख्या—प्राणिवधादिनिरतो जीवव्यापादनसक्तः, आदिग्रहणान् मृषावादादिग्रहः। जिनपूजा-सर्वज्ञार्चनं, मोक्षमार्गो यथावस्थितशुद्धप्ररूपणादिलक्षणस्तयोर्विघ्नकरो भञ्जकः। अर्जयति-स्वीकरोति अन्तराय कर्म्मविशेषम्।

तस्य फलमाह–नो निषेधे, लभते प्राप्नोति येन कर्म्मणोपार्जितेनेच्छितमभिलषितं लाभं धनधान्यादिकम्। अयमभिप्रायः–इयं मायमाला जिनपूजा न भवति भवति वा ? यदि न भवति, ततो निर्दोषा वारयन्तोपि यूयम्। भवति चेत्, ततो निश्चितं मद्वर्णितफलं भवतां हठादागच्छतीति गाथार्थः ॥

अत्रापि जीवोपदेशमाह—

मा मा तुमं णिवारसु पूयं रे जीव ! जिणवरिंदाणं।
जइ सयलसोक्खवल्लीणमप्पणो महसि उल्लासं ॥ ३९ ॥

व्याख्या—मा मेति अत्यादरकरणार्थं वीप्सानिर्देशो निषेधार्थः, त्वं भवान् निवारय निषेधय पूजां सपर्या, रे जीवेत्यामन्त्रणे, जिनवरेन्द्राणां सर्व्व-प्रतिकृतीनाम्। यदीति स्वाभिप्रायसूचकार्थः, सकलसौख्यवल्लीनां समस्तसात-लतानामात्मनो जीवस्य महसि वाञ्छस्योल्लासं वृद्धिमिति गाथार्थः ॥

तथा कोऽयं तवाभिनिवेशः ? यदुत लौकिकं न क्रियते। अविरुद्धं तदपि विधीयते इति दर्शयन् विशेषावश्योक्तां गाथामाह—

जं अत्थओ अभिन्नं अन्नत्था सद्दओ वि तह चेव।
तं पि पओसो मोहो विसेसओ जिणमयट्ठियाणं ॥ ४० ॥

व्याख्या—यत्किमप्यनवधारितरूपमर्थतोऽभिधेयेन अभिन्नमव्यतिरिक्तं अन्वर्थाद्युक्ताभिधेयात् शब्दतो वचनतोऽपि तथा चैवाभिन्नमेव तस्मिन् शब्दार्था-भिन्ने जिनवचनमाश्रित्य प्रद्वेषो मत्सरो मोहो मूढतेयं विशेषत आदरेण जिन-मतस्थितानाम्। यथा—

पञ्चैतानि पवित्राणि सर्व्वेषां धर्म्मचारिणाम्।
अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्ज्जनम् ॥—

इत्यादि। इति गाथार्थः ॥

सूत्रेणैव ससम्बन्धां गाथामाह—

किंचाणुमयं हरिभद्दसूरिणो किंवि लोइयं जेण।
भणियं बिंबट्ठवणे विहिमाग अलोगनाईए ॥ ४१ ॥

व्याख्या—किंच समुच्चये, अनुमतं सम्मतं हरिभद्रसूरेरावश्यकादिवृत्तिकर्त्तुः, किमपि न सर्व्वं, तीर्थस्नानादिकं लौकिकं लोकाचीर्णं, यस्माद् भणितं प्रतिपादितं विम्बस्थापने बिम्बस्थापनपञ्चाशके। किं भणितं? तदाह—'विहिमागमलोगनीए'त्ति विधानं वक्ष्ये अभिधास्ये आगमनीत्या लोकनीत्या चेति गाथार्थः॥

यद्यत्र लोकग्रहणं ततः किम्? इत्याह—

लोयगहणाओसिरीअभयदेवसूरीहिं तत्थ वक्खायं।
अविरुद्धं लोइयमवि कीरइ पासायकरणाई॥ ४२॥

व्याख्या--लोकग्रहणाद् लोकशब्दप्रतिपादनात् श्रीअभयदेवसूरिभिर्भगवत्यादिशास्त्रवृत्तिकारिभिस्तत्र विम्बस्थापनपञ्चाशकवृत्तौ व्याख्यानं विवृतं, किं तत्? इत्याह-अविरुद्धमदूष्यं लौकिकमपि परदर्शनसत्कमपि नकेवलं निजमित्यपिशब्दार्थः, क्रियते विधीयते प्रासादकरणादि श्रीवत्सादिप्रासादविधानादि। आदिशब्दाच्लेपाविरुद्धपरिग्रहः। इदमत्र हृदयं—यः किल लौकिकैर्निजदेवकुले वास्तुविद्योक्तप्रासादादिः कार्यते सोऽस्माकमपि देवसदने विधीयते न तत्र मिथ्यात्वं, मालापीयमस्माभिरस्मिन आदिशब्दे क्षिप्यते, अतोऽनवद्येति गाथार्थः।

समाप्तोऽयं मायमालाप्रतिपादकः सप्तमोऽधिकारः॥

साम्प्रतमष्टमः—

चउवीसवट्टयाई पडिमाओ जिणाण केई वारिंति।
तंपि न जुत्तं जम्हा एए दोसा पसज्जन्ति॥ ४३॥

व्याख्या—चतुर्विंशतिपट्टकादिप्रतिमाः, आदिशब्दाज्जिनत्रयादिपरिग्रहः, प्रतिमा जिनप्रतिकृतीः, जिनानां तीर्थकृतां केऽपि न सर्व्वे वारयन्ति निषेधयन्ति, नैताः क्रियन्त इत्यर्थः तदपि न केवलं पूर्वोक्तमित्यपेरर्थः, नेति निषेधे, युक्तं संगतम्, यस्मादेते वक्ष्यमाणा दोषा दूषणानि प्रसज्यन्ते भवन्तीति गाथार्थः॥

पुव्वायरणभंगो जिणाण आसायणा विपडिवत्ती;
सद्धाभंगो मुद्धाणं होंति एमाइया दोसा॥ ४४॥

व्याख्या—पूर्वाचरणाभङ्गो बहोः कालादियं प्रवृत्तिः तस्या विनाशः, जिनानां सर्वज्ञानामाशातना पूर्वकथितप्रकारेण, विप्रतिपत्तिर्विरोधः—एको भणति मदीया श्रेष्ठाऽन्यश्च मदीयेत्येवं लक्षणा, श्रद्धाभङ्गो भक्तिनाशो मुग्धानां मन्दमतीनाम्। ते ह्येवमध्यवस्यन्ति—हा ! किमस्माभिर्मन्दभाग्यैर्विधिमजानद्भिरेवं प्रतिष्ठा कारिता इति भवन्ति जायन्ते एवमादयः उक्तप्रकारादयः, आदिग्रहणात्तद्बहुमानपूजाद्यभावादयो वाच्याः। वकारोत्र प्राकृतात्लुप्तो द्रष्टव्य इति गाथार्थः ॥

सूत्रेणैव ससम्बन्धां गाथामाह—

किंचित्थ अत्थि जुत्ती वि पयडहरिभद्दसूरिवयणाओ
तं च इमं तिविहा खलु होइ पइट्ठा जिणिंदाणं ॥ ४५ ॥

व्याख्या—अस्ति विद्यतेऽत्र चतुर्विंशतिपट्टकादिकरणे युक्तिरपि घटमाना वाक्यमपि न केवलमाचरणेत्यपिशब्दार्थः, प्रकटहरिभद्रसूरिवचनात् प्रसिद्धहरिभद्राभिधानाचार्यभणनात्, तदेवार्थत आह—तच्च तत्पुनर्भणनमिदं वक्ष्यमाणं—त्रिविधा त्रिप्रकारा खलुर्वाक्यालङ्कारे, भवति प्रतिष्ठा जिनगुणाध्यारोपलक्षणा जिनेन्द्राणां मुनीशानामिति गाथार्थः ॥

तदेव त्रैविध्यमाह—

पढमा वत्तिपइट्ठा खेत्तपइट्ठा पुणो भवे बीया।
तइया महापइट्ठा तासिं वक्खाणमेवं तु ॥ ४६ ॥

व्याख्या—प्रथमाऽऽद्या व्यक्तिप्रतिष्ठा, क्षेत्रप्रतिष्ठा पुनर्भवेद् द्वितीया, तृतीया महाप्रतिष्ठा, तासां प्रतिष्ठानां विवरणमेवं वक्ष्यमाणप्रकारमेव। तुरेवकारार्थः। स च दर्शित इति गाथार्थः ॥

तदेव गाथाद्वयेनाह—

वत्तिविसेसो एगस्स जा उ पडिमा भवे जिणिंदस्स।
खेत्ते भरहे उसभाइयाण सव्वाण बीयाउ ॥ ४७ ॥

सव्वेसुवि खेत्तेसु जिणिंयमित्ता भवंति तित्थयरा।
सत्तरसयसंखाए महापइट्ठा इमा भणिया ॥ ४८ ॥

व्याख्या—सुगमे।

यत एवं, अत उक्तिभत्युक्तिगाथामाह—

तो णज्जइ चउवीसट्टयाइकरणं अह विभिन्नकरणेवि ।
सहलं हविज्ज सच्चं वित्ताइअभावकरणेवं ॥ ४९ ॥

व्याख्या—तस्मात् ज्ञायते बुध्यते चतुर्विंशतिपट्टकादिकरणं विधानम् । आदिशब्दाच्छेषप्रतिष्ठाग्रहः, तिकारवकारावत्र प्राकृतलक्षणेन लुप्तौ, अथेति पराभिप्रायदर्शकः, तच्चतुर्विंशतिपट्टकादिकरणं विभिन्नकरणेपि पृथग्निष्पादनेऽपि न केवलमेकत्र विधाने इत्यपिशब्दार्थः; सफलं चरितार्थं भवेत् सत्यमवितथं, किन्तु वित्ताद्यभावाद् द्रव्यापरिपूर्त्तेः, आदिशब्दात्कस्यचिदेवं समाधानादिपरिग्रहः, करणं विधानमेवमुक्तप्रकारेण, अनुस्वारश्चात्र लुप्तो दृश्यः । पूर्व्वोक्तार्थसंवादस्तु उक्तः षोडशाख्यप्रकरणोक्तश्लोकैरिति बोद्धव्यः ।

" व्यक्त्याख्या खल्वेका क्षेत्राख्या चापरा महाख्या च ।
यस्तीर्थकृत् यदा किल तस्य तदाद्येति समयविदः ॥
ऋषभाद्यानां तु तथा सर्व्वेषामेव मध्यमा ज्ञेया ।
सप्तत्यधिकशतस्य च चरमेह महाप्रतिष्ठेति ॥

× × × × × ×

भावरसेन्द्रात्तु तथा महोदयाज्जीवताम्ररूपस्य ।
कालेन भवति परमा प्रतिबद्धा सिद्धकाञ्चनता ॥
वचनानलक्रियातः कर्म्मेन्धनदाहतो यतश्चैषा ।
इति कर्त्तव्यतयाऽतः सफलैषाप्यत्र भावविधौ ॥ "

इति गाथार्थः ॥

अत्रैवार्थे अन्यमतमुत्क्षिप्य परिहरन्नाह—

जंपि अहरुत्तरेणं करणे आसायणा भणंतन्ने ।
तंपि य न जुत्तं सव्वे तुल्लगुणा जेण तित्थयरा ॥ ५० ॥

व्याख्या—यदपि अधरोत्तरेण आधाराधेयरूपेण करणाद्विधानादाशातनां ज्ञानादित्रुटिरूपां भणन्ति गदन्त्यन्येऽपरे, तदपि न केवलं पूर्व्वोक्तं नेति निषेधे युक्तं सङ्गतम् । कस्मात् ? यस्मात्सर्व्वे समस्ता तुल्यगुणा अहीनातिरिक्तगुणा-

स्तीर्थकराः, शाश्वतप्रतिमानुकार्यष्टमहाप्रातिहार्यसर्वज्ञप्रतिमाकरणे तु विप्रतिपत्ति रेव नास्त्यतो न तत्करणं प्रति विचार इति गाथार्थः ॥

एवं स्थिते जीवोपदेशमाह—

मइमोहं तो मा कुणसु जीव वंदसु जिणिंदपडिमाओ ।
जह तह पइट्ठियाओ इच्छंतो सासयं सोक्खं ॥ ५१ ॥

प्रकटार्था । नवरं शाश्वतसौख्यं निर्व्वाणसातमिति गाथार्थः ॥

चतुर्विंशतिपट्टकादिविचारणाष्टमोधिकारः समाप्तः ॥

इदानीं नवमः प्रारभ्यते ।

सव्वंपि अणुट्ठाणं अविहिकयं केइ पडिनिसेहंति ।
अस्सुयसुयपरमत्था जम्हा एवं परूविंति ॥ ५२ ॥

व्याख्या—सव्वमपि समस्तमपि न केवलमेकमित्यपिशब्दार्थः । अनुष्ठानं प्रत्युपेक्षणादि साध्वपेक्षया, श्रावकापेक्षया च देवभवनकरणादिकं, अविधिकृतं- अयथोक्तं किञ्चिदविसंवादरूपं केऽपि स्तोकाः प्रतिनिषेधयन्ति निवारयन्ति । हेतुद्वारेण विशेषणमाह- अश्रुतश्रुतपरमार्था—अनाकर्णितसिद्धान्तरहस्याः । ननु किमत्रासङ्गतं ? अत आह--यस्मादेवं वक्ष्यमाणन्यायेन प्रभवोऽस्मत्पूज्या ब्रुवते प्रतिपादयन्तीति गाथार्थः ॥

तदेवाह गाथाद्वयेन—

अविहिकया वरमकय अस्सुइवयणं भणंति समयन्नू ।
अविहिकए पच्छित्तं थोवं अकए बहु होइ ॥ ६१ ॥
अकुणंताउ कुणंतो अविहीइवि होइ निज्जराभागी ।
कित्तिमेत्ता सत्ता जं विहिविन्नायगा लोए ॥ ६२ ॥

व्याख्या —' अविधिकृताद्वरमकृतं—अयथोक्तविहितात्प्रशस्तमननुष्ठितं ' अश्रुतिवचनमनागमिकप्रतिपादकं, असूयावाक्यं वा अक्षमाभणितिं भणन्ति समयविदः सिद्धान्तज्ञाः । किमिति ? यतः अविधिकृते प्रायश्चित्तं अपराधलक्षणं स्तोकं तुच्छं, अकृते अननुष्ठिते बहु प्रभूतं भवति प्रायश्चित्तमिति ॥ अत्र हि त्रयं

विधीयते—विधिकरणं, अविधिकरणं, अकरणं च। तत्र यो विधिना विधत्ते स धन्य एव। द्वितीयस्तु विधिकारकादविधिकारको न्यूनो व्यवहारतः, अकारकात्सोऽपि वरिष्ठः। एतदेव भावयन्नाह—अकुर्व्वन्नविधिनापि न केवलं विधिनेत्यपि शब्दार्थः, भवति निर्ज्जराभागी कर्म्मक्षयकारकः। कियन्मात्राः सत्त्वा यस्माद्विधिविज्ञायकाः यथोक्तपरिज्ञानवन्तो लोके जगति भवन्तीति गाथाद्वयार्थः॥

अत्रैवार्थे यमाह—

लोयविरुद्धं चेयं अविहीइ निसेहणं कुणंताणं।
उज्जुधम्मकरणहसणं इच्चाइ वयणओ सिद्धं॥ ६३॥

स्फुटार्था, नवरं ऋजुधर्म्मकरणहसनं-मुग्धजनानुष्ठानावज्ञाकरणमिति गाथार्थः॥

एवं स्थिते जीवोपदेशमाह—

तम्हा विहिसद्दहणं सया कुणंतो करेसु करणिज्जं।
असुणियपरमत्थाणं वयणेसुं जीव! मा सज्ज॥ ६४॥

इत्यविधिकरणविचारणो नवमोधिकार।

दशममाह

असलियछेयगंथा केइ निसेहन्ति सिद्धबलिकरणं।
तंपि न जुत्तं जम्हा भणियं कप्पाइचुन्नीसु॥ ६५॥

व्याख्या—असलितच्छेदग्रन्था—अनभ्यस्तोत्सारकशास्त्राः केपि निषेधयन्ति सिद्धबलिकरणं-जिनेशविम्बपुरतो राद्धबलिविधानम्। तदपि न युक्तं सङ्गतं, यस्माद्भणितमुक्तं-कल्पादिचूर्ण्याः, आदिशब्दादावश्यकचूर्णिपरिग्रह इति गाथार्थः।

तदुक्तमेवार्थत आह—

तं सित्थं जस्स सिहं दिज्जइ पसमंति तस्स वाहीओ।६६॥
पुव्वुप्पन्नाउ नवा न हुंति अन्नाउ छम्मासं॥

व्याख्या—तत्सर्व्वज्ञाग्रे बलिकृतगृहीतं सिक्थं जनप्रतीतं यस्य कस्यचिदनिर्दिष्टनाम्नः शिरसि मस्तके दीयते स्थाप्यते, प्रशाम्यन्ति उपशमं यान्ति तस्य शिरसि सिक्थविधातुर्व्याधयो रोगाः, किंविशिष्टाः ? इत्याह-पूर्व्वोत्पन्नाः चिरप्ररूढाः, नवा नूतना न भवन्ति न जायन्ते, अन्याः पूर्व्वविलक्षणाः कियत्कालं यावद् ? इत्याह-षण्मासं जनप्रतीतं तथा च तत्रैवं-" तं आढगं तंदुलाण सिद्धं देवमल्ले राया वा रायामच्चे वा " इत्यादियावत्, " तं तु सित्थं जस्स मत्थए बुज्झइ तस्स पुव्वुप्पन्ना वाहीओ वसमंती " त्यादि । अयमभिप्रायः— यदि राद्धं न स्यात्तत्सिक्थमिति नाभणिष्यत्, तच्च सिक्थं लवमात्रमिति वाच्यं, तत्रत्यग्रन्थव्याहतेः । तथाहि-तत्र दुब्बलिखंडिय" इत्यादि सर्व्वं निष्पादनविधिं प्रतिपाद्योक्तं-तत्र " सिद्धबलिं काऊणेति " । अत्र सिद्धशब्देन रन्धनमेव वाच्यं, न पुनर्निष्पन्नविधेः (धिः) सर्व्वस्य पूर्व्वप्रतिपादितत्वात्, तस्मात् स्थितमत्र सिद्धो बलिः सर्व्वज्ञपुरतो विधीयते इति गाथार्थः ॥

सिद्धबलिविचारलक्षणः समाप्तोयं दशमोऽधिकारः ।

अधुना एकादशो विधीयते—

उस्सग्गविहंडियसुद्धबोहपसरा भणंति एवन्ने ।
पासत्थाइसमीवे सुत्ताईयं न घेत्तव्वं ॥६७॥

व्याख्या—उत्सर्गेण सामान्योक्तविधिना, ' विहंडिय ' ति देशीशब्दो विनाशार्थः, ततो विनाशितः शुद्धबोधप्रसरः प्रधानमत्यवकाशलक्षणो येषां ते भणन्ति जल्पन्ति एवं वक्ष्यमाणन्यायेनान्येऽपरे, तदेवाह-पार्श्वस्थादिसमीपे, तत्र पार्श्वस्थ उक्तलक्षणः, आदिशब्दादवसन्नादिग्रहः, तेषां निकटे सूत्रादिकम्, आदिशब्दादर्थादिग्रहः, न ग्रहीतव्यं न स्वीकर्त्तव्यमिति गाथार्थः ॥

अत्रोत्तरं—

तमवि न छेयगंथाणुसारिवयणं जओ जइं दिस्स ।
भणियं निसीहगंथे उस्सग्गववायजलहिम्मि ॥ ६८ ॥

व्याख्या—तदपि सूत्रादिनिषेधकरणं न केवलं पूर्व्वोक्तमित्यपि शब्दार्थः, न नैव छेदग्रन्थानुसारि वचनं-उत्साहकशास्त्रसंवादि भणनम्, यस्मा-

यतिं साधुमुद्दिश्याश्रित्य भणितमुक्तं निशीथग्रन्थे प्रकल्पशास्त्रे, किंविशिष्टे ? उत्सर्गापवादजलधौ-सामान्यविशेषनीरधौ इति गाथार्थः ॥

तदेवाह—

संविग्गमसंविग्गे पच्छाकडसिद्धपुत्तसारूवी ।
पडिक्कंते अब्भुट्ठिए असई अन्नत्थ तत्थेव ॥ ६९ ॥

सुगमा । भावार्थस्तु कथ्यते-प्रथमं संविग्नस्योद्यतस्य सूत्रार्थनिपुणस्य समीपे साधुभिः श्रोतव्यं, तदभावेऽसंविग्नस्यापि गीतार्थस्य, तस्याप्यभावे पश्चात्कृतस्यामुक्तलिङ्गस्य, स च द्विरूपो भवति-एकः सिद्धपुत्रोऽन्यश्च सारूपी । अनयोश्च स्वरूपमाभ्यामुक्ताभ्यामवगन्तव्यम् ॥

" सभज्जओ वावि अभज्जओ वा नियमेण दोसुक्किलवत्थधारी ।
खुरेण मुंडो असिही सिही वा अदंडपत्तो विय सिद्धपुत्तो ॥
मुंडसिरो दोसुक्किलवत्थधरो न विय बंधए कच्छं ।
हिंडइ नवा अभज्जो सारूवी एरिसो होइ ॥ "

एतयोश्च देशनां कृत्वाऽभ्युद्यमं कार्यौ, यदि कुरुतस्ततो लष्टं, न चेत्, ततोन्यत्र नीयेते, यदि न गच्छतः ततस्तत्रैव सिद्धान्तोक्तविधिना तत्समीपे पठितव्यम्, पठद्भिश्च यदि निर्वाहो न भवति तयोस्ततः स्वयं सर्व्वं करणीयं, श्रावकाश्च कारयितव्याः । तथा च तत्रैव निशीथे भणितं—

" चोयइ से परिवारं अकरिंते वा भणाइ तो सड्ढे ।
अव्वोच्छित्तिकरस्स उ सुयभत्तीए कुणह पूयं ॥ "

तथा उपदेशमालायां सुग्गइमग्गपइव—" इत्यादि, अकरणे च प्रायश्चित्तं भणितमिति भावार्थ इति गाथार्थः ॥

एवं स्थिते जीवोपदेशमाह—

ता सिद्धिनयरसम्मग्गपयडणे नाणमणिपईवम्मि
कुणसु पयत्तं रे जीव ! मच्छरं चइय सव्वत्थ ॥ ७० ॥

व्याख्या--तस्मात्सिद्धिनगरसन्मार्गप्रकटने-मोक्षपुरपदवीप्रकाशके ज्ञानं श्रुतज्ञानं तदेव वाताद्यक्षोभ्यत्वेन प्रकाशकत्वेन च मणिप्रदीपः तस्मिन् कुरू

विधेहि प्रयत्नमादरं रे जीव ! भो आत्मन् मत्सरं रोषं त्यक्त्वा प्रोज्झ्य सर्व्वत्र पार्श्वस्थादिसमीपे। किञ्च श्रावकान् पार्श्वस्थादिसमीपे शृण्वतो वारयन्ति, स्वयं च पूर्वोक्तयुक्त्या निष्कारणं नित्यं श्रावकधर्म्मकथनेन पार्श्वस्था भवन्तोऽपीत्थं जल्पन्ति,अहो मोहविलसितमिति अवस्थितोऽयमस्मदुक्तो जीवोपदेश इति गाथार्थः॥

पार्श्वस्थादिसमीपश्रवणादिविचारवर्णनोऽयमेकादशोऽधिकारः ॥

इदानीं द्वादशो वर्ण्यते--

अइगरुयमच्छरेणं निवबलओ करिय केई चेइहरं।
विहिचेइयंति पभणंति माणिणो अविहिकरणेवि ॥ ७१ ॥

व्याख्या—अतिगुरुकमत्सरेण-बृहत्तरकालुष्येण अनुस्वारोऽत्र पूर्ववत्, नृपवशतश्च नरेशबलेन कृत्वा विधाय केप्येके चैत्यगृहं देवसदनं विधिचैत्यमागमोक्तमित्येवं प्रभणन्ति प्रजल्पन्ति मानिनोऽहङ्कारिणः, अविधिकरणेपि-आगमोत्तीर्णविधानेऽपि। नहि मत्सरतो नृपवशतश्च चैत्यविधानमागमे भणितमिति गाथार्थः।

एतच्च सङ्गतमसङ्गतं वा ? इत्यत्राह--

धम्मुज्जयाण नो देइ तंपि मणयंपि म णसुल्लासं।
रागदोसविहाडणपडुओ जम्हा विही भणिओ ॥ ७२ ॥

व्याख्या—धर्म्मोद्यतानां वृषोत्साहवतां नो नैव ददाति प्रयच्छति तदपि एतं चैत्यकरणमपि मनागपि स्तोकमपि न केवलं प्रभूतमित्यपेरर्थः, मानसोल्लासं चित्तोत्साहं, तस्माद्रागद्वेषविघटनपटुकः स्नेहरागविनाशदक्षो यस्माद्विधिश्चैत्यमन्दिरकरणं, दीर्घत्वं चात्रपूर्व्ववत् भणितः प्रतिपादित आगमे इति गाथार्थः॥

व्यतिरेकमाह—

जत्थ पुण रायदोसाण पगरिसो तत्थ धम्मधणनासो।
'विहि विहि' पभणंताणवि जं सुत्ते भणियमेवंति ॥ ७३ ॥

व्याख्या—यत्र पुनारागद्वेषयोरुक्तलक्षणयोः प्रकर्षः प्रागल्भ्यं तत्र धर्म्मधननाशो वृषद्रव्याभावः, 'विधि विधि' प्रभणतामपि। अयमाशयः-विधौ

विधिं जल्पन्तु, अविधौ तु विधिं जल्पन्तो न भान्ति इत्यस्यार्थस्यामृयाख्या-पनार्थं वीप्साभणनं विधिविधिरिति, नहि वचनमात्रेण विधिर्भवति, किन्तु शास्त्रोक्तप्रकारेण, स च " अहिगारी तु गिहत्थो " इत्यादि सर्व्वजनप्रतीत एवेति । किमिति यस्मात्सूत्रे निशीथे भणितमुक्तमेवं वक्ष्यमाणन्यायेन इतिवो-क्यममाप्ताविति गाथार्थः ॥

तदेवाह —

जं अज्जियं समीपल्लएहिं तवनियमबंभमइएहिं ।
मा हु तयं कलहंता छड्डेहइ सागपत्तेहिं ॥ ७४ ॥

अस्यार्थो निशीथोक्तकथानकादवसेयः । तच्चेदमर्थतः " केनचिद् ब्राह्मणेन महादारिद्र्यभराक्रान्तेन देशान्तराण्यटता कश्चिद् दृष्टप्रत्ययः सिद्धो दृष्टः । ततः क्षितितलन्यस्तमस्तकप्रमाणपूर्व्वकं विज्ञप्तोऽसौ, यथा भगवन ! त्वत्प्र-सादेन मम दारिद्र्यं यास्यतीति । तेनापि विनीतं दुःखितं च मत्वा प्रत्युक्तः— यथा वत्स ! मम पृष्ठतो लग्नः समागच्छ, येनापनयामि ते दारिद्र्यम्, एवमुक्त्वा नीतोऽसौ तेन रसकूपिकाद्वारसमीपे भणितश्चैवम् अस्यां रसकूपिकायां सिद्धः सुवर्णरसास्तिष्ठति, स च त्वया शमीवृक्षपत्रपुटकेनानिर्विण्णेन स्तोकं गृहीत्वा तुम्बकमिदं पूरणीयम्, भृते चास्मिन वस्त्राञ्चलेनेन मम संज्ञा विधेया, येना-कर्षयाम्यहम्, ततः सुवर्णं कृत्वा दारिद्र्यस्य जलाञ्जलिं दापयिष्यामीति भणित्वा तुम्बकमर्पयित्वा क्षिप्तोऽसौ । वरत्रया तन्मध्ये तेनापि तथाकृते आकृष्टोऽसौ, गदितश्च— वत्स ! दुरापोऽयं रसः, अतः प्रयत्नेन रक्षणीयः, तेनापि भणितमेव-मिति । ततश्चलितौ द्वावपि नगरसम्मुखं, ततो भूयोभूयस्तेन तथैव तस्याटवी-मध्ये समागच्छता शिक्षा दत्ता । स च पुनः पुनर्भणनेन रुष्टः सन शाकवृक्षपत्र-पुटेन तं रसमेकवारेण भूमौ विससर्ज । ततश्च सिद्धेन भणितो हंहो मन्द-भाग्य ! किमिदं चेष्टितं, अचिन्त्यचिन्तामणिकल्पमाहात्म्यं सुवर्णरसं प्राप्यैवं त्यजसि, अयोग्योऽसि सम्पदस्त्वमिति भणित्वा समीहितं स्थानं गतः सिद्धः । सोपि विलक्षवदनोऽपरिपूर्णेच्छः स्वगृहं प्राप्तो विविधाधिव्याधीनाञ्च भाज-नमिति दृष्टान्तः ॥

दार्ष्टान्तिकयोजना चैवं—दारिद्र्यतुल्यः साध्वादिः, सिद्धसदृश आचार्यादिः, काञ्चनरससन्निभं धर्म्मोपार्ज्जनं, शमीपत्रपुटाभास्तपोनियमगुप्तयः, अलाबूसदृशं देहं, सिद्धशिक्षासन्निभा आचार्याद्युपदेशाः, शाकपत्रपुटसन्निभः कलहः, तेन हि झगित्येव प्राणी चिरोपार्ज्जितं धर्म्मरसमात्मनः स्फेटयति। अन्याप्यत्र योजना स्वबुद्ध्या योजनीया सम्भविनीति गाथार्थः॥

ननु सामान्यधर्म्मोऽपयातु, तपःप्रभृतिभिस्तु विशिष्टानुष्ठानैरुपार्ज्जितो धर्म्मः कलहं कुर्व्वतामपि त्राणायास्माकं भविष्यति इति यो मन्येत तं शिक्षयितुं सदृष्टान्तामुपदेशपदोक्तां गाथामाह—

तवसुत्तविणपूया न संकिलिट्ठस्स हुंति ताणाय।
खवगागमविणयरओ कुंतलदेवी उदाहरणं॥७५॥

व्याख्या—तपःसूत्रविनयपूजाः प्रतीताः, न नैव संक्लिष्टस्य रागद्वेषाभिभूतस्य जन्तोर्भवन्ति जायन्ते त्राणाय। अत्रार्थे यथाक्रमं क्षपको विकृष्टतपस्वी, आगम इत्यागमज्ञः सूरिः, विनयरत एवंनामा साधुः, कुन्तलादेवी उदाहरणं दृष्टान्ता इतिगाथाक्षरार्थः। भावार्थस्तु कथानकेभ्योऽवसेयः। तानि चामूनि संक्षेपतः—

“ अस्ति पाटलिपुत्रं नाम नगरम्। तत्र कदाचिन्निजविहारेण विहरन्नग्निशिखनामा क्षपको वर्षावासार्थं समागतः। तेन चैकस्य गृहपतेरनुज्ञाप्य गृहं वसतिर्गृहीता। इतश्चान्योपि तत्रैव लिङ्गोपजीवी अरुणाभिधानः साधुः समायातः। सोपि तस्यैवागारिणः समीपे वसतिं याचितवान। तेनापि नान्या समस्तीति अभिधाय पूर्वोक्तक्षपकर्षिगृहद्वितीयभूमिकाऽनुज्ञाता। ततः स तस्यां स्थितः। एवं च तयोस्तत्र वसतोः क्षपकस्येतरं प्रति पापो दुरात्मा नित्यभोजी ममोपरि निवसतीति संक्लेशो बभूव, इतरस्य तु क्षपकस्य तपःशक्तिं वीक्ष्याधन्योऽहं ओदनमुण्डः पापात्मा यो गुणवतः तपस्विन उपरि स्थित आशातनां नित्यं करोमि (इति) संवेगः समजनि ततश्चैवं विधाध्यवसायवशतः क्षपकेण भववृद्धिः कृता अरुणेन च भवह्रासः। तौ च वर्षाकालान्तेऽन्यत्र विहृतौ। अत्रान्तरे तीर्थकरस्तत्र समवसृतः। देवैश्च समवसरणं कृतम्। उपविष्टे च तस्मिन् भगवति तत्रत्या लोका महासमृद्ध्या तद्वन्दनार्थं गताः। यथाविध्यभिवन्द्य तद्देशनां श्रुत्वा प्रस्तावे

क्षपकर्षैर्दुष्करतपःकरणाकृष्टमानसैस्तैर्भगवान् पृष्टः । स्वामिन् ! कियती कर्म्म-निर्ज्जरणा क्षपकर्षिणा कृतेति ? भगवतापि कथितः पूर्व्वोदितो भवद्वाद्विलक्षणः संक्लेशाद्वृत्तान्तः, इतरस्य च तद्विपरीतः । श्रुत्वा विस्मितमानसो लोको भगवन्तमभिवन्द्य स्वस्थानं गतः ॥ " इति क्षपकर्षिकथानकम् ॥

इदानीमागमज्ञकथानकम्—

" एकस्मिन् गच्छे आगमज्ञः सूरिरभवत्, परं क्रियायां मन्दादरः । अन्योऽपि तत्रैव क्षुल्लको ज्ञानवान्, ततस्तमनुयोगधरमाचार्यं मुक्त्वा क्षुल्लकसमीपे श्रावका सिद्धान्तश्रवणं कुर्वन्ति, बहुमानं च तदुपरि । एवं व्रजति काले आचार्यस्य क्षुल्लकोपरि मत्सरो जातः, अहो ! दुरात्माऽयं यो ममैवमवज्ञां करोतीति । अन्यदा च दुर्निवारत्वाद्यमभयानां तन्मत्सरानिवृत्त्या पञ्चत्वं गतः सूरिः, उत्पन्नश्च पन्नगत्वेनोद्याने । तस्मिंश्च साधवः तत्क्षुल्लकसहिताः समागताः । ततः स्वाध्यायभूमौ स क्षुल्लकश्चलितः, दृष्टस्तेनामर्षेण, धावितः क्षुल्लकसम्मुखं, वारितो बृहद्यतिभिः । ततः कश्चित्कालं छन्नः स्थितः, स्वाध्यायार्थं भूयोपि क्षुल्लकः (केन) स्वाध्यायभूमौ (गम)नं कुर्व्वता पुनः स सर्पोऽवलोकितः । आगत्य च तद्वृत्तान्तं गुरोर्न्यवेदयत् । ततस्तैः सामान्येनैवमवगतं—कश्चिद्विराधितश्रामण्यः साधुप्रद्वेषी भविष्यत्येष इति । अन्यदा तस्मिन् विषये केवली समायातः, पृष्टश्च तद्वृत्तान्तः कथितः, ततस्तेषां साधूनां संवेगो जातः । केवलिवचनाच्च गत्वा तदुद्यानं पूर्व्वभववृत्तान्तमावेद्य क्षामितोऽसौ । तस्य च क्षामणे कृते सति जातिस्मरणं समुत्पन्नं, संवेगं च गतः, आराधकश्च जातः ॥ " समाप्तमागमज्ञसूरिकथानकम् ॥

साम्प्रतं विनयरत्नकथानकं, तच्च प्रतीतत्वान्न कथ्यते । स चात्र विनयरत्नो गदितो य उपदेशमालायामुदायिनृपवधकः, तस्य विनयो निष्फलो जातः । यतोऽसौ तादृशं पापं कृत्वा नरकं गतः । इति विनयरत्नकथानकम् ॥

इतः कुन्तलादेवीकथानकं भण्यते—"कस्यचिन्नरपतेः कुन्तलदेव्यभिधाना पट्टराज्ञी बभूव । सा च शेषराज्ञीमत्सरेण सर्व्वज्ञमन्दिरे तत्कृतपूजातः स्नानविलेपनवासधूपवस्त्राभरणादिपरथयात्रास्नात्रादिकां पूजां जिनप्रतिकृतीनां कारितवती । एवं व्रजति कालेऽशुभकर्म्मोदयात्तस्याः कश्चिदसाध्यो रोगो जातः

जीवितशेषा च संवृत्ता। तां चैवं दृष्ट्वा पूर्व्वदत्तं पट्टरत्नं द्विती(या)मतेन सर्व्वमाभरणवस्त्रादि तत्पार्श्वाद् गृहीत्वा राजादेशेन नियोगिभीर्नृपतेर्भाण्डागारे क्षिप्तम्। ततस्तस्यास्तं पराभवं मन्यमानायाः आर्त्तध्यानमभूत्। तत्परिणता च मृता सती शुनीत्वेनोत्पन्ना। अन्यदा ततः केवली समायातः। स भगवान् अन्तःपुरिकाभिः सपत्नीभिः कुन्तलदेव्या उत्पत्तिं पृष्टः। भगवतापि वृत्तान्ते कथिते तासां संसारविरक्तिर्जाता। ततस्ताभिर्गत्वा दृष्ट्वाऽसौ शुनी सस्नेहं पुष्पचन्दनविशिष्टाहारदानादिभिः पूजिता। ततोऽस्या मण्डल्याः पूजादिकं संभ्रमं जिनमन्दिरं च दृष्ट्वा जातिस्मरणं सम्पन्नं बोधिश्च। क्षामितायाश्च ताभिः कषायोपशमे आराधना जाता। इति कुन्तलदेवीकथानकम्॥

इत्थं स्थिते जीवोपदेशमाह—

ता जइ कुणंति केइ तुह वयणं देसु तेसु उवएसं।
अह नो कुणंति रे जीव रमसु नो जत्थ रागाइ ॥ ७६ ॥

व्याख्या—तस्माद्यदि कुर्वन्ति विदधति केपि तव भवतो वचनं वाक्यं, देहि प्रयच्छ तेषु वचनकर्तृषु उपदेशं-'मा सङ्क्लेशं कुरुत भो भव्याः' इत्येवंरूपवाक्यपद्धतिंः अथेति विकल्पार्थः, नो नैव कुर्वन्ति तेषु रे जीव! भो आत्मन्! रमस्व क्रीड, नो नैव यत्र देवभवनकरणादौ रागादयः आदिशब्दाद्द्वेषादिग्रह इति गाथार्थः॥

विधिचैत्यकरणवर्णनोऽयं समाप्तो द्वादशोऽधिकारः॥

इदानीं त्रयोदशः—

केणवि गुणेण दंसणपभावगं पिच्छिऊण आयरियं।
केई कसायनडिया तंपि हीलंति मूढमई ॥ ७७ ॥

व्याख्या—केनापि-अनिर्दिष्टनाम्ना गुणेन जीवस्य निर्मलीकरणस्वभावेन दर्शनप्रभावकं सर्व्वज्ञशासनप्रकाशकं प्रेक्ष्य-अवलोक्याचार्यं सूरिं केपि न सर्व्वे, कषायनटिताः क्रोधाद्यभिद्रुताः तमपि-दर्शनप्रभावकं न केवलमन्यमित्यपिशब्दार्थः, हीलयन्ति तिरस्कुर्व्वन्ति मूढमतयः कुबोधाच्छादितधिषणा इति गाथार्थः॥

अमुमेवार्थं सिद्धान्तभणित्या निवारयन्निदमाह—

कप्पम्मिवि भणियमिणं सूरीणामासायगा इमे भणिया।
जे सयलजणसमक्खं भणंति एवं अहम्माणी ॥ ७८ ॥

व्याख्या—कल्पेपि छेदग्रन्थे, न केवलं शेषशास्त्रेष्वित्यपिशब्दार्थः, भणितमुक्तमिदं पूर्वोक्तम्, कथम्? इत्याह—सूरीणामाचार्याणामाशातका अवज्ञाकारका इमे वक्ष्यमाणा भणिताः प्रतिपादिताः, ये अनिर्दिष्टनामानः साध्वादयः सकलजनसमक्षं समस्तलोकप्रकटं भणन्ति गदन्त्येवं वक्ष्यमाणनीत्या अहंमानिनः आत्मोत्सेकिन इति गाथार्थः ॥

कल्पोक्तमेवाह—

इड्डिरससायगरुया परोवएसुज्जया जह मंखा।
अत्तुक्कघोसणरया घोसिंति दीया व अप्पाणं ॥ ७९ ॥

व्याख्या—ऋद्धिरससातगुरुका गौरवत्रयवन्तः परोपदेशोद्यता अन्यधर्मकथननियुक्ता मखा इव विचित्रफलकग्राहिनरविशेषा इव, यथाशब्द उपमानार्थः, स च योजितः। एवमभिप्रायः मंखो हि परेभ्यः कथयति स्वयं च न करोति, एवमेतेऽपि आत्मार्थघोषणरताः स्वकार्यप्रतिपादनसक्ताः घोषयन्ति उपदिशन्ति द्विजा इव ब्राह्मणा इवात्मानं स्वमेव वदन्तः आचार्याशातका इति हृदयमिति कल्पगाथार्थः ॥

अत्रैवार्थे ससम्बन्धां किञ्चिन्न्यूनां गाथामाह—

अन्नं च एत्थ दोसो लोयविरुद्धं हविज्ज इय वयणं।
रीढा जणपुज्जाणं वयणाउ—

व्याख्या—अन्यच्चेत्यभ्युच्चये, अत्र-आचार्यावर्णवादकरणे दोषो दूषणं लोकविरुद्धं जननिन्द्यं भवेज्जायेतेति वचनम्—एवं प्रतिपादनं, कस्मात्? रीढा अवज्ञा जनपूज्यानां लोकमान्यानां, वचनात्—पञ्चाशकभणनात्। तत्र हि लोकविरुद्धानि प्रतिपादयता भणितं—"उज्जुधम्मकरणहसणं रीढा जणपूयणिज्जाणं" इति किञ्चिदूनगाथार्थः ॥

एवं स्थिते जीवोपदेशं सार्द्धकगाथया प्राह—

ता तुमं जीव ॥ ८० ॥

मा मा कुणसु अवन्नं सयावि तेसिं कसायनडिओवि ।
जेण भवपंजराओ मुच्चसि निस्संसयं झत्ति ॥ ८१ ॥

व्याख्या--तस्मात्त्वं जीव ! मा मा कुरु अवज्ञां सदापि तेषां दर्शन-प्रभावकाचार्याणां कषायनटितोपि, येन भवपञ्जरात् मुच्यसे निस्संशयं झगितीति गाथासंस्कारार्थः ॥

इति दर्शनप्रभावकाचार्यविचारवर्णनस्त्रयोदशोऽधिकारः

अधुना चतुर्दशः प्रारभ्यते--

तित्थयरवंदणिज्जं संघंपि खिवेइ कोइ अइबालो ।
नत्थि संघो एसो भणिओ आसायगो कप्पे ॥ ८२ ॥

व्याख्या- तीर्थकरवन्दनीयं सर्वज्ञवन्द्यं "नमो तित्थस्स" इति भणनात् संघमपि- साधुसाध्वीश्रावकश्राविकाश्च ज्ञानादिगुणरूपं न केवलमाचार्यादी-त्यपेरर्थः, क्षिपति तिरस्कुरुते कोपि कश्चित्, एकारश्चात्र "स्वरोऽन्योन्यस्य" इति प्राकृतभवः, अतिबालो महामूर्खः, कथं क्षिपतीति चेत्, अत आह- नास्ति न विद्यते संघ उक्तरूपः, एष सङ्घक्षेपको भणित उक्त आशातकोऽवज्ञाकारकः कल्पे छेदग्रन्थे इति गाथार्थः ॥

कल्पभणितमेवाह--

अक्कोसतज्जणाई संघमहिक्खिवइ संघपडिणीओ ।
अन्नेवि अत्थि संघा सियालणंतिक्कमाईणं ॥ ८३ ॥

व्याख्या— आक्रोशतर्जनादिभिस्संघं-साध्वादिवर्ग, अधिक्षिपति निराकरोति सङ्घप्रत्यनीकः प्रवचनप्रतिकूलः, तत्राक्रोशो दुष्टवाग्भणनं, तर्जनं तु किमनेन सिद्ध्यतिनेत्येवमादि भणति। आदिग्रहणाद्यथौचित्यविनयाद्यकरणग्रहः, विभक्तिलोपाच्चेत्थं निर्देशः। एवं च वदन सङ्घं क्षिपतीत्याह-अन्येऽपि-परे, न केवलमयं साध्वादिवर्गे इत्यपेरर्थः । सन्ति विद्यन्ते सङ्घाः समुदायरूपाः,

केषामित्याह–' सियालणंतिकमाईणं ' तत्र शृगालः प्रतीतः, ' णंतिके ' ति देशीभाषया कौलिकः, आदिशब्दाच्छेषजन्तुपरिग्रहः । मकारोत्रालाक्षणिक इति गाथार्थः ॥

पुनरपि संघस्य पूज्यतां दर्शयन्निदमाह—

उग्घाडणाभएणं सुयकेवलिणावि मन्निओ संघो ।
पुव्वाणं परिवाडीं देहि भणंतो महासइणा ॥ ८४ ॥

व्याख्या—उद्घाटना समयभाषया सङ्घाद्बहिष्करणलक्षणा तस्या भयं तेन, अनुस्वारश्च पूर्ववत्, श्रुतकेवलिना चतुर्दशपूर्वधरेण न केवलं तीर्थकरेणेत्यपेरर्थः मानितः पूजितः सङ्घः प्रतीतः पूर्व्वाणां समयप्रसिद्धानां परिपाटीं पाठरूपां देहि प्रयच्छ ' शिष्येभ्यः ' इत्यध्याहारः, भणन् ब्रुवन्, किंविशिष्टेन ? महातिशयिना अचिन्त्यशक्तिना । अत्र च " कगचजतद० " इत्यादिना तकारलोपे " स्वरे प्रकृतिलोपसन्धयः " इत्यनेन तकारस्येकारलोपे रूपमिदं । इदमिह तत्त्वं-किल श्रीवीरस्वामिनो मोक्षं गतस्य दुष्कालो महान संवृत्तः । ततः सर्व्वोपि साधुवर्गः एकत्र मिलितो भणितं च परस्पर, कस्य किमागच्छति सूत्रं ? यावन्न कस्यापि पूर्व्वाणि समागच्छन्ति । ततः श्रावकैर्विज्ञाते भणितं तैः, यथा कुत्र साम्प्रतं पूर्व्वाणि सन्ति । तैर्भणितं भद्रबाहुस्वामिनि । ततः सर्व्वसङ्घसमुदायेन पर्यालोच्य प्रेषितः तत्समीपे साधुसङ्घाटकः, गत्वा प्रणम्य च तेन भणिताः सूरयो यथा सुशिष्याणां पूर्व्वपाटीं प्रयच्छत । तैरुक्तं–साम्प्रतं वयं महाप्राणध्यानसक्ताः ततो न तां दातुं शक्ता इत्युक्ते समागतः साधुसङ्घाटकः । संघसमीपे कथितं । तद्वचनतो भूयोऽपि प्रेषितः, यः संघवचो न कुरुते तस्य किं विधीयते ? एवं गत्वा कृत । तथा कृते तैरुक्तं-यः सङ्घो भणति तदहं करोमीत्युक्ते प्रेषितानि स्थूलभद्रप्रमुखाणि सुशिष्याणां पञ्चशतानीति गाथार्थः ॥

ननु न वयं संघं निराकुर्म्मः, किन्त्वास्माकीन सङ्घो नान्येषामिति ये मन्येरन् तान्प्रत्याह–

अम्हाणं च्चिय संघो अन्नाणं न उण लक्खणाभावा ।
नेवं वोत्तुं जुत्तं छउमत्थाणं जओ भणियं ॥ ८५ ॥

व्याख्या—अस्माकमेव सङ्घ अन्येषामपरेषां न पुनः, लक्षणाभावात् ज्ञानाद्यसत्तातः, नैवमित्थं वक्तुं गदितुं युक्तं सङ्गतं छद्मस्थानामतीन्द्रियज्ञानाभाववतां, यतो यस्माद्भणितमुक्तमागमे इति गाथार्थः ॥

तदेवाह—

परमरहस्समिसीणं सम्मत्तगणिपिडगभरियसाराणं ।
परिणामियं पमाणं निच्छयमवलंबमाणाणं ॥ ८६ ॥

व्याख्या—परमरहस्यं प्रधानतत्त्वं ऋषीणां साधूनां समाप्तगणिपिटकाभ्यस्तसाराणां परिपूर्णद्वादशाङ्गज्ञाततत्त्वानां परिणामिकमाभ्यन्तरचित्तरूपं प्रमाणं व्यवस्थापकं, निश्चयं व्यवहारप्रतिपक्षमवलम्बमानानामाश्रयताम् । इदमिह तत्त्वं—बहिर्वृत्त्याऽन्यथापि प्रवृत्तिर्भवतु, परिणामशुद्धौ ज्ञानादीनि निश्चयनयाद् भवन्त्येव । व्यवहारतस्तु ज्ञानदर्शने चारित्राभावेपि कस्यचिद् भवतः कस्यचिन्नेति । " ववहारस्स उ चरणे हयम्मि भयणा उ सेसाणं । " इत्यादि वचनतः सिद्धमिदं केचित्सम्पूर्णानुष्ठानिनोऽपि संघमध्ये दृश्यन्ते, तेषां ज्ञानादित्रयमप्यस्ति, अतो लक्षणाभावत्वस्य हेतोरसिद्धत्वात् सिद्धं विवक्षितसंघस्य गुणवत्त्वमिति गाथार्थः ॥

एवं स्थिते जीवोपदेशमाह—

संघस्सोवरि वयणं किंपि मा भणसु जीव ! पडिकुट्ठं ।
जइ तित्थंकरवयणं मणंमि भावेण संपत्तं ॥ ८७ ॥

प्रकटार्था ॥

संघविचारवर्णनोऽयं चतुर्द्दशोऽधिकार. समाप्तः ॥

इतः पञ्चदशो भण्यते—

सुविहियमिइ मन्नंता अप्पाणं केइ मंदधम्माणं ।
खेत्तेसु इंति दूसिंति ते उ नेयं वरं जम्हा ॥ ८८ ॥

व्याख्या—सुविहितं सुयतिमिति मन्यमाना इत्थमध्यवस्यन्त आत्मानं स्वं केप्येके मन्दधर्म्माणां पार्श्वस्थादीनां क्षेत्रेषु तद्ग्रामादिषु 'इंति' चि

देशीभाषया आगच्छन्ति, दूषयन्ति च निन्दन्ति तान् पार्श्वस्थादीन् । तुस्समुच्चय-चकारार्थः, स च दर्शित एव, नेति निषेधे, इदं गमनादि वरं प्रधानं यस्मात् तदनुवृत्त्यादिना तत्र स्थातव्यं कारणेनागतैरितरथा दोष इति गाथार्थः ॥

अस्यैवार्थस्य साधनार्थमुपदेशपदोक्तं गाथाद्वयमाह—

अगीयादाइन्ने खेत्ते अन्नत्थ ठिइअभावम्मि ।
भावाणुवघायणुवत्तणाए तेसिं तु वसियव्वं ॥ ८९ ॥
इहरा सपरुवघाओ उच्छोभाईहिं अत्तणो लहुया ।
तेसिंपि पावबंधो दुगंपि एयं अणिट्ठंतु ॥ ९० ॥

व्याख्या—अगीताद्याकीर्णे श्रुतार्थानभिज्ञपार्श्वस्थाद्याकुले क्षेत्रे ग्रामादौ अन्यत्र नगरादौ निर्व्वाहाभावतः स्थित्यभावे अविद्यमानवासे भावानुपघातानुवर्तनया चित्तासङ्क्लेशेनानुकूल्येन च तेषां अगीतादीनां तु पादपूरणे वस्तव्यम् । व्यतिरेकमाह–इतरथा ऽनुवर्त्तनाद्यभावे स्वपरोपघातः–आत्मान्यसंक्लेशः; 'उच्छोभाईहिं' ति असद्दोषाविष्करणादिभिः, आदिशब्दादपकारादिग्रहः, आत्मनः स्वस्य लघुता माहात्म्याभावः, तेषां पुनरगीतादीनामपि, तु पुनरर्थः, स च योजित एव, पापबन्धः कलुषोपचयः ।, द्वयमप्येतत् पूर्व्वोक्तमनिष्टमेव । तुरेवकारार्थः, स च दर्शित एव । न चैतदनार्ष, प्रकरणोक्तत्वात् । यतो निशीथे भणितं–" खेत्तं तु ओसन्नाइ भावियं तत्थ तयाणुवत्तीए वसियव्वं " तथा पञ्चकल्पेऽपि भणितं–" अणाययणं वज्जयंतेणं विहारो कायव्वो । के उण अणायणा ? भन्नइ–पासत्थाइणो कुलिंगिणो य । " एतच्च विशुद्धयत्यपेक्षया बोद्धव्यम् । ये पुनः पूर्व्वोक्तयुक्त्या पार्श्वस्थादयः सुतरां विवाद एव न कार्य इति गाथाद्वयार्थः ॥

एवं स्थिते जीवोपदेशमाह—

जइ जीव ! हियच्छेसी तुमं तओ कुणसु अप्पणो इट्ठं ।
अणुयत्तणाइजुत्तो पात्थाईसु तक्खित्ते ॥ ९१ ॥

व्याख्या—यदीति स्त्यर्थः, जीवात्मन् ! हितैषी धर्म्मगवेषकस्त्वं भवान् ततस्तस्मात् कुरु विधेहि आत्मनः स्वस्येष्टं प्रत्युपेक्षणादि व्यापारम् ।

किंविशिष्टः? अनुवर्त्तनादियुक्तः—आनुकूल्यानुपघातसहितः, केषु? पार्श्वस्थादिषु प्रतीतेषु तत्क्षेत्रे पार्श्वस्थादिप्रचुरग्रामादाविति गाथार्थः ॥

पार्श्वस्थाद्यनुवर्त्तनावर्णनोऽयं पञ्चदशोऽधिकारः समाप्तः ।

पढइ नडो वेरग्गं इच्चाई दंसिऊण केइत्थ ।
नाणड्ढाणमवन्नं कुणंति नेयं वियाणंति ॥ ९२ ॥

व्याख्या—पठति नटो वैराग्यमित्यादि निदर्श्य कथयित्वा, आदिशब्दाद् "निव्विज्जेज्जा य बहुजणो जेण पढिऊण तं तह सढो जालेण जलं समोयरइ" इति दृश्यं, सुगमं च, येऽपि स्तोका अत्र जिनप्रवचने, अत्र एकाराकारलोपे पूर्व्ववत् रूपमिदम्, ज्ञानाढ्यानां बह्वागमानामवज्ञामश्लाघादिरूपां कुर्व्वन्ति विदधति, नेति निषेधे, इमश्च वक्ष्यमाणं विजानन्ति बुध्यन्त इति गाथार्थः ॥

तदेवाह—

नाणाहिओ वरतरं हीणोवि हु पवयणं पभाविंतो ।
न य दुक्करं करिंतो सुट्ठुवि अप्पागमो पुरिसो ॥ ९३ ॥

सुबोधार्था ।

तथा—

छट्ठट्ठमदसमदुवालसेहिं अबहुसुयस्स जा सोही ।
एत्तो बहुयरिया पुण हविज्ज जिमि(मि)यस्स नाणिस्स ॥ ९४ ॥

इयमपि सुगमा ।

ननुयद्येवं तर्हि पूर्व्वोक्तस्य व्याहतिः, सत्यं, तन्निन्दावाक्यमेवमसौ भण्यते; येन क्रियायामुद्यमं करोति, नचासौ गुणविकलः, कथमन्यथानन्तरगाथाद्वयोक्तं "नाणाहियस्स नाणं पूइज्जई—" इत्यादि च घटते? इति ॥

अत्रैवार्थे जीवोपदिष्टिमाह —

संसारसंभवाओ दुहाओ जइ जीव! तंसि निव्विन्नो ।
मा नाणीणमवन्नं करेसु ता दीवतुल्लाणं ॥ ९५ ॥

व्याख्या—संसारसम्भवाद् भवोद्भूतात् दुःखादसातात् यदि जीव ! त्वं भवानसि भवसि निर्विण्णः श्रान्तः, मेति निषेधे ज्ञानिनामागमज्ञानामव-ज्ञामवर्णवादादिरूपां कुरु विधेहि, तस्माद् भावप्रकाशकत्वेन दीपतुल्यानां प्रदीपसदृशानाम् । अयमभिप्रायः—ज्ञानवतामवज्ञादिकरणात् ज्ञानावरणीयं कर्म्म बध्यते, तथैव तथा दर्शनावरणीयं, तेन च मोहनीयं, मोहनीयेन चोदीर्णेनाष्टौ कर्माणि, ततश्च भवभ्रमणम् । एतच्च शतकभगवत्यादिषु सूत्रेषु प्रतीतमिति न वितन्यते । अतः सुष्ठूक्तं ज्ञानाद्यवज्ञातो भवदुःखमिति गाथार्थः ॥

ज्ञानाद्यवज्ञाविचारवर्णः षोडशोऽधिकारः समाप्तः ॥

इदानीं सप्तदश उच्यते—

गच्छं गुरुवयणं वि य चइउं केइ चरंति धम्मत्थी ।
तंपि न संगयमेयं जम्हा सुत्ते इमं भणियं ॥ १६ ॥

व्याख्या—गच्छमाचार्यादिसमुदायं गुरुवचश्च सूरिभणितं, चियशब्दः समुच्चयार्थः, त्यक्त्वा परिहृत्य केऽपि केचन चरन्ति पर्यटन्ति धम्मार्थिनश्चारित्र-प्रयोजनाः, तदपि गच्छत्यागादिकं न केवलं पूर्व्वोक्तमित्यपिशब्दार्थः, न नैव सङ्गतं युक्तम्, एवं गच्छत्यागादिना यस्मात्सूत्रे उपदेशपदाख्ये इदं पुरोवर्ति भणितमुक्तमिति गाथार्थः ॥

सुद्धुंछाईसु जत्तो गुरुकुलचागाइणेह विन्नेओ ।
सपरसरजक्खपिच्छत्थघायपायाच्छिवणतुल्लो (?) ॥ १७ ॥

व्याख्या—शुद्धोञ्छादिषु यत्न उद्यमः, तत्र शुद्धमाधाकर्म्माद्यदूषितं, उञ्छं तु वल्लादि, आदिग्रहणाच्छेषानुष्ठानग्रहः, गुरुकुलत्यागादिना गच्छतच्छि-क्षापरिहारेणेह प्रवचने विज्ञेयो बोद्धव्यः । किंविशिष्टः ? सपरवेषेण (?) सरजस्काः तापसविशेषास्तेषां पिच्छानि मयूराङ्गरुहाणि तदर्थं घातो विनाशस्तत्र पादानां चरणानां 'अछिवणं'ति देशीभाषयाऽस्पर्शनं तेन तुल्यः सदृश इति गाथार्थः ॥ भावार्थस्तु कथानकादवसेयः । तच्चेदं —

कित्लिकस्य नरपतेरश्वाः प्रदीपनके मनाक् दग्धाः, क्षतानि च तेषां जातानि । ततो नरपतिना वैद्यः पृष्टः कथमेते भव्या भविष्यन्ति ? तेनोक्तं-यदि

'मायूरपिच्छनिर्म्मापिततैलेन म्रक्ष्यन्ते' इत्युक्ते नराधिपेन समादिष्टास्तदानयनार्थं निजपुरुषाः, यावत्ते परिभ्रम्य समागता राज्ञः समीपे। कथितं च तैर्देव! न कुत्रचिन्नीलकण्ठाङ्गरुहाणि सन्ति मुक्त्वा युष्माकं गुरून्। ते हि तानि सर्व्वाङ्गेषु धारयन्ति, न च जीवन्तो मुञ्चन्ति, इदमेव तेषां व्रतम्। राज्ञोक्तं, यद्येवं ततो घातयित्वा तान् समानयत पिच्छान्, परं भवद्भिस्तेषां निजचरणा न लगनीयाः, यतोऽस्माकं ते गुरवः। तत्र जीवितव्यतुल्यान् मूलगुणान्नाशयति, पादस्पर्शनसदृशोत्तरगुणरक्षार्थं गच्छान्निर्गत्य ये पर्यटन्ति। तस्मादुत्तरगुणभङ्गेपि अशुद्धभक्ताभ्यवहारलक्षणे गच्छ एवासितव्यमिति॥

इदानीं गुरुवचनाकरणे सिद्धान्तगाथामाह—

छट्ठट्ठमदसमदुवालसेहिं मासद्धमासखमणेहिं।
अकरिंतो गुरुवयणं अणंतसंसारिओ भणिओ॥ १८॥

उत्तानार्था। यदि पुनर्गच्छो गुरुश्च सर्वथा निजगुणविकलो भवति, तत आगमोक्तविधिना त्यजनीयः, परं कालापेक्षया योऽन्यो विशिष्टतरस्तस्योपसम्पद् ग्राह्या, न पुनः स्वतन्त्रेस्स्थातव्यमिति हृदयम्॥

यत एवमतो जीवानुशिष्टिमाह—

हेलाए विहाडियदोसपंजरे गच्छवासगुरुवयणे।
जीव तुमं थिरचित्तं करेसु ना सिहरिसिहरं व॥ १९॥

व्याख्या—हेलया लीलया 'विहाडियं'ति देशीभाषया विनाशिना दोषा रागादयस्त एव जीवशकुनिनिरोधकत्वात्पञ्जरं येन तस्मिन् गच्छवासगुरुवचने उक्तलक्षणे जीव आत्मन् त्वं भवान् स्थिरं निश्चलं, अनुस्वारोऽत्र प्राकृतत्वाल्लुप्तः, चित्तं मानसं कुरु विधेहि। तस्मात्किमिव? शिखरिशिखरमिव पर्व्वतशृङ्गमिव, वा उपमार्थः, स च दर्शित एव। अत्राधिकारद्वयेप्येतत्परस्परोपकारकत्वेनैकगाथयैवोत्क्षेपो निगमनं च कृतमिति गाथार्थः॥

गच्छगुरुवचनात्यागविचारार्थौ सप्तदशाष्टादशावधिकारौ समाप्तौ।

इतः एकोनविंश उच्यते—

तह बंभसंतिमाईण केई वारिंति पूयणाईयं ।

तन्न, जओ सिरिहरिभद्दसूरिणो णुमयमुत्तं च ॥ १०० ॥

व्याख्या—तथेति वादान्तरभणनार्थः । ब्रह्मशान्त्यादीनां मकारः पूर्व्ववत्, आदिशब्दादम्बिकादिग्रहः, केप्येके वारयन्ति पूजनादिकमादिग्रहणाच्छेषतदौचित्यादिग्रहः । तत्पूजादिनिषेधकरणं नेति निषेधे । यतो यस्माच्छ्री हरिभद्रसूरेः सिद्धान्तादिवृत्तिकर्तुरनुमतमभीष्टं तत्पूजादिविधानं, उक्तं च भणितं च पञ्चाशके इति गाथार्थः ॥

तदेवाह -

साहम्मिया य एए महड्डिया सम्मद्दिट्ठिणो जेण ।

एत्तो च्चिय उचियं खलु एएसिं इत्थ पूयाइ ॥ १०१ ॥

व्याख्या—प्रतीतार्थो ॥

न केवलं श्रावका एतेषामित्थं कुर्व्वन्ति, यतयोऽपि कायोत्सर्गादिकमेतेषां कुर्व्वन्तीत्याह—

विग्घविघायणहेउं जइणोवि कुणंति हंदि उस्सग्गं ।

खित्ताइदेवयाए सुयकेवलिणा जओ भणियं ॥ १०२ ॥

व्याख्या—विघ्नविघातनहेतोरुपद्रवविनाशार्थं यतयोऽपि साधवोपि न केवलं श्रावकादय इत्यपि शब्दार्थः, कुर्व्वन्ति विदधति, हंदीति कोमलामन्त्रणे, उत्सर्गं कायोत्सर्गं क्षेत्रादिदेवतायाः, आदिशब्दाद्भवनदेवतादिपरिग्रहः, श्रुतकेवलिना चतुर्द्दशपूर्व्वधरेण यतो यस्माद्भणितं गदितमिति गाथार्थः ॥

तदेवाह—

चाउम्मासियवरिसे उ उस्सग्गो खेत्तदेवयाए य ।

परिकयमेज्जसुराए करिंति चउमासिए वेगे ॥ १०३ ॥

ननु यदि चतुर्म्मासकादिभणितमिदं किमिति साम्प्रतं नित्यं क्रियते ? इत्याह—

संपइ निच्चं कीरइ सन्निज्झाभावओ विसिट्ठाओ ।
वेयावच्चगराणं इच्चाइ वि बहुयकालाओ ॥ १०४ ॥

व्याख्या— साम्प्रतमधुना नित्यं प्रतिदिवसं क्रियते विधीयते, कस्मात्? सान्निध्याभावतः तस्य करणाद्, विशिष्टादतिशायिनो वैयावृत्त्यकराणां प्रतीतानामित्याद्यपि न केवलं कायोत्सर्गादीत्यपेरर्थः, आदिग्रहणात् 'संतिकराणा-मि'त्यादि दृश्यं, प्रभूतकालात् बहोरनेहस इति गाथार्थः ॥

इत्थं स्थिते किं कर्त्तव्यम्? इत्याह—

विग्घविघायणहेउं चेइहररक्खणा य निच्चंपि ।
कुज्जा पूयाईयं एयाणं धम्मवं किंच ॥ १०५ ॥

व्याख्या— विघ्नविघातनहेतोरुपसर्गनिवारकत्वेन आत्मन इति शेषः, चैत्यगृहरक्षाच्च देवभवनपालान्नित्यमपि सर्व्वदा न केवलमेकदेत्यपिशब्दार्थः, कुर्याद्विदध्यात् पूजादिकमादिशब्दात्कायोत्सर्गादिकारं, एतेषां ब्रह्मशान्त्यादीनां धर्म्मवान् धार्मिकः । अयमभिप्रायः— यदि मोक्षार्थमेतेषां पूजादि क्रियते ततो दुष्टं, विघ्नादिवारणार्थं त्वदुष्टं तदिति, किञ्चेत्यभ्युच्चये इति गाथार्थः ॥

अभ्युच्चयमेवाह—

मिच्छत्तगुणजुयाणं निवाइयाणं करिंति पूयाई ।
इहलोयकए सम्मत्तगुणजुयाणं न ऊण मूढा ॥ १०६ ॥

व्याख्या— मिथ्यात्वगुणयुतानां प्रथमगुणस्थानवर्त्तिनां नृपादीनां नरेश्वरादीनां कुर्व्वन्ति पूजादि अभ्यर्चनं नमस्कारादि इहलोककृते मनुष्य-जन्मोपकारार्थं, सम्यक्त्वयुतानां दर्शनसहितानां ब्रह्मशान्त्यादीनामिति शेषः, न पुनर्नैव मूढा अज्ञानिन इति गाथार्थः ॥

इत्थं स्थिते जीवोपदेशमाह—

ता मा तुमं निवारसु तम्हा एयाण पूयणाईयं ।
जइ निव्विग्घं धम्मं इच्छसि काउं सया जीव ॥ १०७ ॥

व्याख्या —मेति निषेधे त्वं भवान्निवारय तस्मादेतेषां ब्रह्मशान्त्यादीनां पूजादिकं—अर्चनसत्कारादिकं, यदीति विकल्पार्थः, निर्विघ्नमुपद्रवरहितं धर्मं दानादिकं, इच्छस्यभिलषसि कर्त्तुं विधातुं सदा नित्यं जीव ! आत्मन्निति गाथार्थः ॥

ब्रह्मशान्त्यादिपूजनविचारार्थोऽयमेकोनविंशोऽधिकारः ॥

अधुना विंशतितममाह

अन्ने उ गुरुयसिरिमोहरायआणापरव्वसा बाला ।
पाढिंति सावयजणे उस्सग्गववायगाहाउ ॥ १०८ ॥

व्याख्या—अन्ये पुनरपरे गुरुकश्रीमोहराजाज्ञापरवशा महाज्ञाननृपतिशासनायत्ताः, अत एव बाला हिताहितविवेकविकला पाठयन्ति सूत्रदानतः श्रावकजनान् श्राद्धलोकान उत्सर्गापवादगाथाः समयप्रसिद्धा इति गाथार्थः ॥

तत्किं सम्मतं न वा ? इत्याह—

तं तु न कहंपि हरिसं जणेइ सुबहुस्सुयाण सूरीणं ।
जम्हा निसीहगंथे सावयमुद्दिस्स भणियमिणं ॥ १०९ ॥

व्याख्या—तत्पुनर्न कथमपि न केनापि प्रकारेण हर्षं सन्तोषं जनयत्युत्पादयति सुबहुश्रुतानामतिशयागमज्ञानां, इतरेषां तु जनयेदपि, सूरीणामाचार्याणां, यस्मान्निशीयग्रन्थे प्रतीते श्रावकं श्राद्धमुदिश्याश्रित्य भणितमुक्तमिदं वक्ष्यमाणमिति गाथार्थः ॥

तदेवार्थतो गाथाद्वयेनाह—

इयरसुयंपि पाढंतयाण साहूण संजईणं ।
पच्छित्तं खलु एयं सिद्धंताउ पुणो नाण ॥ ११० ॥
छज्जीवणिसुत्तेण अत्थउ पिंडएसणा चेव ।
कप्पइ पढिउं सोउंच आगमाउ न उण अन्नं ॥ १११ ॥

व्याख्या—इतरसूत्रमपि प्रकरणादिकं न केवलं सिद्धान्तसूत्रमित्यपि शब्दार्थः, पाठयतां सूत्रदानतः श्रावकादिकमित्यध्याहारः, साधूनां यतीनां

चार्यिकाणां, चः समुच्चये, प्रायश्चित्तमेव समये प्रतीतमुत्सर्गतः, खलुरवधारणे एतत् वक्ष्यमाणं सिद्धान्तादागमात्पुनस्तेषां श्रावकाणां षड्जीवनिका समयप्रसिद्धा सूत्रेण पाठनलक्षणेन सूत्रानुज्ञायामर्थोऽपि एतस्यानुज्ञातो द्रष्टव्यः, अर्थतः अभिधेयमाश्रित्य पिण्डेषणैव प्रतीता कल्पते युज्यते अपवाद इति शेषः; पठितुं सूत्रत श्रोतुं चार्थतः आगमान् सिद्धान्तान्, न पुनर्नैवान्यदरपरम् । तथा च निशीथगाथार्द्धम् " पव्वज्जाए अभिमुहं वा एति गिहिअन्नपासंडी । " एतच्चूर्णिः—गिहिं अन्नपासंडिं वा पव्वज्जाभिमुहं सावगं वा ' छज्जीवणिय ' त्ति जाव सुत्तउ अत्थउ जाव पिंडेसणाए, एसगिहत्थाइसु अववाउत्ति " इति गाथाद्वयार्थः ॥

सूत्रेण विहितसंबंधां गाथामाह—

किंच जईणवि परिणामिआण दिज्जंति छेयसुत्तत्था ।
अइपरिणयाण परिणामियाण न उणामदिट्ठंता ॥ ११२ ॥

व्याख्या—किञ्चेत्यभ्युच्चये । श्रावकाणां तावत् छेदग्रन्थादीनां सर्वथा निषेधः सिद्ध एव, यतीनामपि व्रतिनां परिणामकाणां–उत्सर्गापवादप्रियाणां दीयन्ते छेदग्रन्थसूत्रार्थाः—प्रतीताः, अतिपरिणामकानामपवादरसिकानां, अपरिणामकानामुत्सर्गतन्निष्ठानां नैव; नच पुन शब्दोऽवधारणार्थो दर्शित एव; आम्रदृष्टान्ताच्चूतज्ञातात् । तच्चेदं–" किल केनचिदाचार्येण सिद्धान्तरहस्यं दातुकामेन निजक्षुल्लकपरीक्षार्थं क्षुल्लकत्रयं क्रमेणाहूयेदमुक्तं–भो ! अस्मदर्थं आम्रफलान्यानयत । ततस्तैरिदं 'क्रमेण चिन्तितं श्यामप्रहृष्टसहजवदनकमलैरकृत्यमिदं, भव्यमिदं, तृतीयेन किं खण्डैर्वागोल्यैर्वा पक्करपक्वैः तैः प्रयोजनम् ? इति न सम्यग् ज्ञायते, ततो गुरुमभिवन्द्य पृष्टवान्–भगवन् ! अवगतो युष्माकमादेशः, परं विशेषतो ज्ञातुमिच्छामि, ततः कथयन्तु पूज्याः, येन तान्यानयामि शीघ्रमिति । अत्र प्रथम उत्सर्गप्रियत्वादपरिणामको द्वितीयस्त्वपवादरुचित्वादतिपरिणामकः, तृतीयस्तूभयप्रियत्वात्परिणामकः । आद्यावत्रायोग्यौ, तृतीयस्तु योग्य इति गाथार्थः ॥

अत्रैवार्थे दोषमाविष्कुर्वन्निदमाह—

अविहियउवहाणाणं नाणइयारेण तह असज्झाए ।
सज्झायं कुणंताणं ववहारे भणियमेवंति ॥ ११३ ॥

व्याख्या—अविहितोपधानानामकृततपसां, ज्ञानातिचारेण श्रुतमालिन्यजनकेन, तथाऽपरं अस्वाध्याये कालवेलादौ स्वाध्यायपाठं कुर्व्वतां, विदधतां व्यवहारे छेदग्रन्थाख्ये भणितमुक्तमेवमित्थम्, इतिर्वाक्यसमाप्तौ इति गाथार्थः ॥

तदेवाह—

उम्मायं व लभेज्जा रोगायंकं व पाउणे दीहं ।
केवलिपन्नत्ताउ धम्माउ वावि भंसेज्जा ॥ ११४ ॥

प्रकटार्था ।

अत्रैवार्थे दोषं दर्शयन् दृष्टान्तदार्ष्टान्तिकगर्भं गाथाद्वयमाह—

जह रन्ना पडिसिद्धे दिंतो गिण्हंत उ य रयणे उ ।
पावइ दंडमिहोग्गं तह जिणरन्नाउ नाणुमए ॥ ११५ ॥
छेयसुयत्थे रयणोवमे उ वामोहा पढंति पाढिंति ।
पावंति महाघोरं भवदंडं लंघियजिणाणा ॥ ११६ ॥

व्याख्या—यथेति दृष्टान्तार्थे । राज्ञा भूपतिना प्रतिषिद्धे निवारिते 'नैतानि कस्यचिद्दातव्यानि' इति ददत् प्रयच्छन् भाण्डागारिकादिः, गृण्हँश्चाददानः पदात्यादी रत्नानि माणिक्यानि, तु पूरणे, प्राप्नोति लभते दण्डं वित्तापहरादिकम्, इह जगत्युग्रं क्रकचपाटनादि, तथेति दार्ष्टान्तिकयोजनार्थे, जिनराज्ञा सर्व्वज्ञनरेश्वरेण, तुस्तथैव, न नैवानुमताननुज्ञातान् छेदसूत्रार्थान् रत्नोपमान् माणिक्यसदृशान् व्यामोहादज्ञानात् पठन्तः श्रावकादयः, पाठयन्तश्च तानेव यत्यादयः, विभक्तिव्यत्ययात् प्राप्नुवन्ति लभन्ते महाघोरं-अतीवरौद्रं भवदण्डं संसारभ्रमणं, किंविशिष्टाः ? लङ्घितजिनाज्ञाः त्यक्तसर्व्वज्ञशासना इति गाथाद्वयार्थः ॥

यत एवमतो जीवशिक्षामाह

तम्हा मा जीव तुमं सड्ढाणं देसु छेयसुत्तत्थे ।
जंपि य कहेमि किंची तं पि य इयबुद्धिए कहसु ॥ ११७ ॥

व्याख्या—तस्मान्मेति निषेधे, जीव आत्मन् ! देहि प्रयच्छ छेदसूत्रार्थान्, उपलक्षणत्वादस्यान्यदपि सिद्धान्तनिषिद्धं द्रष्टव्यम् । यदपि च कथयसि

व्याचक्षसे किञ्चित् स्तोकं, दीर्घता चात्र पूर्ववत्, तदपि च इतिबुद्धया एवं मत्या कथय ब्रूहि इति गाथार्थः ॥

तामेवाह—

अविकोविदेहिं तरलियमइणो मा धम्मबाहिरा हुंतु।
एए भव्वा, दंसेमि तेण पडिवक्खवयणाइं ॥ ११८ ॥

व्याख्या–अविकोविदैरगीतार्थैस्तरलितमतयो विसंस्थुलबुद्धयो मेति प्रतिषेधे धर्म्मबाह्या दानाद्युत्तीर्णा भवन्तु एते प्रत्यक्षवार्त्तिनो भव्या मोक्षयोग्याः, दर्शयामि प्रकटयामि तेन कारणेन प्रतिपक्षवचनानि उत्तरवचांसि। ननु अन्यान् वारयसि, स्वयं तु संवदनार्थं निजभणितस्य सर्व्वत्र तद्गाथाः कथयसि, विरुद्धमिदम्, सत्यं, यदा विप्रतिपन्नो जनो दर्शनं प्रति भवति, तदा रहस्यकथनेप्यदोषः। तथा च निशीथभणितमिदं—

"तम्हा न कहेयव्वं आयरिए एंतु पवयणरहस्सं।
खेत्तं कालं पुरिस नाऊण पगासए गुज्झं ॥ इति गाथार्थः ॥

व्यतिरेकमाह–

जइ पुण तुमंपि एमेय कहसि सड्ढाणं दुव्वियड्ढाणं।
ता तुज्झवि भवदंडो निरत्थओ एरिसो होही ॥ ११९ ॥

व्याख्या—यदि पुनस्त्वमपि न केवलं पूर्वोक्त इत्यपेरर्थः। 'एमेयं'ति तरलितमत्यभावे कथयसि जल्पसि श्राद्धानां श्रावकाणां, किंविशिष्टानां? दुर्व्विदग्धानां ज्ञानलवगर्व्वोद्धुराणां तस्मात्तवापि न केवलं पूर्व्वोक्तानामित्यपेरर्थः, भवदण्डः संसारभयं निरर्थको निष्प्रयोजन ईदृग् ईदृक्षो भविष्यतीति गाथार्थः ॥

श्रावकसिद्धान्तगाथापाठनविचारणो विंशतितमोऽधिकारः

एकविंशतितममाह—

अन्ने उ अहम्माणी निययाभिप्पायउज्जयविहारी।
नियसिस्सग्वंधचडिया अडंति बहुगामनगरेसु ॥ १२० ॥

व्याख्या—अन्ये पुनरपरे अहंमानिनोऽहंकारिणो निजकाभिप्रायोद्युक्त-विहारिणो स्वमतसुविहिता निजशिष्यस्कन्धचटिनाः स्वमाहंमारूढा अटन्ति चरन्ति ग्रामनगरेषु प्रभूतनिवासेषु मासकल्पविहारिणो वयमिति शेषः । इति गाथार्थः ॥

अत्रापि जीवोपदेशगर्भं विरोधं दर्शयन् गाथाद्वयमाह—

तत्थवि तुमं विभावसु अहहो अन्नाणविलसियं एयं ।
जं जंघाबलहीणाइविहरणं वारियं बहुहा ॥ १२१ ॥

ववहार-पंचकप्पाइएसु गंथेसु सुत्तकेवलिणा ।
अइवित्थरेण भणियं पज्जन्ते तत्थिमा गाहा ॥ १२२ ॥

व्याख्या—तत्रापि स्कन्धचटितविहरणेऽपि त्वं जीव ! विभावय चिन्तय अहहो इत्याश्चर्ये । अज्ञानविलसितं मूढताविजृम्भितमेतद् एवं विहरणम् । यस्माज्जंघाबलहीनादिविहरणम्, आदिशब्दाद् ग्लानादिपरिग्रहः, वारितं निषिद्धं बहुधाऽनेकप्रकारं व्यवहारपञ्चकल्पादिषु प्रतीतेषु ग्रन्थेषु शास्त्रेषु श्रुतकेवलिना भद्रबाहुस्वामिना । कथम् ? इत्याह—अतिविस्तरेण महाप्रपञ्चेन भणितमुक्तं पर्यन्ते, तदधिकारव्युच्छित्तौ तत्र तेषु ग्रन्थेषु इयमग्रे भणिष्यमाणा गाथा छन्दोविशेषलक्षणा इति गाथार्थः ॥

तामेवाह—

जो गाउयं समत्थो सराहारान्भ भिक्खवेलाउ ।
विहरउ एसो सपरक्कमाउ नो विहरितेण ॥ १२३ ॥

परं सुबोधा, नवरं प्रहरद्वयेन गव्यूतमेकं यावद् गन्तुं चरणाभ्यां (शक्नोति) तावद् विहरतु, तदभावे स्थानस्थितेनैवासितव्यमिति तात्पर्यार्थः ॥

एवमवगते जीवोपदेशमाह—

ता जइ तुहत्थि सत्ती विज्जन्ते सोहणा जइ सहाया ।
जीव तुमं तो विहरसु अह नो तो मंस विहरंते ॥ १२४ ॥

व्याख्या—ततो यदि भवतोऽस्ति विहर्तुं शक्तिः सामर्थ्यं, विद्यन्ते

सन्ति शोभना भव्या यदि सहाया गीतार्थादिसाधवः, जीव ! आत्मन् ! ततो विहर पर्यट । अथेति विकल्पार्थे । नो नैव ततः शंस श्लाघय विहरत आगमोक्तविधिना चरत इति गाथार्थः ॥

स्कन्धचटितविहारवर्णन(स्वरूप)एकविंशतितमोऽधिकारः ॥

द्वाविंशमाह—

मोत्तूणं पढणत्थं सिस्से विहरंति मासकप्पेणं ।
केइ पसिद्धत्थी उज्जय म्हि लोए पयासिंता ॥ १२४ ॥

व्याख्या—मुक्त्वा त्यक्त्वा पठनार्थमागमादिग्रहणार्थं शिष्यान् अन्तेवासिनो विहरन्ति पर्यटन्ति मासकल्पेन प्रतीतेन केऽपि न सर्वे प्रसिद्धयर्थिनः ख्यातिकामा उद्यताः सुविहिता 'अम्हे'त्ति वयं लोके जगति प्रकाशयन्तः प्रकटयन्तः इति गाथार्थः ॥

इदमपि निषेधयन्निदमाह—

नेयंपि आगमन्नूणं माणसे जणइ मोहणुक्करिसं ।
जम्हा समए भणिओ विहारकरणंमि एस विही ॥१२६॥

व्याख्या—नेति निषेधे । इदमपीत्थं विहरणं न केवलं पूर्वोक्तमित्यपिशब्दार्थः आगमज्ञानां सिद्धान्तविदां मानसे चित्ते जनयत्युत्पादयति शोभनं लष्टमुत्कर्षं प्रमोदम्, यस्मात्समये आगमे भणित उक्तो विहारकरणे चंक्रमणविधौ एष वक्ष्यमाणो विधिः कर्तव्यप्रकार इति गाथार्थः ॥

तामेवार्थतोऽर्द्धतृतीयगाथाभिरेवाह—

सुत्तत्थेहिं निप्फाइऊण सिस्से उ एगठाणाठिओ ।
मोत्तुं मासविहारं काऊणं पोरिसिदुगं तु ॥ १२७ ॥

गामंगामेण तओ विहरिज्जा सुविहिओ निरासंसो ।
नियएणुवगरणेणं सव्वेणं गिण्हिएण तहा ॥ १२८ ॥

तिविहेण लाघवेणं उवहिसरीरिंदियाभिहाणेणं ।

व्याख्या— सूत्रार्थाभ्यां प्रतीताभ्यां निष्पाद्य निष्ठितान् कृत्वा शिष्यान् क्षुल्लकान् एकस्थानस्थितो ग्रामाद्याश्रितो मुक्त्वा परिहृत्य मासविहारमेकत्र त्रिंश दिनावस्थितिरूपं, यतो व्यवहारे पठनविधावुक्तम्—

" बारसवासे गहिए उक्कालियं सरइ वग्गिमेगं तु ।
सोलस उ दिट्ठि वा गहणं मरणं दस दुवेया ॥

'सरइ' त्ति परावर्त्तते स्थिरीकरणार्थम् । तथा तत्रैव " से जे गिण्हिउं धारइउं व जोगा थेराण ते दिंति, सहायए उ गिण्हंति, ते ठाणठिया सुहेणं किचं व थेराण करिंति सव्वं " इत्यादि ॥ तथा कृत्वा पौरुषीद्विकं समयप्रसिद्धम् , अयमाशयः—यस्मिन् दिने ग्रामे गम्यते तस्मिन्नपि उत्सर्गतः सूत्रपौरुषीमर्थपौरुषीं कृत्वा गन्तव्यम् , न केवलमवस्थितेरन्यथात्वविधेः, तुः पूरणे ग्रामानुग्रामेण कोऽर्थः ? नैकमपि ग्राममपान्तराले मुक्त्वा गन्तव्यम् , ततो विहरेत् यायात् सुविहितो यतिर्निराशंस आहाराद्यभिलापरहितो निजकेन स्वीयेनोपकरणेन वस्त्रादिना सर्वेण समस्तेन गृहीतेनातेन, तथा समुच्चयार्थः, त्रिविधेन त्रिप्रकारेण लाघवेन गुरुत्वप्रतिपक्षिणोपधिशरीरेन्द्रियाभिधानेन, तत्रोपधिलाघवमत्यर्गलोपकरणं न ग्राह्यम् । शरीरलाघवं तु दुग्धद्रव्यादिभिः शरीरं नातीव प्रीणनीयम् । इन्द्रियलाघवं तु रागद्वेषाकरणतः शब्दादौ विहर्तव्यम् । इति सार्धगाथाद्वयार्थः॥

व्यतिरेके सार्धगाथाद्वयेन दोषानाह -

एवन्नहा उ करणे आणाभंगा व हुंति ॥ १२९ ॥

पोरिसीदुयस्स भंगो बीयं ओसन्नपासपढणं तु ।
तइयं मिच्छावाओ तुरियमगीयाण सिस्साणं ॥ १३० ॥

सुबहूणवि एगागित्तणं तु तंमि य हवंति जे दोसा ।
ते सव्वे चिय सूरिस्स हुंति अनिवारियप्पसरा ॥ १३१ ॥

व्याख्या—पौरुषीद्वयस्योक्तलक्षणस्य भङ्गोऽभावः एक आज्ञाभङ्गः, उत्तरत्र द्वितीयभणनाल्लभ्यते । द्वितीयमाज्ञाभङ्गकरणमवसन्नपार्श्वपठनं शिथिलसमीपसिद्धान्तादिश्रवणम् । तु पूरणे । तृतीयं मिथ्यावादः—असत्यभणनम् , अमासकल्पे मासकल्पवादात् । तुरीयं चतुर्थमगीतानां सूत्रार्थानभिज्ञानानां शि-

ष्याणां विनेयानां सुबहूनामपि प्रभूतानां न केवलमेकस्य इत्यपिशब्दार्थः। एकाकित्वमेवासहायता। तुरेवकारार्थः। तस्मिन् पुनरेकाकित्वे भवन्ति जायन्ते ये निर्दिष्टस्वरूपा दोषाः दूषणानि ते दोषाः सर्वे एव समस्ताः सूरेराचार्यस्य भवन्ति अनिवारितप्रसरा अनिषिद्धोदयाः। ते च " एगस्स कउ धम्मो "-इत्यादिगाथातोऽवसेयाः। इति सार्द्धगाथाद्वयार्थः॥

सूत्रेण कृतसंबन्धां गाथामाह

किंच-तुच्छे गासच्छायणकज्जे जंपंति सावयजणस्स।
सुबहुंपि न उण सिस्साण बालिसा पोरिसिदुगं तु॥१३२॥

व्याख्या—किंचेत्यभ्युच्चयार्थः तुच्छे अल्पे एकभवोपकारकारित्वात्, ग्रासाच्छादनकार्ये आहारवस्त्रनिमित्त कथयन्ति श्रावकजनस्य श्राद्धलोकस्य सुबह्वपि प्रचुरतरं न पुनर्नैव शिष्याणां निजविनेयानां बालिशा अज्ञा पौरुषी-द्वयं प्रसिद्धं तुः पूरणे इति गाथार्थः॥

ननु ते यद्येवं भणिष्यन्ति न वयं शास्त्राण्यवगच्छामः ततोऽवसन्नसमीपे विनेयान् पाठयामः, किमत्रासङ्गतमित्याह—

ससमयंमि परसमयंमि सयंपि जइ नो हवन्ति गहियत्था।
ता अच्छंतु चिरंपि हु असढा जा हुंति पत्तट्ठा॥१३३॥

व्याख्या—स्वसमयपरसमये आत्मीयेतरराद्धान्ते स्वयमप्यात्मना न केवलं शिष्या इत्यपिशब्दार्थः। यदि नो नैव भवन्ति जायन्ते गृहीतार्था अवगताभिधेयास्ततः तिष्ठन्तु, आसतां चिरमपि सामाधिकं, पूर्वोक्तम्, हुःपूरणे। अशठा अमायिनः, अन्यथा चोक्तं पञ्चकल्पे—

" उग्गमसाइदोसा असेवमाणो विसोउमावन्नो।
जम्हा दोसाययणउरंमि ठावेतु सो वसई॥

पन्नरसुग्गमदोसा दस एसणदोस एए पणुवीसं।
संजोयणा य पच य एए तीसं तु अवराहा॥

एएहिं दोसेहिं जइ असंपत्ति लग्गइ कहवि ।
दिवसे दिवसे सो खलु कालाइए वसंतो उ ॥ ३ ॥

तथा चूर्ण्या—" जो पुण निक्कारणे अच्छइ अइरेगं उरेण वा निग्गच्छइ सो पासत्थाइठाणेसु वट्टइ, तं च पासत्था ठाणसंकिलिट्ठं जिणवुत्तं थेरेहिय" इत्यादि। जा (यावद्) हवंति जायन्ते पत्तट्ठत्ति प्राप्तार्था गीतार्था इति यावद् इति गाथार्थः ॥

ननु किमेवं विहारकरणे कोऽपि गुणो न विद्यते ? इत्याह—

इय करणेवि हु कोइ गुणो भवे जइ न ते उ इ य विंति ।
अन्ने नीयाइगुणा वयं पुणो मासकप्पत्था ॥ १३४ ॥

व्याख्या—इतीत्थक गीतार्थविधानेऽपि न केवलं सिद्धान्तोक्तकरणे इत्यपेरर्थः। हुः पूरणे। कोऽपि स्तोको गुणो विशुद्धिकारको भवेज्जायेत यदि न नैव पूर्वोक्तविहारिण इत्येवं ब्रुवन्ति प्रतिपादयन्ति । किम् ? इत्याह—अन्ये अस्माद्व्यतिरिक्ता नीत्यादिगुणाः सूत्रत्वाद नित्यवासपार्श्वस्थादि-गुणाः 'वयं पुनः मासकल्पस्था उद्युक्तविहारिण इति गाथार्थः ॥

ननु यदि त एव कथयन्ति, ततः कथयन्तु । कोऽत्र दोषः ? इत्याह—

जं संपन्नगुणोवि हु संपुन्नगुणेसु कुणइ अप्पाणं ।
तस्स हु संमत्तं पि हु निस्सारं होइ किं बहुणा ॥ १३५ ॥

व्याख्या—यस्मादसंपूर्णगुणोऽपि असंपूर्णगुणोऽपि न केवलं सगुण इत्यपिशब्दार्थः। हुरवधारणे। संपूर्णगुणेषु सुसाधुषु करोति विदधाति आत्मानं स्वं तस्यासंपूर्णगुणस्य संपूर्णगुणात्मख्यापकस्य सम्यक्त्वमपि दर्शनमपि न केवलं ज्ञानचारित्रे। हुकारः पूर्ववत् । निस्सारं तुच्छं भवति जायते, किं बहुना जल्पितेनेति शेषो दृश्यः। अस्यार्थे संवादो 'गुणहीणो गुणरयणायरेसु' इत्यादिगाथातोऽवसेयः। इदमत्र हृदयम्—यावदनुष्ठानं क्रियते तावत्कथ्यते, शेषस्य श्रद्धानं शुद्धप्ररूपणं च विधीयते, अन्यथा महाननर्थः। यत उक्तं व्यवहारे

" उम्मयदेसणाए संतस्स छायणाए मग्गस्स ।
बंधइ कम्मरयमलं जरमरणमणंतयं घोरं ॥–"

इति मत्वा ' मासकल्पानुष्ठानाकरणे मासकल्पविहारिणो वयम् ' इति न युज्यते संसारभीरूणां वक्तुम् । इति गाथाभावार्थः ॥

ननु यदि विहारः कर्तुं न शक्यते तत इत्थं वसतिसंक्रमोऽस्तु इत्याह–

मुद्धजणविप्पयारणमेत्तं वसहीए संकमोवि इमो ।
जइ नो अडंति तेसुं गिहेसु तो होज्ज सहलो सो ॥१३६॥

व्याख्या मुग्धजनविप्रतारणमात्रं प्राकृतलोकहृदयावर्जनार्थं वसतेरगारस्य संक्रमोऽप्यन्यवसतिगमनव्याजेन तत्कृत विहरणमित्यपिशब्दार्थः, अयं मुग्धजनप्रतीतः । ननु किं सर्वथापि साधूनां वसतिसंक्रमः सफलो न भवति ? इत्याह–यदि नो नैव अटन्ति गच्छन्ति तेषु गृहेषु येषु प्रथममासकल्पे आहारादि गृहीतं ततो भवेद् जायेत सफलः श्रेयान् स मासमंक्रमः । विहारो हि गृहस्थप्रतिबन्धनाहारशुद्धिर्माभूदिति विधीयते, इत्थमकरणे तदवस्थित एव स दोषः । इति गाथार्थः ॥

अत्रैवार्थेऽभ्युच्चयमाह—

खेत्तासईए रोहाइएसु तह वुड्ढवासकाले य ।
संकमकरणं भणियं जहा तहा नेय तं जुत्तं ॥ १३७ ॥

व्याख्या—' खेत्तासईए'त्ति । क्षेत्राभावे मासकल्पादियोग्यग्रामाद्यभावे रोधादिकेषु, तत्र रोधः परचक्रेण नगरवेष्टनम्, आदिशब्दान्मार्गादौ अस्वास्थ्याग्रहः, । तथा वृद्धवासकाले च वक्ष्यमाणे च संक्रमकरणमन्यान्यवसतिगमनलक्षणं भणितमुक्तं व्यवहारादिषु । तत्र हि क्षेत्राद्यभावे एकत्र निवासे नववसतयो न चाहारार्थं, गृहपङ्क्तयश्च ऋतुबद्धवर्षाकालार्थं भणिताः, तदभावे एकैकहानिक्रमश्चोभाभ्यां भणितः । स च विशेषतो व्यवहारादवसेयः । यथा तथा स्वाभिप्रायेण नैव नच तत्संक्रमकरणं युक्तं संगतम् इति गाथार्थः ॥

एवमवगते जीवोपदेशमाह—

निद्धारिऊण मा किंपि कहसु सड्ढाण दुव्वियड्ढाणं ।
कज्जाकज्जविभागो दुन्नेओ मंदबुद्धीहिं ॥ १३८ ॥

व्याख्या—निर्द्धार्य पृथक्कृत्य, मा निषेधे, किमपि स्तोकमपि कथय जल्प श्राद्धानां श्रावकानां दुर्विदग्धानां पल्लवग्राहिणां कार्याकार्यविभागो विधेयाविधेयविच्छित्तिर्दुर्ज्ञेयो दुरवगमो मन्दबुद्धिभिः स्वल्पमतिभिः । इति गाथार्थः ॥

पूर्वोक्तस्यार्थस्य संवादार्थं व्यवहारगाथाः प्रतिपादयन् तत्संबन्धार्थं गाथामाह--

सामन्नेणं भणियन्ति जइ न रोयंति दुव्वियड्ढाओ ।
तो पयडं चिय साहसु इमाहिं ववहारगाहाहिं ॥ १३९ ॥

प्रकटार्था ।

ताश्च इमाः—

वुड्ढस्स उ जो वासो वुड्ढिं व गओ उ कारणेणं ति ।
एसो उ वुड्ढवासो तस्स उ कालो इमो होइ ॥ १३८ ॥

अंतो मुहुत्तमित्तं जहन्नमुक्कोसपुव्वकोडीओ ।
मुत्तुं गिहिपरियागं जं जस्स व आउयं निग्थे ॥ १४० ॥

जंघाबले व खीणे गेलन्नमहायया व दुब्बले ।
पडिवन्नउत्तिमट्ठे निप्फत्ति चेव तरुणाणं ॥ १४१ ॥

व्याख्या—वृद्धस्य स्थविरस्य तुः पूरणे यो वासो निवसनं वृद्धिं वा दीर्घकालावस्थितिलक्षणां गतः प्राप्तः तुः पूर्ववत् कारणेन वक्ष्यमाणेन एष निर्दिष्टस्वरूपो वृद्धवासः, तस्य पुनः वृद्धावासस्य कालोऽग्रे वक्ष्यमाणो भवति जायते । अन्तर्मुहूर्तकालः प्रतीतः, जघन्यः सर्वस्तोकः । उत्कृष्टस्तु प्रभूतः पूर्वकोटीः तुस्तथैव । प्रकारान्तरेण उत्कृष्टस्वरूपमाह—मुक्त्वा परिहृत्य गृहपर्यायमगार-

वासलक्षणं यदनिर्द्धारितस्वरूपं यस्य वा तीर्थकृत आयुष्कं जीवितं तीर्थे प्रतीत तद्वृद्धवासमानमुत्कृष्टम् । कारणवृद्धावासमाह—जङ्घाबले जानुसामर्थ्ये, वाशब्दः समुच्चये, स च प्रत्येकं सर्वद्वारेषु दृश्यः, क्षीणे भ्रष्टे तरुणवयसोऽपि वृद्धावासं जानीयाद् एवं सर्वत्र योज्यम् । ग्लानत्वे रोगप्रादुर्भावे असहायतायां वा साध्वभावे, दौर्बल्ये दुष्कालादौ आहाराद्यप्राप्त्या बलाभावे, उत्तमार्थे अनशने प्रतिपन्नः स्थितो निष्पत्तिं सूत्रार्थाभिज्ञतां चैव शब्दः समुच्चयार्थः तरुणानां स्वशिष्याणां करोति । इति गाथात्रयार्थः ॥

प्रस्तुतोपयोगिद्वारव्याख्यानार्थं गाथार्द्धमाह—

निप्फत्ती तरुणाणं अंतिमदारस्स विवरणं तत्थ ।

व्याख्या—निष्पत्तिं गीतार्थानां तरुणानां शिष्याणामिति अन्तिमद्वारस्य विवरणं व्याख्यानं तत्र व्यवहारे ॥ इति गाथार्थः ॥

तदक्षरैरेवोत्तरार्धमाह—

आयपरे निप्फत्ती कुणमाणे यावि अच्छेज्जा ॥

व्याख्या— आत्मनः स्वस्य परस्य वा शिष्यादेर्निष्पत्तिं कोविदतां कुर्वाणश्चापि विदधानः 'अच्छेज्ज'त्ति तिष्ठेत् पूर्वोक्तकालमानं 'बारस वासे' त्यादिकं वसेद् । अत्र च यत्पूर्वार्द्धे उक्तम् ' अन्तिमदारस्स विवरणं ' इति तद् गाथापेक्षया समवसेयम् , अन्यथा तत्र द्वितीयेयं गाथा—

> " खित्ताणं च अलंभे कयसंलेहे व तरुणपडिकम्मे
> एएहिं कारणेहिं वुड्ढावास वियाणाहि ॥ "

पश्चितेऽस्यार्थः —क्षेत्राणां मासकल्पादियोग्यानामलंभेऽप्राप्तौ कृतसंलेखे विहिततपोदेहकृशतायामनशनार्थं तरुणप्रतिकर्मणि मान्योत्तीर्णसाधुबलोपचये चवाशब्दौ समुच्चयार्थौ । एतैः पूर्वोक्तैः कारणैर्हेतुभिर्वृद्धावासं दीर्घकालवसनं विजानीहि अवगच्छ इत्युत्तरार्धम् ।

' न चैवं मासकल्पस्य भवन्मते व्युच्छेदो न ' इत्याह—

मासाइ विहारो पुण गीयत्थाणं वन्निओ समये ।
एतोच्चियभणियमिणं गीयत्थस्सेव य विहारो ॥१४२॥

प्रतीतार्था ॥

तथा चोक्तम्—

गीयत्थो य विहारो बीओ गीयत्थमीसओ भणिओ ।
एत्तो तइयविहारो नाणुन्नाओ जिणिंदेहिं ॥ १४३ ॥

इत्यादिमासकल्पविचारो द्वाविंशोऽधिकारः ॥

इदानीं त्रयोविंशमाह —

सुत्तगदेससमेगे वेत्तुं जंपंति असुणियविहाया ।
उज्जलवेसो सूरीण सव्वया होइ सव्वेसिं ॥ १४४ ॥

व्याख्या–सूत्रैकदेशं सिद्धान्तविभागं ' आयरियगिलाणाणं मइला पुणोवि धोव्वंति । इत्यादि लक्षणमेकं केचन, गृहीत्वा स्वीकृत्य, जल्पन्ति वदन्ति, असुणितविभागा अज्ञाततद्विशेषाः, उज्ज्वलवेषो निर्मलवस्त्रधरणम्, सूरीणामाचार्याणाम्, सर्व्वदा नित्यम्, भवति जायते, सर्व्वेषां समस्तानाम्, इति गाथार्थः॥

अत्रोत्तरमाह—

तं पि न सव्वाणं पि हु जम्हा ववहारभणियमेवं तु ।
पयडियविहायमग्गं विउडियमंदमइपसरम् ॥ १४५ ॥

व्याख्या-तदपि सर्व्वदोज्ज्वलवेषधारणमपि न केवलं पूर्व्वोक्तमित्यपि शब्दार्थः, न इति निषेधे, सर्व्वेषामपि सकलसूरीणाम्, हुः पादपूरणे, यस्माद्, व्यवहारे भणितं छेदग्रन्थोक्तम्, एवमित्थम्, इति वाक्यसमाप्तौ, प्रकटितविभागमार्गं दर्शितनयत्वम्, विकुटितमन्दमतिप्रसरं चूर्णिततुच्छशेमुषीकबुद्धिप्रागल्भ्यम्, इति गाथार्थः ॥

तदेव गाथाद्वयेनाह—

भत्ते पाणे धोवणपसंसणाहत्थपायसोए य ।
आयरिए अइसेसो अणइसेसो अणायरिए ॥ १४६ ॥

एए पुण अइसेसे उवजीवइ न वावि कोवि ।
दढदेहो निदरिसणं एत्थ भवे अज्जसमुद्दा य मंगूय ॥ १४७ ॥

व्याख्या–भक्त शोभनं भक्तं, विभिन्नस्थाने आनेतव्यम्, ' पाणेत्ति ' पानीयं शुद्धम्, तथैव ' धोवणंति ' वस्त्राणां धावनम्, प्रशंसनं श्लाघा तद्गुणानाम्, हस्तपादशौचं करचरणमलप्रक्षालनम्, चः समुच्चये, आचार्ये सूरौ, अतिशेषा अतिशया भवन्ति, एत इत्यध्याहारः, अनतिशेषा अनतिशया भवन्ति, अनाचार्ये सामान्यसाधौ । एतान्, पुनरतिशेषान्, उपजीवेत सेवेत, न वापि नैव कोऽपि कश्चित्, दृढदेहो बलिष्ठसंहननः, सूरिरित्यध्याहारः, निदर्शनं दृष्टान्तः, अत्र अतिशयधारणे, भवेज्जायेत, आर्यसमुद्राः मङ्गुः, एतन्नामानः सूरयः, बहुवचनं चात्र पूज्यत्वात्, चकारावत्र समुच्चयार्थौ, इति गाथाद्वयार्थः । भावार्थस्तु कथानकादवसेयस्तच्चेदम्—

किल भृगुकच्छे नगरे आर्यसमुद्रमङ्ग्वभिधानौ सूरी विहरन्तौ समागतौ । तत्र प्रथमो दृढसंहननो द्वितीयस्तु न तथेति । ततो द्वितीयः सर्वानाचार्यातिशयानुपजीवति, प्रथमस्तु नेति । इतश्च तत्रैव पुरे साकटिकवैकटिकौ यथार्थाभिधानौ श्रावकौ स्तः । तौ चान्यदा आर्यसमुद्राचार्यमभिवन्द्य सन्देहान् प्रपृच्छतुः–" भगवन् ! किमिति भवन्त आचार्यातिशयान्न कुर्वन्ति, मङ्गुसूरयस्तु कुर्वते" । ततस्तैरवदातविदितजिनवचनैर्मत्सररहितैः प्रोचे–" अत्र भवद्भ्यामेव दृष्टान्तः । यथाहि–दृढशकटस्य दृढविकटभाजनस्य च परिकर्म्म च परिकर्माङ्गबन्धनादिकं न क्रियते दृढेनरस्य तु भवद्भ्यां क्रियते । एवमावयोरपि । तथाहि–मम शरीरं दृढं प्रायोग्यादिरहितमपि संयमं कर्त्तुमुत्सहते, इतरस्य तु न । इत्यसौ सर्वदा ता-

नुपजीवति । इति श्रुत्वा तु विगतसन्देहौ स्वस्थानं गतौ, इति ॥

इत्थं स्थिते जीवोपदेशमाह—

मलमइलवत्थदेहाण भावकप्पूरपूरपुन्नाणं ।
दढदेहाणं सूरीण भणसु मा किंपि पडिकूलं ॥ १४८ ॥

व्याख्या—मलमलिनवस्त्रदेहानां रजोविच्छायवसनशरीराणाम्, भावकर्पूर-परमार्थघनसारः संयम एव जीवसौरभ्यकर्तृत्वेन तस्य पूरः संघातस्तेन पूर्णा भृता पुण्या वा पवित्रास्तेषां, दृढदेहानामुत्तमसंहनतानाम्, सूरीणां प्रभूणाम्, भण ब्रूहि: मेति निषेधे, किमपि न केवलं बह्वित्यपरर्थः, प्रतिकूलमुत्कण्ठम्, इति गाथार्थः ॥

सूरिमलधरणविचारस्समाप्तस्त्रयोविंशोऽधिकारः ॥

इतश्चतुर्विंशतितमः प्रारभ्यते—

अमुणियमुणीणचरणा केइ मज्जण्हकालसमयंमि ।
इत्थीण केवलाणं कहिंति धम्मं भवाभिरया ॥ १४९ ॥

व्याख्या—अमुणितमुनीनचरणा अविदितयतीशचारित्राः, केऽप्येके, मध्याह्न-कालसमये प्रहरद्वयोर्ध्वम्, कथयन्ति प्रतिपादयन्ति, धर्मं श्रुतधर्मादिकम्, किं वि-शिष्टाः ? भवाभिरताः संसारसक्ताः, इति गाथार्थः ॥

एतदपि न सङ्गतमित्याह—

सिद्धन्तामयपडिपुन्न कन्नपुडयाण संमयं नेयं ।
जम्हा इय कहणंमी एए दोसा पसज्जंति ॥ १५० ॥

व्याख्या—सिद्धान्तामृतप्रतिपूर्णकर्णपुटकानां आगमसुधासंभृतश्रवणच्छद-पत्राणाम्, संमतमभिप्रेतम्, नेति निषेधे, इदमित्थं धर्मकथनम्, यस्माद्, इत्येवम्, कथने प्रतिपादने, एते वक्ष्यमाणाः, दोषा दूषणानि, प्रसज्यन्ते प्रादुर्भवन्ति, इति गाथार्थः ॥

तानेवाह—

इत्थिकहा उ अगुत्ती अकालचारित्तणं तहा संका ।
पलिमंथो तह दसकालियंमि अन्नं इमं भणियं ॥ १५१ ॥

व्याख्या—स्त्रीषु—केवलनारीषु कथा—धर्मकथनमिदं चोत्तराध्ययने द्वितीयव्याख्याने कथितम्, तुः समुच्चये, अगुप्तिः प्रत्यहं तदिन्द्रियदर्शनतो ब्रह्मचर्यारक्षा, अकालचारित्वं अप्रस्तावागमनत्वं, नहि तासां मध्याह्ने केवलानां यत्युपाश्रये आगमे आगमनमनुज्ञातम्, तथा समुच्चयार्थः, शङ्का सन्देहो नूनं प्रत्यहमेव गमने किमप्यकार्यमेताः करिष्यन्तीत्येवं मन्दमतिचिन्तनरूपा, पलिमन्थः स्वकार्यव्याघातः साधूनाम्, तथा परम्, दशवैकालिके समयप्रसिद्धे, अन्यदपरम्, इदं वक्ष्यमाणम्, भणितमुक्तम्, इति गाथार्थः ॥

तदेव श्लोकपञ्चकेनाह —

विभूसा इत्थिसंसग्गी पणीअं रसभोयणं ।
नरस्सत्तगवेसिस्स विसं तालउडं जहा ॥ १५२ ॥

जहा कुक्कुडपोयस्स निच्चं कुललओ भयं ।
एवं बंभयारिस्स इत्थीविग्गहओ भयं ॥ १५३ ॥

हत्थपायपडिच्छिन्नं कन्ननासविगप्पियं ।
अवि वाससयं नारिं बंभचारी विवज्जए ॥ १५४ ॥

अंगपच्चंगसंठाणं चारुल्लवियपेहियं ।
इत्थीणं तं न निज्झाए कामरागविवड्ढणं ॥ १५५ ॥

चित्तभित्तिं न निज्झाए नारिं वा सुअलंकियं ।
भक्खरं पिव दट्ठूणं दिट्ठिं पडिसमाहारे ॥ १५६ ॥

सर्व्वा अपि प्रकटार्था ।

यत एवमत आह—

एत्तो च्चिय केइ पुव्वसूरिणो मोक्खसोक्खतल्लिच्छा ।
आसीसंपि हु दिंता अहोमुहाए व दिट्ठीए ॥ १५७ ॥

व्याख्या—एतस्मादेव कारणात् केऽपि पुण्यभाजः पूर्व्वसूरयश्चिरन्तनाचार्या मोक्षसौख्यतल्लिप्सवो निर्वाणसातैकनिष्ठा आशिषमपि धर्म्मलाभमपि शेषः,न केवलं धर्म्मकथामित्यपिशब्दार्थः, हुः पूर्व्ववत् ; अदुर्दत्तवन्तः श्राविकाणा मितिशेषः अधोमुखया न्यग्भूतवक्त्रया दृष्ट्या लोचनेनेति गाथार्थः ॥

अत्रापि जीवानुशिक्षामाह—

सिद्धिवधूवरसुहसंगलालसो जीव जइ तुमं ता मा ।
कहसु तुमं जिणधम्मं अकालचारीसु इत्थीसु ॥ १५८ ॥

सिद्धिवधूवरसुखसङ्गलालसो मुक्तिकान्ताप्रधानसाताभिष्वङ्गलम्पटो जीव प्राणिन् ! यदि त्वं भवान् तस्माद् मा निषेधे, कथय वद जिनधर्म्मं सर्वज्ञवृषं, अकालचारिणीषु अप्रस्तावागतासु स्त्रीषु नारीषु इति गाथार्थः ॥

केवलस्त्रीव्याख्यानकथनश्चतुर्विंशतितमोऽधिकारः

साम्प्रतं पञ्चविंशमाह—

मुद्धजणहियसंठियदंसणवररयणलूडणसयण्हा ।
अन्नायसाहुसावयजोगा अन्ने भणंतेवं ॥ १५९ ॥

मुग्धमतिः स्वल्पमतिर्यो जनो लोकस्तस्य हृदयं मानसं तत्र संस्थितमाश्रितं दर्शनं सम्यक्त्वं तदेव वररत्नं प्रधानमाणिक्यं तस्य 'लूडणं' देशीभाषयाऽपहरणं तत्र सतृष्णा बद्धाग्रहा अज्ञातसाधुश्रावकयोगाः—अविदितयतिश्राद्धव्यापारा भणन्ति जल्पन्त्येवं वक्ष्यमाणनीत्या । अयमाशयः—वक्ष्यमाणकथनेऽपि मुग्धश्रावकाणां दर्शनपक्षपाताभावेन सम्यक्त्वभ्रंशो भवतीति गाथार्थः ॥

तदेवाह—

पासत्थाई सावयजणस्स नो होंति वंदणिज्जाउ ।
तं नो, जम्हा कत्थइ नो दीसइ भणियमेवेति ॥ १६० ॥

व्याख्या—पार्श्वस्थादयः समयप्रसिद्धाः श्रावकजनस्य श्राद्धलोकस्य नो नैव भवन्ति जायन्ते वन्दनीया नमस्कर्तव्याः । तुः पूरणे, तद्वन्दनाकरणं नो नैव, यस्मात्कुत्रापि कस्मिंश्चिदपि शास्त्रे नो दृश्यते नावलोक्यते भणितमुक्तम्, एवं पूर्वोक्तप्रकारेण, इतिर्वाक्यसमाप्ताविति गाथार्थः ॥

यद्भणितं तत्पूर्वपक्षं गाथाद्वयेनाह—

वंदावंदविभागो संविग्गेयरजईण सव्वत्थ ।
जं पुण दंसणसत्तरिवयणं भणिगं न तस्सत्थि ॥ १६१ ॥

अंगेसु तह अणंगेसु छेयग्गंथेसु पयरणेसु च ।
संवाओ ता कह तं भवे पमाणं पमाणीणं ॥ १६२ ॥

व्याख्या—वन्द्यावन्द्यविभागो नमस्करणीयानमस्करणीयविशेषो भणितः संविग्नेतरयतीनां-सुविहितेतरसाधूनां सर्व्वत्र सर्व्वस्मिन सूत्रे इति शेषः । यत्पुनर्दर्शनसप्तिकावचनं-तन्नामप्रकरणगदित " समणाण सावयाण य अवंदणिज्जा जिणमयंमि " इत्यादिलक्षणं न नैव तस्य सप्ततिकाभणितस्यास्ति विद्यते अङ्गेषु आचारादिषु अनङ्गेषु औपपातिकादिषु छेदग्रन्थेषु निशीथशास्त्रादिषु प्रकरणेषु उपदेशमालादिषु, चः समुच्चये संवादस्तत्सदृशभणनं, तस्मात् कथं केन प्रकारेण तत्सप्ततिकाभणनं भवेज्जायेत प्रमाणं व्यवस्थापकं प्रमाणिनां यथावस्थितवस्तुवेदिनाम् । इति गाथार्थः ॥

किम् ? इत्यत आह—

पयरणवयणं जम्हा संवइयं खलु भवे प्रमाणमिहं ।
सिद्धंत वयणेहिं नो इहरा अइपसंगाओ ॥ १६३ ॥

व्याख्या—प्रकरणवचनमर्वाचीनसाधुविरचितं शास्त्रं यस्मात् संवदितमेवावितथं, खलुरवधारणे, स च योजित एव भवेज्जायेत प्रमाणं व्यवस्थापकम्, इह मौनीन्द्रप्रवचने अनुस्वारः पूर्व्ववत् सिद्धान्तवचनैरागमभणितैः,

नो नैव, इतरथा संवादाभावे, कुतः ? अतिप्रसङ्गात् स्वाभिप्रायवशतोऽन्यथा चान्यथाकरणतो अनवस्थान इति गाथार्थः ॥

अथ यतिवच्छ्रावकाणामपि दृश्यं तदित्याह—

जइ जइकिच्चं सव्वंपि सावयाणंपि हुज्ज करणीयं ।
तो इक्को चिय धम्मो हवेज्ज दुविहो विरुज्झिज्जा ॥ १६४ ॥

व्याख्या—यदीत्यभ्युपगमे, यतिकृत्यं साध्वनुष्ठानं सर्व्वमपि निःशेषं श्रावकाणामपि श्राद्धानां, न केवलं यतीनामित्यपिशब्दार्थः भवेज्जायेत करणीयं कृत्यं तत एक एव धर्म्मो भवेत्, द्विविधो द्विप्रकारो विरुध्येत विघटेतेति गाथार्थः ॥

अत्रैवार्थे कारणान्तरमाह—

तह संपुन्नगुणोवि हु न वदिओ वज्जपाणिणा भरहो ।
तो नज्जइ सड्ढाणं वेसो चिय होइ नमणीओ ॥ १६५ ॥

व्याख्या—तथाऽभ्युच्चयार्थः, संपूर्णगुणोऽपि सुविशुद्धज्ञानादिरपि हुः पूरणे, न वन्दितो न नमस्कृतो वज्रपाणिनेन्द्रेण भरतः प्रथमचक्री वेषरहित इति शेषः, तस्माद् ज्ञायते बुध्यते श्राद्धानां श्रावकाणां वेष एव रजोहरणादिको भवति जायते नमनीयो वन्द्य इति गाथार्थः ॥

सूत्रकृतसम्बन्ध गाथाद्वयमाह —

किंच जइ सावयाणं नमणं नो संमयं भवे एयं ।
पासत्थाईयाणं ता कह उवएसमालाए ॥ १६६ ॥

सिरिधम्मदासगणिणा न वारिअं वारियं च अन्नेसिं ।
'परतित्थियाणं पणमण' इच्चाइवयणओ पयडं ॥ १६७ ॥

व्याख्या—किञ्चाभ्युच्चये, यदि विकल्पार्थः, श्रावकाणां श्राद्धानां वन्दनं नमनं नो नैव सम्मतं भवेज्जायेत एतत्पूर्वोक्तम्, केषाम् ? इत्याह—पार्श्व-

स्थादीनां प्रतीतानां, ततः कथं केन प्रकारेणोपदेशमालायां श्रीधर्म्मदासगणिना एवंनाम्ना कर्त्रा न वारितं निषिद्धं, वारितं पुनर्निषिद्धमन्येषां शाक्यादीनां परतीर्थिकानां प्रणमनमित्यादिवचनतः प्रकटं प्रसिद्धम्, आदिग्रहणात् " उज्झावणत्थुणणभत्तिरागं व सक्कारं सम्माणदाणं विणयं च वज्जेइ इति दृश्यं सुबोधं चेति गाथार्थः ॥

पराभिप्रायमाशङ्कयाह—

आलावो संवासो इच्चाईयं तु मुणिजणस्सेह ।
एवं नो जइ तो तेवि पुव्वभणिया उ पासत्था ॥ १६८ ॥

व्याख्या—आलापः स्तोकभणनं, संवासस्तु एकत्रनिवसनमित्यादिकं पुनर्मुनिजनस्यैव साधुलोकस्यैव; तेन हि तेषां निष्कारणं न कर्तव्यं वन्दनादिकम् कारणे तु कर्तव्यमिति प्रागेव चर्चितम् । आदिग्रहणेन " वीसंभो संथवो पसंगो य हीणायारेहिं समं सव्वजिणिंदेहिं पडिकुट्ठो ।" इति दृश्यम् । तथा च तत्रोक्तं बलाद्यतिर्व्याकुलीभवतीति । किञ्चेतः " श्रावकधर्म्मं वक्ष्ये " इति भणता वृत्तिकृता भिन्नाधिकारिता दर्शिता । " स च वंदइ पडिपुच्छइ—" इत्यादिगाथाभिरुक्तः सूत्रे, एवमित्थं नो नैव यदि, ततस्तेपि य एवं प्रतिपादयन्ति पूर्व्वभणितान " सुत्तत्थपोरिसी न करेइ "—इत्यादिकात् द्वितीयेऽधिकारे पार्श्वस्थाः शिथिला उपलक्षणत्वादवसन्नादयश्चेति गाथार्थः ॥

ततः किमित्याह—

कं वंदंतु वराया धम्मत्थी सावया तओ तुब्भे ।
सयभमडियाउ मूढा अन्नेवि मा भमाडेह ॥ १६९ ॥

व्याख्या—कं साधुं वन्दन्तु नमस्कुर्व्वन्तु वराका अनुकम्पनीया धर्म्मार्थिनो धृपलम्पटाः श्रावकाः श्राद्धाः ? तस्मात् 'तुब्भे'त्ति यूयं स्वयमात्मना भ्रान्ता नष्टसद्बोधा मूढा ज्ञानविकला अन्यान् श्रावकादीन् 'मा' निषेधे ' भ्रमयत नष्टसद्बोधान्कुरुतेति गाथार्थः ॥

ननु यद्येवं ततः कोप्यवन्द्यो नास्ति इत्याह—

संघेण पुणो बाही जो विहिओ होज्ज सो उ नो वंदो ।
पासत्थाई सड्ढाण सव्वहा एस परमत्थो ॥ १७० ॥

व्याख्या—सङ्घेन प्रतीतेन पुनः बहिस्ताद्योऽनिर्दिष्टनामा विहितः कृतः भवेज्जायेत स पुनर्नो नैव वन्द्यो नमस्करणीयः पार्श्वस्थादिः प्रतीतः श्राद्धानां श्रावकाणां सर्व्वथा सर्वैः प्रकारैरेषो निर्दिष्टरूपपरमार्थस्तत्त्वमिति गाथार्थः ॥

सूत्रकृतसम्बन्धां गाथामाह—

किंच सिरिपंचकप्पे दव्वलिंगस्स धारणे भणिओ ।
एस गुणो सूरिहिं इमाहिं गाहाहिं पयडत्थो ॥ १७१ ॥

व्याख्या—किञ्चेत्यभ्युच्चये । श्रीपञ्चकल्पे छेदग्रन्थे द्रव्यलिङ्गस्य रजोहरणादेर्धारणे स्वीकारे भणित उक्त एष वक्ष्यमाणो गुणो लष्टत्वं सूरिभिस्तत्कारकैरिमाभिर्वक्ष्यमाणाभिर्गाथाभिश्छन्दोविशेषरूपाभिः प्रकटार्थोः निश्चिताभिधेय इति गाथार्थः ॥

ता एवाह—

एवं तु दव्वलिंगं भावे समणत्तणं तु नायव्वं ।
को उ गुणो दव्वलिंगे भन्नइ इणमो सुणसु वोच्छं ॥ १७२ ॥

सक्कारवन्दणनमंसणा य पूयणकहणा य लिंगकप्पम्मि ।
पत्तेयबुद्धमाई लिंगे छउमत्थओ गहणं ॥ १७३ ॥

दट्ठूण दव्वलिंगं कुव्वंते याणि इंदमाईवि ।
लिंगम्मि अविज्जंते न नज्जइ एस विरओत्ति ॥ १७४ ॥

पत्तेयबुद्धो जाव उ गिहिलिंगी अहव अन्नलिंगी वा ।
देवावि ता न पूए मा पुज्जं होहिइ कुलिंगा ॥ १७५ ॥

लिङ्गकप्पो पञ्चकल्पो भणितः, प्रकटार्थश्च, विशेषावश्यकेपि लिङ्गस्य पूज्यता सपूर्व्वपक्षोत्तरभणिता अमूभिर्गाथाभिः ।

" नणु मुणिवेसच्छन्ने निम्मीले वि मुणिबुद्धीए दिंतो।
पावइ मुणिदाणफलं तह किन्न कुलिंगदायावि ॥ "

आचार्यः—

" जं थाणं मुणिलिंगं गुणेण सुन्नंति तेण पडिमव्व ।
पुज्जं थाणमइएवि कुलिंगं सव्वहाजुत्तं ॥

परः प्राह—

नणु केवलं कुलिंगंवि होइ तं भावलिंगओवि -(आचार्य) न तओ ।
मुणिलिंगमंगभावं भवेज्जाइ जओ तेण तं पुज्जं ॥

एवं स्थिते जीवस्योपदेशमाह—

तित्थयरदंसणोवरि जइ जीव तुहत्थि निच्चला भत्ती ।
मुद्धाण सावयाणं ता मा लाएसु कुग्गाहं ॥ १७६ ॥

व्याख्या—तीर्थंकरदर्शनोपरि सर्व्वज्ञप्रवचनोपरिष्टात् यदि जीव तवास्ति निश्चला दृढा भक्तिरास्तिक्यं मुग्धानामृजुमतीनां तस्मान्मेति निषेधे 'लाएसु' विलगय सम्बन्धय कुग्राहं कुत्सितबोधं 'श्रावकैः पार्श्वस्थादयो न वन्द्या' एवंरूपं पूर्व्वंसाध्वपेक्षया मुख्यतो वन्दनं भणितमुक्तम्। अत्र तु श्रावकापेक्षयेत्यपौनरुक्त्यमिति गाथार्थः ॥

श्रावकाणां पार्श्वस्थादिवन्दनविचारः पञ्चविंशोऽधिकारः ॥

विग्गहविवायकज्जे अन्ने भिच्चव्व सावगजणस्स ।
निच्चं चिय ओलग्गं कुणंति नेयं वियाणंति ॥ १७७ ॥

व्याख्या—विग्रहविवादकार्ये, तत्र विग्रहो विरोधो विवादो वाककलहः, तन्निमित्तमन्येऽपरे भृत्या इव पदातय इव श्रावकजनस्य महर्द्धिकश्राद्धलोकस्य, उपलक्षणत्वात् भृत्यादीनांच नित्यमेव सर्वदा 'उलग्गं' ति सेवां कुर्व्वन्ति विदधति नो नैवेद च वक्ष्यमाणं विजानन्ति बुध्यन्ते इति गाथार्थः ॥

इदं न जानन्ति तद्गाथाद्वयेनाह—

विग्गहविवायरुइणो कुलगणसंघेण बाहिरकयस्स ॥
नत्थि किर देवलोगेवि देवसमिईसु ओगासो ॥ १७८ ॥

जइ ता जणसंववहारवज्जियमकज्जमायरइ अन्नो ।
जो तं पुणोवि मंथइ परस्स वसणेण सो दुहिओ ॥१७९॥

प्रतीतार्थे ॥

एतदपि युज्येत यद्येकमतीकर्तुं शक्येत जगदिति गाथार्द्धमाह—

नो सक्का काउं जे भुवणं सव्वंनुणावि एक्कमयं ॥

स्पष्टं, अतो जीवोपदेशं गाथार्द्धेनाह—

ता मा कलहं रे जीव कुणसु चिंतेसु अप्पाणं ॥ १८० ॥

सुबोधम् ॥

श्रावकसेवाविचार. पाडुंशोविकार. ॥

अधुना सप्तविंशतितमाह—

मुद्धजणछेत्तसुहबोहसस्सविद्दवणदक्खसमणीओ ।
ईईओ विय काओ वि अडंति धम्मं कहंतीओ ॥ १८१ ॥

व्याख्या—मुग्धजनाः स्वल्पबुद्धिलोकाः त एव क्षेत्राणि बीजवपनभूमयस्तेषु शुभबोधः प्रधानाशयः स एव सस्यं धान्यं तस्य विद्रवण विनाशकरणं तत्र दक्षाः पट्व्यः प्राकृतत्वाचात्र विभक्तिलोपः, श्रमण्यः आर्यिका ईतय इव तिड्डाद्या काश्चन न सर्वा अटन्ति ग्रामादिषु चरन्ति धर्मं दानादिकं कथयन्त्यो ब्रुवाणा इति गाथार्थः ॥

एतदपि निराकर्तुमाह—

एगंतेणं वि य तं न सुंदरं जेण ताणंपि पडिसेहो ।
सिद्धंतदेसणाए कप्पाट्ठिय एव गाहाए ॥ १८२ ॥

व्याख्या - एकान्तेनैव सर्व्वथा तद्धर्म्मकथनं न नैव सुन्दरं भव्यम्, येन तासां साध्वीनां प्रतिषेधो निराकरणं सिद्धान्तदेशनाया आगमकथनस्य। कया प्रतिषेधः ? कल्पस्थितयैव गाथयेत्यर्थः।

कल्पगाथामेवाह—

कुसमयसुईणमहणो विबोहओ भवियपुंडरीयाणं।
धम्मो जिणपन्नत्तो पकप्पजइणा कहेयव्वो ॥ १८३ ॥

व्याख्या—कुसमयश्रुतीनां कुसिद्धान्तमतीनां मथनो विनाशकः, विबोधको विकाशको भव्यपुण्डरीकाणां मुक्तियोग्यप्राणिशतपत्राणां, धर्म्मो दानादिको जिनप्रज्ञप्तो मुनीन्द्रगदितः प्रकल्पयतिना निशीथज्ञसाधुना कथयितव्यो न पुनः साध्व्येति हृदयमिति गाथार्थः ॥

ननु यदि तासां स दीयते, ततो निन्द्यं तद्धर्म्मकथनमित्याह—

संपइ पुणो न दिज्जइ पकप्पगंथस्स ताण सुत्तत्थो।
जइया वि य दिज्जंतो तइया विय एस पडिसेहो॥ १८४ ॥

व्याख्या- साम्प्रतमधुना पुनः नैव दीयते वितीर्यते प्रकल्पग्रन्थस्य निशीथस्य तासां- आर्यिकाणां सूत्रार्थः सूत्रेण पद्धत्या सहितोऽर्थोऽभिधेयः सूत्रार्थ उभयमिति हृदयम् , यदापि वा दीयते वितीर्यते स्म, तदापि च तस्मिन्नपि काले एष व्याख्यानकरणलक्षणः प्रतिषेधो निवारणमिति गाथार्थः ॥

अमुमेवार्थं दृष्टान्तपूर्व्वकं दर्शयन्नाह—

हरिभद्दधम्मजणणीए किंच जाइणिपवत्तिणीए वि।
एगो वि गाहत्थो नो सिट्ठो मुणियतत्ताए ॥ १८५ ॥

व्याख्या—सूचनात्सूत्रस्य हरिभद्रसूरिधर्म्मजनन्यापि धर्म्मदात्रीत्वेन प्रतिपन्नमात्रा किञ्चाभ्युच्चये याकिनीप्रवर्तिन्या एतन्नाममहत्तरया न केवलमन्याभिरित्यपि शब्दार्थः, एकोऽपि च गाथार्थोऽभिधेय आस्तां प्रभूत इत्यपेरर्थो नो नैव शिष्टः कथितो मुणिततत्त्वया ज्ञातपरमार्थया, तथा च " चक्किदुगं

हरि पणगम " इत्यादिगाथायाः स्वार्थं पृष्टा हरिभद्रभट्टेन, न च तया कथितः, इति सुप्रतीतोऽयमर्थः । इति गाथार्थः ॥

एवं ज्ञाते जीवोपदेशमाह—

बहु मन्नसु मा चरियं अमुणियतत्ताण ताण ता जीव ।
जइ संनिवारियाओ ता वारसु महुरवक्केण ॥ १८६ ॥

व्याख्या-बहु मन्यस्व भव्यमिदमिति मंस्थाः,मा इति निषेधे, चरितं धर्मकथनलक्षणम्, अमुणिततत्त्वानाम्, अविदितपरमार्थानाम्, तासाम्-आर्यिकाणाम्, तस्माज्जीव ! आत्मन् ! यदि विकल्पार्थः, तिष्ठन्ति संनिवारिताः निषिद्धाः, ततो वारय निषेधय, मधुरवाक्येन-कोमलवचसेति गाथार्थः ॥

इति आर्यिकाधर्मकथनवर्णनः सप्तविंशोऽधिकारः ॥

इत अष्टाविंशं गाथाद्वयेन आह—

नियगंतरायमगणिय एगे जंपंति कुगहगहगहिया ।
जिणपडिमाण पूया पुप्फाइएहिं कायव्वा ॥ १८७ ॥

वत्थाइएहिं नो पुण जेणं तं भक्खणे कोवि ।
पडिही भवंधकूवे अम्हनिमित्त इय मइए ॥ १८८ ॥

व्याख्या-निजकान्तरायमगणित्वा-अविभाव्य,एके केचन, मकारोऽलाक्षणिको, जल्पन्ति वदन्ति, अयमाशयः- एवं भणने महदन्तरायो भवति, किं विशिष्टाः ? कुग्रहग्रहगृहिताः कुबोधपिशाचस्वीकृताः । जिनप्रतिमानाम्, सर्वज्ञप्रतिकृतीनाम्, पुष्पादिभिः कुसुमवासादिभिः, [पूजा], कर्त्तव्या विधेया । वस्त्रादिकैः वसनालङ्कारादिभिर्नो नैव, पुनर्येन तत् द्रव्यभक्षणे वस्त्रादिवित्ताऽऽदाने, कोऽप्यनिर्दिष्टनामा, पतिष्यति गमिष्यति, भवान्धकूपे संसारविषमाऽवटे, अस्मन्निमित्तम् अस्मत्कारणम्, इति मत्या अनेन बोधेन, इति गाथाद्वयार्थः ॥

एतन्निराकरणार्थं गाथाद्वयेन आह—

आगममगुत्तिन्नो इय बोहो जेण सुविहियजणो वि ।
बहु मन्नइ सड्ढकयं वत्थाइपूयणं बहुहा ॥ १८९ ॥

सक्कारवत्तियाए वयणेणं सो उ वत्थमाइहिं ।
भणिओ तो तक्करणं तहाय ववहारउत्तं च ॥ १००॥

व्याख्या–आगममार्गोत्तीर्णः, सिद्धान्तपदवीभ्रष्टः, इत्येवम्, बाह्यो मतम्, येन सुविहितजनोऽपि सुसाधुलोकोऽपि, न केवलमन्यः, इत्यपेरर्थः, बहु मन्यते अनुमोदते श्राद्धकृतम्–श्रावकविहितम्, वस्त्रादिपूजनं वसनालङ्काराद्यभ्यर्चनम्, बहुधा--अनेकधा, 'सत्कारप्रत्ययम्' इत्यादिवचनेन, स पुनः सत्कारो वस्त्रादिभिः, मकारः पूर्ववत् भणितः उक्तः । तथा चोक्तम्—

मल्लाईएहिं पूया सक्कारो परमवत्थमाईहिं ।
अन्ने वि वज्झओ इह दुहा वि दव्वत्थओ एसो ॥

ततस्तत्करणं सत्कारविधानम्, तथा परं व्यवहारोक्तं च–छेदग्रन्थभणितम्, इति गाथाद्वयार्थः ॥

तदेवाह—

लक्खणजुत्ता पडिमा पासाईआ समत्त–लंकारा ।
पल्हायइ जह उ मणं तह निज्जरमो वियाणाहि ॥ १०१ ॥

व्याख्या–लक्षणयुक्ता परिपूर्णाङ्गादिसहिता, प्रासादिका द्रष्टारं द्रष्टारं प्रति प्रमोदजनिका, समाप्तालङ्कारा निःशेषभूषणा, प्रह्लादयति सुखयति, यथा येन प्रकारेण, तथा तेन प्रकारेण, निर्जरां कर्मह्रासलक्षणाम्. ओ--इति निपातः पादपूरणार्थः, विजानीहि बुध्यस्व । 'समत्तालङ्कारा' भणनाद् भवन्मतव्यवच्छेदः, इति गाथार्थः ॥

सूत्रेणैव विहितपालनां गाथामाह—

किंच जइ एव भीरू तुम्हे ता मा करेह चेइहरं ।
पडिमाओ पूयं पि हु होहिंति जओ इमे दोसा ॥ १०२ ॥

व्याख्या–किं च अभ्युच्चये. यद्येवमित्थम्–'अस्मन्निमित्तं कर्मबन्धो मा भवतु' इति भीरवो भयालवः, 'तुम्हे'त्ति यूयम्, ततो मा इति निषेधे, कुरुत विधत्त, चैत्यगृहं जिनमन्दिरम् । प्रतिमा जिनबिम्बानि. पूजामपि सपर्याम्, हुः

पूरणे, भविष्यन्ति–उत्पत्स्यन्ते, यतो–यस्माद्, अमी वक्ष्यमाणाः, दोषा दूषणानि, इति गाथार्थः ॥

तानेवाह—

भज्जिज्ज व अवणेज्ज व कोई तो तुम्ह कम्मबंधो उ ।
तम्हा बुज्झह पुन्नं पावं वा नियगपरिणामा ॥ १०३ ॥

व्याख्या- विनाशयेद्, अपनयेद्–स्थानान्तरे कुर्याद्, वाशब्दः समुच्चयार्थः–उपलक्षणत्वाद् मत्सरादिकं वा तदुपरि विदध्याद्, कोऽपि–एकः, ततः, तुम्हेत्ति युष्माकं भवताम, कर्मबन्ध एव ज्ञानावरणीयाद्युपश्लेषः, तुः–एवकारार्थः, भवन्निमित्तत्वादिति हृदयम् । तस्माद्, बुध्यध्वं जानीत, पुण्यं शुभकर्म, पापं –तद्विपरीतम, वा शब्दः समुच्चये, निजकपरिणामात स्वाभिप्रायाद् । इति गाथार्थः ॥

परिणाममेव व्यक्तीकुर्वन्नाह—

दिंतस्स पुन्नमउलं भक्खंतस्स य पुणो महापावं ।
कुसलेयरभावाओ एवं चिय जिणगिहाइसु वि ॥ १०४ ॥

व्याख्या–ददतः प्रयच्छतो भव्यस्य ' जिनाय वस्त्रादि ' इति शेषः, पुण्यं–शुभम, अतुल्यम–अनन्यसदृशम, भक्षयतश्च–पुनरश्नतः, महापापं–गुरुकिल्बिषम, कुशलेतरभावाद्–प्रधानाप्रधानान्तःकरणाद्, एवम–इत्थम, जिनगृहादिष्वपि–सर्वज्ञमन्दिर–प्रतिमादिकरणादिषु, इति गाथार्थः ॥

व्यतिरेकमाह—

जइ पुण तह कायव्वं जह दव्वं नेय होइ चेइहरे ।
ता कह सहलं वयणं एयं सिद्धंतसुपसिद्धं ॥ १०५ ॥

व्याख्या–यदि पुनस्तथा कर्तव्यम, यथा नैव भवति द्रव्यं चैत्यगृहे, ततः कथं सफलं--चरितार्थं वचनमेतद्–उपदेशपदपठितम, अर्थतः सिद्धान्तसुप्रसिद्धम? इति गाथार्थः ॥

तदेव गाथात्रयेणाह—

जिणपवयण--विड्ढिकरं पभावणं नाण-दंसणगुणाणं ।
रक्खंतो जिणदव्वं परित्तसंसारिओ होइ ॥ १०६ ॥

जिणपवयण--विड्ढिकरं पभावणं नाण--दंसणगुणाणं ।
वड्ढिंतो जिणदव्वं तित्थयरत्ताइअं लहइ ॥ १०७ ॥

जिणपवयण--विड्ढिकरं पभावणं नाण--दंसणगुणाणं ।
भक्खंतो जिणदव्वं अणंतसंसारिओ होइ ॥ १०८ ॥

सुगमाः । अयमाशयः--तन्मते जिनद्रव्याभावात् कथं रक्षण-वर्धन-भक्षण-संभवः ? तथा तत्रैव--

"चेइअदव्वं साहारणं च जो दुहइ मोहियमईउ ।
धम्मं च सो न याणइ अहवा बद्धाउओ पुव्विं ॥

चेइयदव्वविणासे तद्दव्वविणासणे दुविहभेए ।
साहू उविक्खमाणो अणंतसंसारिओ भणिओ ॥"

व्याख्या--तथा पञ्चकल्पे भणितम्--जया पुण पुव्वपवन्नाणि[1] खेत्त--हिरण्णाणि दुपय--चउप्पयाई जइ भंडं वा चेइयाणं लिंगत्था वा चेइयदव्वं राउलबलेण खायंति, रायभडाई वा अच्छिंदेज्जा, तथा तव--नियमसंपउत्तो वि साहू जइं न मोएइ, वावारं वा न करेइ तया तस्स सुद्धी न हवइ, आसायणा य भवइ ।" एतच्च कथं सार्थकम् ? किंच कृतकत्वाद् देवगृहभङ्गे कालेन द्रव्याभावात् कथं पुनस्तदुद्धारः क्रियते इति ॥

सूत्रसम्बन्धां गाथामाह--

अन्नं चासुहतरयं कुणंतओ वि हु सुहाउ भावाउ ।
पावइ पुन्नं सल्लुद्धरो व्व वीरस्स किंतु सुहं ॥ १०९ ॥

व्याख्या--अन्यच्च--अपरं च, अशुभतरकम्--अतिशयानिष्टम्, कुर्वाणो--विदधानः, हुः पूरणे, शुभात्--प्रशस्ताद्, भावाद्--अन्तःकरणात्, प्राप्नोति--पुण्य

---

[1] पुव्वपवत्ताणि

शल्योद्धरवत्–श्रवणकीलिकाऽपनेतृनरवत्, वीरस्य चरमतीर्थकरस्य, किं पुनः, शुभे–प्रशस्तम्, अयमाशयः–येन कीलिका भगवच्छ्रवणतो निष्कासिता तेन महती व्यथोत्पादिता, येन क्षिप्ता तेन स्तोकतरा, परं शुभेतराशयादेकस्य स्वर्गः, अपरस्य नरकः फलम्, इति गाथार्थः ॥

इत्थमवस्थिते जीवोपदेशमाह—

सुपसत्थवत्थ–कणयाइवत्थुवित्थाररेहिरं पडिमं ।
कारावसु देसंतो रे जिय ! जइ महसि मणइट्ठं ॥ २०० ॥

व्याख्या–सुप्रशस्तानि-अतिशयरम्याणि तानि च तानि वस्त्रकनकादिवस्तूनि च–वसन–चामीकरालङ्कार–कर्पूरादिद्रव्याणि तेषां विस्तारः–प्रपञ्चस्तेन ' रेहिर ' इति देशीभाषया शोभमानां प्रतिमां जिनबिम्बं कारय - विधापय, दिशन्–धर्मकथां कुर्वन्, रे जीव ! भो आत्मन् ! यदि महसि–वाञ्छसि मन इष्टं–चित्ताभिप्रेतम् । अयमाशयः–जिनवस्त्रादिनिवारणे अन्तरायकर्मवशात् अभीष्टलाभस्तव न भविष्यति । इति गाथार्थः ॥

॥ इति जिनद्रव्योत्पादवर्णनोऽयमष्टाविंशोऽधिकारः ॥

अधुनैकोनत्रिंशमाह—

अगीयत्तं अवरे उ अत्तणो देसयंति इय बिंता ।
सव्वावत्थासुं वि य पडिसिद्धमसुद्धमन्नाई ॥ २०१ ॥

व्याख्या–अगीतत्वं–सूत्रार्थाकोविदत्वम्, अपरे–पुनरन्ये, आत्मनः–स्वस्य, देशयन्ति–कथयन्ति, 'इय'त्ति " इतेरियः " इत्यनेन इयादेशे रूपमिदम्, ततश्च इति–पूर्वोक्तप्रकारेण ब्रुवाणाः–प्रतिपादयन्तः, सर्वावस्थास्वपि, प्रतिषिद्धं–निवारितम्, अशुद्धम्–आधाकर्मादिदूषितम्, अन्नादि–भोजनपानादि, इति गाथार्थः ॥

अस्यार्थस्य निवारणायाह—

मयमेयं न रमइ माणसंमि गुरुगच्छवुड्ढिसीलाण ।
सूरीणं जं पयडं ववहारस्सेरिसं वयणं ॥ २०२ ॥

व्याख्या-मतम्-अभिप्रायः, एतत्-पूर्वोक्तं । न रमते-न क्रीडति मानसे चित्ते । केषाम् ? गुरुगच्छवृद्धिशीलानाम्-आचार्य-तच्छिष्यसमुदायोपचयकारणस्वभावानाम्, सूरीणां-प्रभूणाम्, यस्मात् प्रकटं-गीतार्थविदितम्, व्यवहारस्य-छेदग्रन्थस्य ईदृशं-वक्ष्यमाणस्वरूपम्, वचनं-भणितिः, इति गाथार्थः ॥

तदेवाह—

जावज्जीवं गुरुणो सुद्धमसुद्धेण होइ कायव्वं ।
वसहे बारस वासा अट्ठारस भिक्खुणो मासा ॥ २०३ ॥

व्याख्या-यावज्जीवं-प्राणधारणमर्यादां 'क्वचिद् रागादौ' इति सर्वत्र योज्यम्, गुरोः-आचार्यस्य, शुद्धाशुद्धेन-एषणीयानेषणीयेन [मकारोऽलाक्षणिकः], भवति, कर्तव्यं-विधेयं प्रतिजागरणमिति शेषः । वृषभे-उपाध्याये द्वादश वर्षाणि-समाः, अष्टादश द्वौ नवकौ, भिक्षोः-साधोः, मासाः प्रतीताः । ततः परं यदि भव्यौ भवतः ततो लष्टम्, न चेत्ततः संबोध्यानशनं कार्यते, न चेदिच्छा समस्ति ततः शुद्धमेव दीयते न त्वशुद्धमिति सर्वज्ञमुद्रा । यदि तु दुर्विदग्ध एवं वदिष्यति-क्रियते एवं यदि आचार्यादिगुणयुक्तो भवति, ततोऽसौ व्यवहारगाथाभिः संबोध्यः—

पोक्खरिणी आयारे आणयणा तेणगा य गीयत्थे ।
आयरियंमि उ एए आहरणा होंति नायव्वा ॥ १ ॥

सत्थपरिन्ना छक्काय-अहिगमो पिंडउत्तरज्झाए ।
रुक्खे य वसहो गावो जोहा सोही य पुक्खरिणी ॥ २ ॥

पुष्करिण्य आचारे आनयनं स्तेनकाश्च गीतार्थः ।
आचार्ये तु एते दृष्टान्ता भवन्ति ज्ञातव्याः ॥ १ ॥

शस्त्रपरिज्ञाषट्कायाधिगमः पिण्डोत्तराध्ययने ।
वृक्षश्च वृषभगावः योधाः शुद्धिश्च पुष्करिणी ॥ २ ॥

पुक्खरिणीओ पुव्विं जारिसियाओ न तारिसा इण्हिं ।
तहवि य पुक्खरिणी हवन्ति कज्जाइ कीरंति ॥ ३ ॥

आयारपकप्पे उ नवमे पुव्वंमि आसि सोधी य ।
तत्तो च्चिय निज्जोढुं इहाणिओ इण्हि किं न भवे ॥ ४ ॥

तालुग्घाडणि-ओसावणाइविज्जाहिं तेणगा आसि ।
इण्हिं ताओ न संती तहावि किं तेणगा न खलु ॥ ५ ॥

पुव्विं चोद्सपुव्वी एण्हिं जहण्णो पकप्पधारी उ ।
मज्झिमगकप्पधारी किं सो उ न होइ गीयत्थो ॥ ६ ॥

पुव्विं सत्थपरिन्ना अहीतपढियाइ हो उवट्ठवणा ।
एण्हिं छज्जीवणिया किं सा उ न हो उवट्ठवणा ॥ ७ ॥

बीयंमि बंभचेरे पंचमउद्देस आमगंधंमि ।
सुत्तम्मि पिंडकप्पी इण्हिं पिंडेसणाए उ ॥ ८ ॥

पुष्करिण्यः पूर्वं यादृश्यो न तादृश्य इदानीम् ।
तथापि च पुष्करिण्यो भवन्ति कार्याणि क्रियन्ते ॥ ३ ॥

आचारप्रकल्पश्च नवमे पूर्वे आसीत् शुद्धिश्च ।
तत एव निर्यूह्य इहानीत इदानीं किं न भवेत् ॥ ४ ॥

तालोद्घाटन्यवस्वापिन्यादिविद्याभिः स्तेनका आसन् ।
इदानीं ताश्च न सन्ति तथापि किं स्तेनका न खलु ॥ ५ ॥

पूर्वं चतुर्दशपूर्वी इदानीं जघन्यः प्रकल्पधारी च ।
मध्यमकः कल्पधारी किं स तु न भवति गीतार्थः ॥ ६ ॥

पूर्वं शस्त्रपरिज्ञायामधीतपठितायामभूदुपस्थापना ।
इदानीं षड्जीवनिकायां किं सा न भवत्युपस्थापना ॥ ७ ॥

द्वितीये ब्रह्मचर्ये पञ्चमोद्देशे आमगन्धिनि ।
सूत्रे पिण्डकल्पी इह पुनः पिण्डैषणायां तु ॥ ८ ॥

आयारस्साउ उवरिं उत्तरज्झयणाओ आसि पुव्विं तु ।
दसवेयालिय उवरिं इयाणिं ते किं न होंतो उ ॥ ९ ॥

मत्तंगाइ-तरुवर न सन्ति इण्हिं न हुंति किं रुक्खा ।
महजूहाहिवदप्पिय पुव्विं वसहा न पुण इण्हिं ॥ १० ॥

पुव्वं कोडिवद्धा जूहा विअ नंदगोवमाईणं ।
इण्हिं न संति ताई किं जूहा ते न संती ओ ॥ ११ ॥

साहस्सी मल्ला खलु महपाणा पुव्विं आसि जोहा तु ।
तत्तुल्ला नत्थि ण्हिं कि ते जोहा न संती ओ ॥ १२ ॥

पुव्विं छम्मासेहिं परिहारेणं च आसी सोहीओ ।
सुद्धतवेणं निव्वितियाइ इण्हिं विसोही ओ ॥ १३ ॥

[आचाराङ्गसूत्रस्य लोकविजयनाम्नि द्वितीये अध्ययने, ब्रह्मचर्याभिधाने पञ्च-मोद्देशे आमगन्धिनि सूत्रे अधिते सति साधुःपिण्डकल्पी भवति । इदानीं पुनः द-शवैकालिकसूत्रस्य पञ्चमपिण्डैषणाध्ययने अधीते मुनिः पिण्डकल्पी भवति]

आचारस्योपरि उत्तराध्ययनानि आसन् पूर्वं तु ।
दशवैकालिकस्योपरि इदानीं तानि किं न भवन्ति ॥ ९ ॥

मतङ्गादितरुवरा न सन्ति इदानीं न भवन्ति किं वृक्षाः ।
महायूथाधिपा दर्पिकाः पूर्वं वृषभा न पुनरिदानीम् ॥ १० ॥

पूर्वं कोटीबद्धा यूथा अपि च नन्दगोपादीनाम ।
इदानीं न सन्ति ते किं यूथास्ते न भवन्ति ॥ ११ ॥

सहस्रमल्लाः खलु महाप्राणाः पूर्वमासन योधाः ।
तत्तुल्या न सन्तीदानीं किं ते योधा न सन्ति ॥ १२ ॥

पूर्वं षण्मासैः परिहारेण च आसीत् शुद्धिस्तु ।
शुद्धतपसा निर्विकृत्यादिना इदानीं विशोधिश्च ॥ १३ ॥

किं पुण एवं सोही जह पुव्विलासु पच्छिमासु च ।
पुक्खरिणीसुं वत्था इयाणि सुज्झंति तह सोही ॥ १४ ॥

एवं आयरिआइ चोद्दसपुव्वाई आसि पुव्विं तु ।
इण्हिं जुगाणुरूवा आयरिआ होंति नायव्वा ॥ १५ ॥

नीरोगावस्थायां तर्हि किमित्याह—

नीरोगाणवि तह देसकालमासज्ज होइ गहणं व ।
जम्हा निसीहगंथे पयडमिणं भणियमेवं तु ॥ २०४ ॥

व्याख्या–नीरोगाणामपि व्याधिरहितानां न केवलं रोगिणामित्यर्थः, तथा अभ्युच्चये, देशकालमासाद्य–प्राप्य, ग्रहणं स्वीकारोशुद्धाहारादेः, एतमित्थं तत्र देशः कंकटुकादिः कालो दुर्भिक्षादिः, यस्मान्निशीथग्रन्थे प्रकटं भणितमुक्तम्, एवं वक्ष्यमाणनीत्या, तुः पूरणे इति गाथार्थः ॥

तदेवाह—

संथरणंमि असुद्धं दोण्हं वि गिण्हिंतदिंतयाण हियं ।
आउरदिट्ठंतेण तं चेव हियं असंथरणे ॥२०५॥

प्रकटार्था, नवरं संस्तरणं तद्विपरीतमिति ॥

किंचेति सम्बन्धार्थः,

संविग्गभावियाणं लोद्धयदिट्ठन्तभावियाणं च ॥
मोत्तूण खित्तकाले भावं च कहंति सुद्धुं छ ॥ २०६ ॥

व्याख्या–संविग्नभावितानां गीतार्थवासितानां श्रावकाणामिति शेषः, तेषां हि प्राय इयं देशना–अशुद्धं न दातव्यमिति । लुब्धकदृष्टान्तभावितानां शी-

---

किं पुनरेवं शुद्धिर्यथा पूर्वासु पश्चिमासु च ।
पुष्करिणीषु वस्त्राणीदानीं शुद्धयन्ति तथा शुद्धिः ॥ १४ ॥
एवमाचार्यादयश्चतुर्दशपूर्व्यादय आसन् पूर्वं तु ।
इदानीं योग्यानुरूपा आचार्या भवन्ति ज्ञातव्याः ॥ १५ ॥

त्तकविहारिभाविताना ते हि एवं कथयन्ति—"श्रावकैः साधुभ्यः सर्वथा दातव्यम्, तैस्तु यथारुचितं ग्राह्यं, यथा लुब्धका मृगव्यां गता मृगवधार्थं चेष्टन्ते हरिणास्तु तत्परिहारेण" इति, चः समुच्चये, मुक्त्वा परिहृत्य क्षेत्रकालं पूर्वोक्तार्थं, भावं ग्लानादिकं, चः समुच्चये, कथयन्ति—प्रतिपादयन्ति, शुद्धोञ्छं आधाकर्माद्यदूषितं, अयमाशयः—यदा क्षेत्रकालभावकारणानि तथाविधानि तदा शुद्धस्य वार्तापि न कथ्यते, अन्यथा विवक्षितद्रव्याभावतो निर्वाह एव न स्यात् तदभावे तु शरीराभावः तदभावे च संयमाभाव इति गाथार्थः ॥

पराभिप्रायमाशंक्याह—

बिंति जइ केइ तिविहं तिविहेणं पच्चक्खाणभंगो ।
तम्मयमोसारिज्जइ इमाए गाहाए अवियप्पं ॥२०७॥

व्याख्या—ब्रुवते गदन्ति यदि केऽप्येके त्रिविधं त्रिविधेन मनःप्रभृतिकरणादिना प्रत्याख्यानभंगो विरत्यभावोऽत्राशुद्धग्रहणे तन्मतं तद्वाद्यभिप्रायोऽपसार्यते निराक्रियते अनया वक्ष्यमाणया गाथया छन्दोविशेषेणाविकल्पं निस्सन्देहमिति गाथार्थः ।

तामेवाह——

सव्वत्थ संजमं संजमाउ अप्पाणमेव रक्खिज्जा ॥
मुच्चइ अइवायाओ पुणो वि सोही न या विरई ॥२०८॥

सुबोधा ॥

ननु भवद्भिरपवादपदानि दर्श्यन्ते, उत्सर्गस्य वार्ताऽपि न दृष्टा इत्याह——

जे उ जियसंसए वि हु चडंति न घडंति गहियसुत्तत्था ।
बीयपए धन्न च्चिय ते मुणिणो सव्वगुणनिहिणो ॥२०९॥

व्याख्या—ये पुनः जीवितव्यसंशयेऽपि—प्राणसन्देहेऽपि, हुः पूरणे, चटन्ति—आरोहन्ति, न नैव घटन्ते—युज्यन्ते घटितसूत्रार्थाः सम्बद्धवचनाभिधेयाः, द्वितीयपदे अपवादाख्ये, धन्या एव—पुण्यभाजस्ते उत्सर्गप्रिया मुनयः साधवः सर्व्वगुणनिधयो—निःशेषगुणनिधानम्; एते चाधाकर्म्माद्यपेक्षया इत्थं वाच्यं न पुनः पार्श्व-

स्थादिवन्दनापेक्षया, यतः कारणात्, तत्करणे प्रवचनभक्तिः, अकरणे चाभक्तिः निर्ज्जराश्रुतलाभौ च भणितौ ते न स्युरिति गाथार्थः ॥

इत्थमवबुद्धं जीवोपदेशमाह—

तम्हा मेवं देससु संससु परमत्थजाणए पुरिसे ।
जेणं जायइ तुज्झ वि समत्थ–परमत्थ–विन्नाणं ॥२१०॥

व्याख्या–तस्माद् मा निषेधे, एवमशुद्धं सर्व्वदा प्रतिषिद्धमिति दिश कथय, संश्लाघय, परमार्थज्ञान तत्त्ववित्पुरुषान् सूरिप्रभृतीन्, येन जायते सम्पद्यते तवापि भवतो 'जीव !' इति शेषः, न केवलमाचार्यादीनामित्यप्यर्थः, समस्तपरमार्थविज्ञानं–निश्शेषतत्त्वावगम इति गाथार्थः ॥

अशुद्धग्रहणकथन एकोनत्रिंशोऽधिकारः ॥

त्रिंशत्तममाह—

पासत्थाइसमीवे तवो विहाणाइ जं कयं तं तु ॥
निंदाविंति य केई कसायवसकलुसियप्पाणो ॥ २११ ॥

व्याख्या–पार्श्वस्थादिसमीपे–शिथिलादिनिकटे तपो–विधानादि उपवासपठनप्रभृति, यद्–अनिर्दिष्टनामकम्, कृतं–विहितम्, तत्पुनरुपवासादि निन्दापयन्ति त्याजयन्ति, केऽप्येके, कषायावेशकलुषितात्मानः–कोपावेशमलिनीकृतस्वरूपाः, इति गाथार्थः ॥

तत्रोत्तरमाह—

तं न जम्हा ववहारओ उ लट्ठाओ जायए लट्ठं ॥
निच्छयओ पुण नेवं ववहारम्मी जओ भणियं ॥ २१२ ॥

व्याख्या–तत्–परोक्तम्, नेति निषेधे, यस्माद् व्यवहारत एव–व्यवहारनयमतेन, तुरवधारणे, लष्टात्–शोभनात् साध्वादेः, जायते भवति, लष्टं–शोभनं कर्म्म निर्ज्जरणादि, निश्चयतः पुनर्निश्चयमतेन, नेति निषेधे, एवमित्थं, व्यवहारे–प्रनीते, यतो भणितमुक्तम्, इति गाथार्थः ॥

तदेवाह—

निच्छयओ पुण अप्पे वि जस्स वत्थुंमि जायए भावो ॥
तत्तो सो निज्जरओ जिणगोयमसीहआहरणं ॥ २१३ ॥

व्याख्या—निश्चयतो—निश्चयमतात्,पुनरल्पेऽपि--हीनेऽपि, न केवलं लष्टे इत्यपि शब्दार्थः; वस्तुनि आचार्यादौ, यस्य भव्यस्य, वस्तुनि-उक्तरूपे, जायते प्रादुर्भवति, भावः प्रशस्तान्तःकरणम्. ततः स इति भावो निर्ज्जरकः-कर्म्महासकारकः । जिनः गोतमः, सिंहः, आहरण दृष्टान्तः, इति गाथार्थः ॥भावार्थस्तु कथानकात् । तच्चेदं- "किल भगवता वीरेण गौतमस्वामी ग्रामं गच्छन्नेकदा भणितः-"गौतम ! त्वया हालिको मार्ग्गे गच्छता प्रव्राजनीयः ।" 'तथेति'प्रतिपद्य प्रणम्य च भगवन्तं गतो गौतमो ग्रामे,दृष्टश्च गच्छता क्षेत्रनिकटवर्त्ती हालिकः।ततो गौतमेन भणितं-'किं भोः! करोषि ?' निजकर्म्मविद्य पुनरुवाच—सः-'साम्प्रतं यत्त्वं भणसि तदहं भगवन् ! करोमि' । गौतमेनोचे-'धर्म्मं कुरुष्व'इति । तेन च प्रोत्फुल्लवदनकमलेन न्यगादि- 'एवमिति' । ततः प्रव्राजितोऽसौ । ततः स्वकार्यं विहाय भगवत्सम्मुखमागच्छन्त- स्तस्य शिक्षा दत्ता-'एवं चङ्क्रमितव्यम्, एवंविधश्चास्मदीयो भगवान वीरो देवता प्रतिपत्तव्यः ' इत्यादि, सर्व्वं तेन प्रतिपन्नम्. यावदद्यापि भगवान्नासीद्दृष्टः । दृष्टे च तस्मिन् रजोहरणं मुक्त्वा 'यद्ययं ते गुरुस्ततो न किञ्चित्तव धर्म्मेण कार्यम्' इति भणित्वा च पलायितः । किल तस्य वासुदेवभवकृतपूर्व्ववैरात् पितृव्यसुतजीवसिंह- पाटनरूपात् भगवतं पश्यतः कर्म्मबन्धः, गौतमं च पश्यतः तद्ध्रासः । गौतमश्च भगवदपेक्षया हीनः, छद्मस्थाऽतीर्थकरत्वादिहेतोः, भगवाँश्चोत्तमः तीर्थकरत्वादि- हेतुभिरेव, इति सिद्धं हीनेऽपि शुभभावात् निश्चयनयेन लष्टत्वम् ॥

इत्थमपि यन्निन्दापयन्ति तत्किम् ? इत्याह—

लट्ठाणुट्ठाणं सुंदरेण भावेण चिट्ठियं जं तु ॥
निन्दाविंतयंतं नूणं ताण रोसस्स दुल्ललियं ॥ २१४ ॥

व्याख्या—लष्टानुष्ठानं प्रशस्तक्रियां, सुन्दरेण-प्रधानेन, भावेन चित्तेन, चेष्टितं विहितं यदुपवासादिकं, तुः पूरणे, निन्दापयन्ति-दुष्टामिति व्याजयन्ति ' श्रावका-

दीन्'इति शेषः, तन्नूनं निश्चितं, तेषां निन्दाकारकाणां, रोषस्य, दुर्ललितं-विजृम्भितम, इति गाथार्थः ॥

लष्टत्वमेव भावयन्नाह—

उववासपोसहाई नेव को वि भावं विणा इह करेइ ॥
ता नो विहलं सहलं ताण समीवे वि ठियमेयं ॥ २१५ ॥

व्याख्या–उपवासपौषधादि समयप्रतीतम, नैव, कोऽपि कश्चिद्, भावं चित्तोत्साहं, विना अन्तरेण, इह प्रवचने, करोति विदधाति धर्म्मार्थी श्राद्धादिरिति-शेषः । तस्मात्,नो नैव, विफलं–धर्म्मकार्यहीनं, किन्तु- सफलं फलवत्, तेषां पार्श्वस्थादीनां, समीपेऽपि निकटेऽपि, न केवलं सुयतिसमीपे इत्यपि शब्दार्थः, स्थितं प्रतिष्ठितमेतत्तपस्करणम, इति गाथार्थ ॥

व्यतिरेकमाह—

अह विहलं, नो ते कत्थ सावया कुणंतु धम्मत्थी ॥
पुव्वुत्तजुत्तिओ जं ते वि हु जायंति पासत्था ॥ २१६ ।

व्याख्या–अथेति पराभिप्रायार्थः, विफलं-फलरहितं, ततः, ते निर्दिष्टनामानः, कुत्र कस्मिन्, स्थाने इति शेषः, श्रावकाः–प्रतीताः, तमुपवासादिकं, कुर्व्वन्तु विदधतु, धर्म्मार्थिनो वृषलम्पटाः, किमिति ? पूर्व्वोक्तयुक्तेः "सुत्तत्थपोरिसी नो करेइ " इत्यादिकायाः, यस्मात्, तेऽपि, एवं वादिनः,–जायन्ते भवन्ति,पार्श्वस्थाः, उपलक्षणत्वादवसन्नादयश्च, इति गाथार्थः ॥

॥ दूषणान्तरमाह—

अहनेवं वयंता होंतु सुंदरा नियमईए ते साहू ॥
जइ पुव्वकयं सयमवि पुणोवि पकुणंति जोगाई ॥ २१७ ॥

व्याख्या–अथवेति प्रकारान्तरं सूचनार्थः, एवं–पूर्व्वोक्तप्रकारेण, वदन्तो-ब्रुवाणाः,भवन्तु–सन्तु,सुन्दरा- भव्या, निजमत्या स्वाभिप्रायेण, ते एवं वदनशीलाः, साधवो व्रतिनः,यदि पूर्व्वकृतं शीतलविहारविहितं स्वयमप्यात्मना,पुनरपि-भूयः,

प्रकुर्वते–विदधति, योगादिकं योगोद्वहनादिकम्, इति गाथार्थः ॥

तन्मतावलम्बिनां निर्मूलतां दर्शयन्नाह—

अहहो पिच्छसु अन्नाण--विलसियं सावयाण केसिं चि ॥
पच्चक्खविरुद्धे वि हु लग्गंती ताण वयणम्मि ॥ २१८ ॥

व्याख्या–'अहहो' इत्याश्चर्ये, प्रेक्षस्व–अवलोकय ' मध्यस्थजनः ' इति शेषः; अज्ञानविलसितं–मूढताचेष्टितं, श्रावकाणां प्रतीतानां, केषाञ्चिद् न सर्वेषाम्, प्रत्यक्षविरुद्धेऽपि अध्यक्षासङ्गते, हुः पूरणे, लगन्ति–अवलम्बन्ते, तेषां प्रत्यक्षविरुद्धवादिनां, वचसि वचने । स्वयं निजतपोऽनुष्ठितं शीतलविहारित्वे न निन्दन्ति, अन्यान् निन्दापयन्तीति प्रत्यक्षविरुद्धमिति गाथार्थः ॥

इत्थं ज्ञाते जीवोपदेशमाह—

जत्थ व तत्थ व विहियं सोहणभावेण भव्वणुट्ठाणं ॥
मा निन्दावसु सड्ढे तवाइयं जीव उवएसो ॥ २१९ ॥

व्याख्या–यत्र वा तत्र वा पार्श्वस्थादिसमीपे,विहितं–कृतं, शोभनभावेन–प्रशस्तान्तःकरणेन, भव्यानुष्ठानं लष्टक्रियां, 'मा' इति निषेधे, निन्दापय–त्याजय, श्रावकान् श्राद्धान्, तपआदिकम्–उपवासपौषधादिकं, जीव ! आत्मन् ! उपदेशः शिक्षा, तव इतिशेषः, इति गाथार्थः ॥

पार्श्वस्थादिसमीपे कृततपोनिन्दापनविचारस्त्रिंशत्तमोऽधिकारः ॥

एकत्रिंशत्तममाह—

सावयजणस्स धम्मस्स फंसया के वि बिंति चेइहरे ॥
पासत्थाईविहिए नो सक्काराइयं कुज्जा ॥ २२० ॥

व्याख्या–श्रावकजनस्य, धर्मस्य-दानादेः, 'फंसय'त्ति देशीभाषायां भ्रंशकाः, केप्येके, ब्रुवते--भणन्ति, चैत्यगृहे-जिनसदने पार्श्वस्थावसन्नादिकृते,नो नैव, सत्कारादिकं वस्त्राऽऽभरण--पूजादिकं, कुर्याद्--विदध्याद्, इति गाथार्थः ॥

अन्यच्च ते एव यद्वदन्ति तत् सोत्तरं गाथया प्राह—

ते वि हु तट्ठाणाओ सइ सत्तीए निगासणिज्जाओ ॥
नेयं पि सुविहियाणं जुज्जइ वोत्तु जओ भणियं ॥ २२१ ॥

व्याख्या--तेऽपि पार्श्वस्थादयो, 'यैर्देवकुलानि कारितानि' इति शेषः, आशातनाकारित्वात्तेषामित्याशयः, हुः तथैव, ततः स्थानाद्-देवकुलादेः, सत्यां-विद्यमानायां, शक्त्यां-सामर्थ्ये, निष्कासनीया एव । न नैव, इदमपि पूर्वोक्तं, सुविहितानां साधूनां, युज्यते घटते, वक्तुं भणितुम्, यतो भणितं-तदनन्तरगाथायां भणिष्यति, इति गाथार्थः ॥

तदेवार्थतो गाथापञ्चकेनाह—

×ववहारछेयगंथे ओसन्नविहारिणीए वइणीए ॥
कारवियं चेइहरं तत्थ य तप्पेरियजणेहिं ॥ २२२ ॥

विउले सक्कारम्मि सहिय वट्टंतयंमि एत्तो य ॥
विरहंती तत्थ पवत्तिणीओ पत्ता तहिं सा ओ ॥ २२३ ॥

अब्भुज्जमित्ति भणिया अत्थि न वा कोइ एइ चेइहरे ॥
सुस्सूसयरो जंपइ नत्थिच्चिय भणइ गुरुणीओ ॥ २२४ ॥

उज्जंमिउ नो जुज्जइ अ विज्जमाणंमि तंमि तुह भद्दे ।
होइ अभत्ती जम्हा इय करणे चेइयाणंति ॥ २२५ ॥

+व्यवहारच्छेदग्रन्थे अवसन्नविहारिण्या व्रतिन्या ।
कारितं चैत्यगृहं तत्र च तत्प्रेरितजनैः ॥ २२२ ॥

विपुले सत्कारे साधिके च वर्तमाने अतश्च ।
विहरन्त्यस्तत्र प्रव्रतिन्यः प्राप्तास्तत्र सा तु ॥ २२३ ॥

अभ्युद्यमे इति भणिता अस्ति नवा कोऽपि अत्र चैत्यगृहे ।
सुश्रूषापरः, जल्पति-नास्ति एव, भणन्ति गुर्व्यः ॥ २२४ ॥

उद्यंतुं न युज्यते च विद्यमाने तस्मिन तव भद्रे ।
भवति अभक्तिर्यस्मात् एतत्करणे चैत्यानामिति ॥ २२५ ॥

अह पुण अविज्जमाणो (णे) सुस्सूसयरे उ उज्जमाविंति ।
तो पच्छित्तं भणियं पयडं ववहारगंथंमि ॥ २२६ ॥

सुगमा, तथा व्यवहारे भणितं—

अणुसंह उज्जमींतिइ विज्जंते चेइयाण सारवए ।
पडिवज्जंते विज्जन्नए गरुया अभत्तीए ॥८॥ इति ॥

ननु तेषां तत्करणे पुण्यं भवति वा न वा ? इत्याह—

होउ व मा होउ वत्ति य पुन्नं तक्कारयाण सव्वन्नू ।
जाणंति ते ववहारओ उ जम्हा इमं वयणं ॥ २२७ ॥

सुबोधा ।

तदेवोक्तद्वयेनाह—

समयविपत्ती सव्वा आणावज्झन्ति भवफला चेव ॥
तित्थयरुद्देसेणवि न तत्तओ सा तदुद्देसा ॥ २२८ ॥

तथा छेदग्रन्थभणितम्—

दुब्भिगंधमलस्सावी तणु रप्पे सण्हाणिया ।
उभओ वाउवहे चेव ते णट्ठंति न चेइए ॥ २२९ ॥

सुगमम् ।

श्रावकाणां पुनस्तत्र किमित्याह—

सड्ढाण पुणो चेइहरं तु जह तह व होउ निप्पन्नं ।
पूइज्जं तं फलयं समयमेयं आगमन्नूणं ॥ २३० ॥

---

१ अथ पुनरविद्यमाने शुश्रूषापरे तु उद्यमयन्ति ।
ततः प्रायश्चित्तं भणितं प्रकटं व्यवहारग्रन्थे ॥ २२५ ॥

२ अनुशास्तौ उद्यमयन्ति विद्यमाने चैत्यानां सारके ।
प्रतिपद्यमाने विद्यमाने गुरवः अभक्त्या ॥ ८ ॥

व्याख्या–श्रावकाणां–श्राद्धानां, पुनः, चैत्यगृहं–जिनसदनं, तुः पूरणे, यथा तथा वा–पार्श्वस्थादिकृतं श्रावकादिकृतं वा, भवतु, निष्पन्नं–तन्निष्ठां गतं, पूज्यमानमर्च्यमानं, फलदमीप्सितकारि, मतमेतत् सम्मतम्, इदं, आगमज्ञानां–सिद्धान्तविदां, इति गाथार्थः ॥

इति विदिते आत्मनः शिक्षामाह—

रे जीव ! जीववच्छल्ल–कारओ तं सि जइ फुडं ता मा ।
वारेसु सावयजणे इय पूयंते उ चेइहरे ॥ २३१ ॥

व्याख्या–रे जीव !–भो आत्मन्! जीववात्सल्यकारको–भव्यप्राण्युपकारकर्त्ता, त्वमसि–भवसि, यदि, स्फुटं प्रकटं, ततो, ' मा ' इति निषेधे, वारय निषेधय, श्रावकजनान श्राद्धलोकान्, इत्येवं, पूजयतो–अर्चयमानान, तुः पूर्ववत्, चैत्यगृहान् जिनमन्दिरान्, इति गाथार्थः ॥

पार्श्वस्थकृतजिनभवने पूजाविचार एकत्रिंशत्तमोऽधिकारः ।

द्वात्रिंशमाह—

जो जहवायं न कुणइ इच्चाइ निदंसिऊण अन्नेत्थ ।
सम्मत्तस्साभाव वयंति साहूण सव्वाणं ॥ २३२ ॥

व्याख्या–यो यत्यादिः, यथावादं–यथोक्तं, न करोति–न विदधाति, [इत्यादि] निदर्श्य–कथयित्वा, आदिग्रहणात् " मिच्छदिट्ठी तओ हु को अन्नो ? वड्ढेइ य मिच्छत्तं परस्स संकं जणेमाणो " इति दृश्यं सुबोधं च । अन्ये अपरे, अत्र–विचारप्रक्रमे, सम्यक्त्वस्य–दर्शनस्य, अभावमसत्तां, वदन्ति–भणन्ति, साधूनां, सर्वेषां निश्शेषाणाम, इति गाथार्थः ॥

अत्रोत्तरमाह—

एगंतेणं नेवं जम्हा ववहार–निच्छयनयेहिं ।
सव्वंपि जिणमयं खलु निद्दिट्ठं समयकेऊहिं ॥ २३३ ॥

व्याख्या—एकान्तेन–निश्चयेन, नैवं–नेत्थम्, यस्माद्, व्यवहारनिश्चया-

भ्यां -प्रतीताभ्यां, सर्वमपि निःशेषं जिनमतं--सर्वज्ञागमः, खलु निश्चये, निर्दिष्टं-कथितं, समयकेतुभिः--जिनागमोद्योतकैः, इति गाथार्थः ॥

व्यतिरेकमाह—

जइ पुण नेवं नेयं होज्जा, तो कह णु सबलचारित्ती।
इगवीसट्ठाणेसु भणिओ एवं दसाईसु ॥ २३४ ॥

व्याख्या-यदि पुनर्नैवं--नयविचारं विना, ज्ञेयमवगन्तव्यं, भवेत्, ततः कथं--केन प्रकारेण, 'नु' इति वितर्के, शबलचारित्री-कर्बुरशीलः, एकविंशतिस्थानेषु-इति संख्यानियमितेषु, भणितः-उक्तः, एवं वक्ष्यमाणनीत्या, दशाश्रुतस्कन्धावश्यकादिषु, इति गाथार्थः ॥

तान्येवार्थतः प्राह—

आउट्टियाए पाणाइ-वायकत्ता तहा उ भुंजंतो।
आहाकम्मं कंदाइयं च एमाइ इगवीसं ॥ २३५ ॥

व्याख्या-आकुट्टिकया-जानन् अनापदि यत् सेवते। तथाचोक्तं दशाश्रुतस्कन्धचूर्ण्याम्-" आउट्टिया नाम जाणंतो अणावइए जं सेवइ" त्ति, प्राणातिपातकर्त्ता-जीवघातविधाता, तथाऽपरं, भुञ्जानो-अभ्यवहरन्, आधाकर्म-प्रतीतं, मूलादिकं च-मूलफलादिकं, एवमादि-इत्थं प्रभृति, एकविंशतिर्ज्ञेयानि ' शबलस्थानानि, इति शेषः।

तथा भगवत्यां पुलाक-बकुश-प्रतिसेवनाकुशीलानां मूलोत्तरगुणसेवित्वं चारित्रे भणितम्। यद्यपि बकुशस्योत्तरगुणसेवित्वं तत्र भणितं, तथाप्युत्तराध्ययनचूर्ण्यां तस्यापि मूलगुणसेवित्वं भणितमास्ते; न च वेलानियमः कृतः, इति गाथार्थः॥

अस्यैव भावार्थमाह—

नाणे सइ चारित्तं, नाणं पुण होइ सम्मदिट्ठिस्स।
तो नज्जइ सम्मत्तं जहवायमकुव्वउ वि भवे ॥ २३६ ॥

व्याख्या-ज्ञाने-बोधरूपे, सति- विद्यमाने, चारित्रं--शीलम्, ज्ञानं,--पुन-

स्करूपं, भवति जायते, सम्यग्दृष्टेर्दर्शनवतः, ततो, ज्ञायते--बुध्यते, सम्यक्त्वयुक्तरूपं, यथावादं प्रतिज्ञारूपं, अकुर्व्वतोऽपि अविदधतोऽपि, न केवलं कुर्व्वन इत्यपिशब्दार्थः, भवेज्जायेत, इति गाथार्थः ॥

अभ्युच्चयार्थमाह—

तह मिरिइ–नंदिसेणा ताण मया मिच्छदिट्ठिणो होंति ।
मोत्तूण तो त्तिभूमी एमाइ जिणाणभंगाओ ॥ २३७ ॥

व्याख्या–तथा-अपरं दूषणम्, मरीचिनन्दिषेणौ-प्रतीतौ, तेषामेवंवादिनां, मताद्–बोधात्, मिथ्यादृष्टी,भवतो–जायेते । कस्मात्? मुक्त्वा-परिहृत्य-यदि प्रव्रज्यां कर्त्तु न शक्नोमीति शेषः, ततः, त्रिभूमिः प्रतीता, एवमादि जिनाज्ञाभङ्गात्–सर्व्वज्ञशासनलोपाद् वकारश्चात्र प्राकृतलक्षणेन लुप्तः, आदिशब्दात् " मुसावगत्तं च रतराग० " इति गाथार्थः ॥

ननु तौ मिथ्यादृष्टी भविष्यतः, इत्याह—

समत्तं पुण ताणं समयंमि य देसियं तओ मुणह ।
सव्वत्थ नयमएणं सुत्ताणं होइ वक्खाणं ॥ २३८ ॥

व्याख्या–सम्यक्त्वं दर्शनं, पुनस्तयोर्मरीचि–नन्दिषेणयोः समये सिद्धान्ते, देशितं कथितं; ततस्तस्मात्, मुणत–जानीत, सर्व्वत्र सर्व्वस्मिन्, नयमतेन च नयाभिप्रायेण, सूत्राणां–आगमवचसां, भवति–जायते, व्याख्यानं–विवरणम्, तथाह्यावश्यके—

" दंसणपक्खो–सावय–चरित्तभट्ठे य मंदधम्मस्स " । अस्य गाथार्द्धस्य तच्चूर्ण्यां व्याख्यानम् " सावउ न सक्कइ विसयगिद्धो पव्वइउं, सो भणइ–दंसणं पि ता मे होउ'त्ति, तस्स एस पक्खो, चरित्तभट्ठे वा, एवं नेव मंदधम्मे वा । जो गहियं गहीयं भंजइ; " तथा आचाराङ्गे–" से बेमि समणुन्नस्स वा असमणुन्नस्स वा खाइमं साइमं वा वत्थं वा पडिग्गहं वा कंबलं वा पायपुंछणं वा नो पाएज्जा, नो निमंतेज्जा, नो कुज्जा वेयावडियं, परं आढायमाणोत्तिबेमि ॥ " तत्र प्रथमपदस्य व्याख्या–समनोज्ञा दृष्टितो लिङ्गतश्च, न त्वाहारादिभिः पार्श्वस्थादयः,

असमनोज्ञास्तु शाक्यादयः । अस्य सूत्रस्य संवादो निशीथचूर्ण्यां तद्भाष्ये च बहुषु स्थानेषु विद्यते–' सम्यक्त्वादीनि पार्श्वस्थादीनि विद्यन्ते इत्यर्थः । स तु ग्रन्थविस्तरभयान्न लिखितम् । तस्मादत्र नयैरेवोत्तरम्, न च " नया न विद्यन्ते इति वक्तव्यं, चतुर्थव्याख्याङ्गत्वान्नयानाम् । तथा चोक्तम्–उपक्रमो निक्षेपोऽनुगमो नयाः' इति । परमिति श्रुत्वा न मुमुक्षुणा चारित्रं प्रति मन्दआदरः कार्यः, चारित्रं विना ज्ञानदर्शनयोर्मोक्षं प्रत्यनङ्गत्वाद्, इति गाथार्थः ॥

नयाभिप्रायमेव विशेषतः प्राह—

किंची उस्सग्गसुयं ववायसुयं च किंचि किंचेत्थ ।
उभयसुयं पुण किंची मुज्झंती तेण मंदमई ॥ २३९ ॥

व्याख्या–किञ्चिद्–उत्सर्गश्रुतं–सूत्रं वा, अपवादश्रुतं च किञ्चित्, किञ्चासमुच्चये, अत्र–जिनप्रवचने, उभयश्रुतमुत्सर्गापवादरूपं, पुनः, किञ्चिदेकम्, मुह्यन्ते–सन्दिह्यन्ते, तेन कारणेन, मन्दमतयः स्वल्पधिषणाः । एषां च स्वरूपं नीशीथादवमेयम्, इति गाथार्थः ॥

अपरं च सन्देहकारणमाह—

तह समयविऊ वयणं वयंति वयणाइं बहुपयाराइं ।
निंदाथुइभेएणं हवंति तो जीव ! मा मुज्झ ॥ २४० ॥

व्याख्या–तथा परं, समयविदः सिद्धान्तज्ञाः, वचनं–वाक्यं, वदन्ति जल्पन्ति, वचनानि–सिद्धान्तवाक्यानि, बहुप्रकाराणि–नानाभेदानि, निन्दास्तुतिभेदेन उपलक्षणत्वादुभयवचनादीनि, भवन्ति–जायन्ते; ततो जीव ! आत्मन् ! मा निषेधे, मुह्य–सन्देहं कुरु । इति गाथार्थः ।

तान्येव विवृण्वन् निन्दावचनं तावद्विवरीतुमाह—

सोच्चा ते जियलोए इमाए गाहाए निंदिओ नाणी ।
नाणगुणाभावाउ नउ सो अन्नाणिणो हीणो ॥ २४१ ॥

व्याख्या–शोच्यास्ते जीवलोकेऽस्यां गाथायां, शेषं तु–" जिणवयणं, जे

नरा न यार्णति, सोचाणवि ते सोच्चा, जे नाऊणं वि न करिंति." इति इत्थं सुबोधम्। निन्दितो हीलितो ज्ञानी-सूत्रवान, ज्ञानगुणाभावात्-विरतिलक्षणगुणाभावात्, न पुनर्नैव, स ज्ञानी, अज्ञानिनः-श्रुतविकलात् सकाशात्, हीनस्तुच्छः, इति गाथार्थः ॥

किमित्याह—

नाणगुणो जं अहिओ अन्नाणिणो नत्थि सो उ तो हीणो ।
एवं ठियंमि नज्जइ निन्दावयणं फुडं चेयं ॥ २४२ ॥

व्याख्या-ज्ञानगुणो यस्मादधिकोऽर्गलः, अज्ञानिनः-श्रुतविकलस्य, नास्ति-न विद्यते, स ज्ञानगुणः, तुः पूरणे, ततो, हीनः तुच्छो, ज्ञानिनोऽज्ञानी। एवं स्थिते इत्थं सति, ज्ञायते बुध्यते, निन्दावचनं हीलावाक्यं, स्फुटं प्रकटमेतत्-'सोच्चा ते जियलोए' इत्यादिकम, एवं ह्यसौ निन्द्यते-येन उद्यमं न करोति, न पुनरज्ञानिनः स हीनः, इति गाथार्थः ॥

स्तुतिवाक्यविवरणमाह—

'एक्को वि नमुक्कारो' इच्चाइयं तु होइ थुइवयणं ।
नहि एग नमोक्कारो संसारुत्तारणं होइ ॥ २४३ ॥

व्याख्या-'एकोऽपि नमस्कारः' इत्यादिकं तु भवति स्तुतिवचनं-स्तवनवाक्यम, आदिशब्दात् "जिणवरवसहस्स वद्धमाणस्स, संसारसागराओ तारेइ नरं व नारिं वा" इति इत्थम, नहि-नैवैकनमस्कारात् प्रसिद्धात् संसारोत्तरणं, भवति-जायते, इति गाथार्थः ॥

पराभिप्रायमाशङ्क्याह—

अह सेसावस्सयसंजुयस्स सहलो कहं नु तो एगो ।
अह एगो च्चिय साहइ तो किं सेसकिरियाए ॥ २४४ ॥

व्याख्या-अथ पराभिप्रायार्थः, शेषावश्यकसंयुतस्य-समस्तानुष्ठानपरायणस्य, सफलः-स्वकार्यकृत्, कथं-केन प्रकारेण, 'नु' इति वितर्के, ततो एकः,

अद्वितीयः, अथ एक एव साधयति निष्पादयति 'मोक्षं' इति शेषः, ननः किमिति प्रश्ने, न तु शेषक्रियया नमस्कार-व्यतिरिक्तानुष्ठानेन; एकनमस्कारेणैव मोक्षस्य सिद्धत्वाद् इति गाथार्थः ॥

न केवलं नमस्कारस्येदं माहात्म्यं, किन्त्वपरेषामपीत्याह—

सव्वे वि य सुहजोगा फलया कम्मक्खयत्थं कीरंता ।
अविसेसेवि विसेसो नज्जइ थुइवयणमेवं तु ॥ २४५ ॥

व्याख्या—सर्वेऽपि समस्ताः, न केवलं नमस्कार इत्यपि शब्दार्थः, शुभ-योगाः—प्रशस्तव्यापाराः, फलदा—मोक्षसाधकाः, कर्मक्षयार्थं पापाद्यपोहनिमित्तं, क्रियमाणा विधीयमानाः, अविशेषेऽपि ' विशेषो नमस्कारो मोक्षदः इति ज्ञायते-बुध्यते, स्तुतिवचनं--स्तववाक्यम, एवं- इत्थं, ततस्तस्माद '' इति गाथार्थः ॥

ननु किं नमस्कारान्मोक्षो न भवति ? इत्यस्योत्तरगर्भं जीवोपदेशमाह--

पारपरेण एगो वि होज्ज संसारतारओ सो उ ।
एवं ठियंमि रे जीव ! मुणसु जं बिंति समयन्नू ॥ २४६ ॥

व्याख्या--पारंपरेण--परंपरया, एकोऽपि भवेत्, संसारतारकः, स,--नम-स्कारः, तुः पूरणे, एवं स्थिते इत्थं प्रतिष्ठिते, स्तुतिवाक्ये, रे जीव ! भोः प्राणिन् ! मुण--जानीहि, यद्ब्रुवते समयज्ञाः--सिद्धान्तविदः, एवं भयवाक्यादीन्यपि बहु-श्रुतसंवातोऽवगम्यानि, इति गाथार्थः ॥

यो यथावादं न करोति स मिथ्यादृष्टिः इत्यादि वर्णनो द्वात्रिं-शोऽधिकारः ॥

अथ त्रयस्त्रिंशमाह—

वेसो वि अप्पमाणं इच्चाई दंसिऊण वारिंति ।
सव्वं पि हु करणीयं इह लिंगुवजीविणो वइणो ॥ २४७ ॥

व्याख्या—'वेषोप्यप्रमाणम' इत्यादि निदर्श्य—कथयित्वा, आदिग्रहणाद् "सं-जमपएसु वट्टमाणस्स, किं परिपत्तियवेसं विसं न मारेइ खज्जन्तं " इति दृश्यं; वारयन्ति-निषेधयन्ति, सव्वमपि—समस्तमपि, करणीयं--कर्त्तव्यम, इह समये,

लिङ्गोपजीविनो–गुणशून्यस्य व्रतिनः साधोः, इति गाथार्थः ॥

उत्तरमाह—

तत्थवि एवं बुज्झसु तं पइ अप्पमाणमेव सो वेसो ।
जो निस्संकं वट्टइ असुहट्ठाणेसु तेण जुओ ॥ २४८ ॥

व्याख्या–तत्रापि–वेषनिराकरणे, बुध्यस्व–जानीहि, तं प्रति–तमाश्रित्य, अप्रमाणमेव–निष्फलः, स वेषो–रजोहरणादिः, योऽनिर्दिष्टनामा, निःशङ्कं निरपेक्षं, वर्तते, अशुभस्थानेषु साध्वयोग्येषु, तेन वेषेण, युतः सहितः, इति गाथार्थः॥

एतदेव भावयन्नाह—

दुग्गइगईए गच्छंतयस्स न हु तस्स तेण साहारो ।
ववहारा अन्नेसिं तस्सवि लिंगं पमाणं तु ॥ २४९ ॥

व्याख्या–दुर्गतिगत्यां–नरकादिकायां, गच्छतो–व्रजतः, न च, दुरवधारणे, तेन वेषेण, तस्य लिङ्गोपजीविनः, साधारः परित्राणम, व्यवहारात् व्यवहारनयमतेन, (अन्येषां) तस्यापि–लिङ्गोपजीविनोपि, लिङ्गं वेषः, प्रमाणमेव, तुरवधारणे, इति गाथार्थः ॥

व्यतिरेकमाह—

जइ न पमाणं तो कह णु कप्पगंथंमि एरिसं वुत्तं ।
सुविहियजईण इयरं पडुच्च एयाए गाहाए ॥ २५० ॥

व्याख्या–यदि, नेति निषेधे, प्रमाणं लिङ्गमिति शेषः, ततः, कथं, ' नु ' इति वितर्के, कल्पग्रन्थे–प्रतीते, ईदृग्–वक्ष्यमाणम, उक्तं भणितं, सुविहितयतीनां प्रधानसाधूनाम, इतरं लिङ्गोपजीविनं, प्रतीत्याश्रित्य, उपलक्षणत्वाद्विशिष्टं चेत्यपि द्रष्टव्यम, एतद्गाथया, इत्यर्थः ॥

तमेवाह—

लिंगत्थस्स उ वज्जो तं परिहरओ व भुंजओ वावि ।
जुत्तस्स अजुत्तस्स व रसावणो एत्थ दिट्ठंतो ॥ २५१ ॥

व्याख्या–लिङ्गस्थस्य–रजोहरणादिवतः, तुरवधारणे, स च व्यवहितो योज्यः, स चैवम्–वर्ज्य एव–परिहरणीयः आधाकर्म्माद्याहारः शय्यातरः, तदाधाकर्म्मादिकं, तस्य स्वयं परिहरतो–वर्जयतः, भुञ्जानस्य–आसेवतः, वापीति समुच्चये, युक्तस्य वाऽयुक्तस्य वा वक्ष्यमाणनीत्या, वा समुच्चये, दृष्टान्तः–कल्पपालहट्टः, अत्र दृष्टान्तः–इहोदाहरणम् । यथा हि–कस्मिंश्चिद्देशे कल्पपालहट्टस्योपरि ध्वजः क्रियते, ततस्तं दृष्ट्वा सुखेनैव ब्राह्मणादयस्तं वर्जयन्ति, एवमत्रापि रजोहरणादि ध्वजतुल्ययोज्यम्, इति गाथार्थः ॥

तामेव गाथां किञ्चिद्व्याख्यातुकाम आह—

> वक्खाणं एईए तत्थ उ जुत्तस्स संजमगुणेहिं ।
> अजुयस्स उ तेहिं चिय इय लिंगुवजीविणो भणियं ॥ २५२ ॥

व्याख्या–व्याख्यानं–विवरणम् एतस्याः–पूर्वोक्तगाथायाः, तत्र पुनः कल्पग्रन्थे, युक्तस्य–सहितस्य संयमगुणैः–क्षान्त्यादिभिः, अयुक्तस्य असहितस्य तुः पूरणे तैरेव क्षान्त्यादिभिः, इति–इत्थं, लिङ्गोपजीविनः- साधुवेषधारकस्य, भणितमुक्तम्, इति गाथार्थः ॥

व्यतिरेकमाह—

> जइ लिंगमप्पमाणं हविज्ज तो तस्स अविरयस्सेव ।
> सिज्जायरंमि चिंता आहाकम्मेव का जइणो ॥ २५३ ॥

व्याख्या–यदि, लिङ्गं वेषः, अप्रमाणं–अकारणं, भवेद्–जायेत, ततः, तस्य–लिङ्गोपजीविनो, अविरतस्येव मिथ्यादृष्टेरिव, शय्यातरे–वसतिदातरि, आधाकर्म्मणि वा–प्रतीते, वा समुच्चये, चिन्ता–तद्वक्तव्यरूपा, का ? न काचित् यतेः साधोः, इति गाथार्थः ॥

इति स्थिते जीवोपदेशमाह—

> तम्हा एवं देससु रे जिय ! धम्मत्थमप्पणो एवं ।
> सव्वाणं सुत्ताणं विसयविभागो हु दुन्नेओ ॥ २५४ ॥

व्याख्या–तस्मादेवं–पूर्वोक्तक्रमेण, दिश–कथय, रे जीव !–भोः प्राणिन् ! ध-

र्मार्थं वृषनिमित्तम्, आत्मनः--स्वस्य, एवमुक्तवत्, सर्वेषां--समस्तानां, मूत्राणां, विषयविभागो यथावस्थितरूपो, दुःखोन्नेयः कृच्छ्रबोद्धव्यः, इति गाथार्थः ॥

वेषोऽप्रमाणमिति कथनविचारस्त्रयस्त्रिंशोऽधिकारः

इदानीं चतुस्त्रिंशमाह—

सुहिएसु य एमाई वयणेसु असंजयाउ बिंतन्ने ।
पासत्थाई तं नो जम्हेवं बिंति समयन्नू ॥ २५५ ॥

व्याख्या—" सुखितेषु च—सानवत्सु, " एवमादिवचनेषु—इत्थं प्रभृतिभणितेषु, आदिग्रहणाद्—"दुहिएसु य जा मे असंजएसु अणुकंपा । रागेण व दोसेण व तं निंदे तं च गरिहामि ॥ " तथा "अस्संजयाण पूया दस वि अणंतेण कालेणं " इत्यादि च दृश्यं सुबोधं च; असंय[*नास्तु ब्रुवते पार्श्वस्थादयः त] त्किमेषां दत्तेनेति । तत्परोक्तं, नेति निषेधे, यस्माद्, एवमित्थं, ब्रुवते—गदन्ति, समयज्ञाः—आगमवेत्तारः, इति गाथार्थः ॥

तदेवाह—

अस्संजयाण परतित्थियाण कविलाईयाण रागेण ।
सयणिज्जो वा अम्हं अम्हव्वयदेसिओ व इमे ॥ २५६ ॥

एयस्सिमिणा दत्तेण होइ एयस्स चित्तसंतावो ।
दोसेणेवं दाणं तेसिं चिय जाणिमं अत्थं ॥ २५७ ॥

व्याख्या—असंयतानामिति कोर्थः ? परतीर्थिकाणाम्, तानेव नामत आह—कपिलादीनां—साङ्ख्यब्राह्मणादीनाम्, रागेण—स्नेहेन, एतदेव भावयन्नाह—स्वजनो बन्धुरस्माकम्, 'अम्हवयदेसिओव' त्ति देशीभाषया अस्मत्सन्देशकाः, वा शब्दः समुच्चयार्थः, अयं शाक्यादिः, एवं मत्या यद्दानं तद्रागतो दानं भण्यते । द्वेषत आह—एतस्य—विवक्षितस्य शाक्यादेः अनेन अशनादिना दत्तेन—वितीर्णेन, भवति—जायते,

---

*कोष्ठकान्तर्गतपाठो द्वयोरपि पुस्तकयोस्त्रुटित एव भाति. १—संदेशकः क.

एतस्य-मदुद्दिष्टशाक्यादेश्चित्तसंतापो-मानसखेदः, द्वेषेण-मत्सरेण, एवम्-इत्थं, दानं वितरणं, 'भवति' इति क्रियाध्याहारः; तयोरपि-रागद्वेषदानयोः, जानीहि-अवगच्छ, अमुं-निर्दिष्टम्, अर्थमभिधेयम्, इति गाथार्थः ॥

पराभिप्रायमाशङ्कयाह—

संजयविवक्खभूया पासत्थाई असंजया एत्थ ।
भन्नंती नोअन्ने, अह तं नो, जेण सुत्तमिणं ॥ २५८ ॥

व्याख्या-संयतविपक्षभूता-प्रतिप्रतिपक्षसदृशाः, पार्श्वस्थादयः-प्रतीता, असंयता-असंयतशब्दवाच्याः, अत्र पूर्वोक्तवाक्येषु, भण्यन्ते,-प्रोच्यन्ते, नो-नैव अन्ये-शाक्यादयः अथ पराभिप्रायार्थः। तत्परोक्तं, नेति निषेधे, यस्मात्सूत्रं-सिद्धान्तवचनमिदं वक्ष्यमाणम इति गाथार्थः ॥

तदेवार्थतः प्राह—

जीवेणं असंजय-अविरयएमाइगुणजुओ भंते ! ।
अण्हाइ पावकम्मं हंता अण्हाइ पडिवयणं ॥ २५९ ॥

व्याख्या-जीवः-प्राणी, 'णं' इत्यलङ्कारे, असंयतः सयमाभावात्, अविरतः प्रत्याख्यानाभावात्, एवमादिगुणयुक्तः-इत्थं प्रभृतिगुणसहितः; 'भदन्त' इति श्रीवीरामन्त्रणे, 'अण्हाइ'त्ति-आश्रवति, पापकर्म्म-ज्ञानावरणादि, ? 'हंता' इति गौतमामंत्रणे, 'अण्हाइ'त्ति 'आश्रवति पापकर्म' इति प्रतिवचनमुत्तरम। तथा च भगवन्तं प्रति गौतमो 'भगवत्यादाविदमाह-" जीवेणं भंते असंजए अविरए अपडिहयपच्चक्खायपावकम्मे पावं कम्मं अण्हाइ ? हन्ता गोयमा ! जीवेणमित्यादि तदेव वाच्यमुत्तरम, अतः स्थितमिह सामान्येनासंयतो जीवो भण्यते इति गाथार्थः ।

व्यतिरेकं सपादया गाथया प्राह—

जइ पुण पासत्थाई असंजया एत्थ होंति विन्नेया ।
तो कह सम्मत्तस्स उ एस गुणो होज्ज सद्दाणं॥ २६० ॥

दुक्खियजीवणुकंपा.

व्याख्या–यदि, पुनः, पार्श्वस्थादयः, असंयता, अत्र–विचारे, भवन्ति, विज्ञेया, ततः, कथं, सम्यक्त्वस्य, तुः पूरणे, एष–वक्ष्यमाणो, गुणो–निर्मलता, भवेद्–जायेत, श्राद्धानां श्रावकाणाम्। किं लक्षणः? इत्याह–(दुःखितजीवानुकम्पा) श्रावकेण हि दुःखितजीवानामुपरि अनुकम्पा–दया विधेया, स कथं घटते? यदसौ तां निन्दति, इति सपादगाथार्थः॥

एतच्च पराभिप्रायमभ्युपगम्योक्तं 'पार्श्वस्थादयो दुःखिताः' इति; परमार्थतस्तु दुःखिता एते न भवन्तीति द्वितीयं पदमाह—

नय दुक्खी एए किंतु अंधाइ!

व्याख्या–नच–नैव, दुःखिताः पीडिताः, एते–पार्श्वस्थादयः, किन्तु प्रत्युत्तरवाक्ये, अन्धादयः चक्षुर्विकलकाणकुण्टादय एव दुःखिनः, इति पदार्थः॥

अभ्युच्चयार्थमुत्तरार्द्धमाह—

किंच निसीहे भणिया विरया तह संजया एए॥ २६१॥

व्याख्या–किञ्च–अपरं, निशीथे–शास्त्रशिरोमणौ भणिता–गदिताः। विरताः संयताश्च, एते–पार्श्वस्थादयः, इत्युत्तरार्द्धार्थः॥

तदेवार्थतः प्राह—

विरया पासत्थाई इयरे पुण मिच्छदिट्ठिणो होन्ति।
विरयाविरया सड्ढा इय संजयमाइणो वि भवे॥ २६२॥

व्याख्या–विरताः पार्श्वस्थादयः, इतरे अविरता मिथ्यादृष्टयो, भवन्ति, विरताऽविरताः श्राद्धाः, इति संयतादयोऽपि भवेयुः; मकारोऽलाक्षणिकः। तथाहि–संयताः, पार्श्वस्थादयः, असंयता मिथ्यादृष्टयः, संयतासंयतास्तु श्रावकाः, इति॥

तथा चोक्तं निशीथभाष्ये—

विरए व अविरए वा विरयाविरए व तिविहते इत्थं।

जं जं जुंजइ जोगं तट्ठाणपसंधणं कुणइ ॥ १ ॥

व्याख्या–"पासत्थाईया विरया, अविरयसड्ढो मिच्छादिट्ठी वा अविरओ, गिहीताणुव्वओ विरयाविरओ, तिविह, तिगिच्छोट्ठो पयं देइ" इत्यादि। तथा तत्रैव मार्गगमनाधिकारे–" असंजयलिंगीहिं उ पुग्गिसागिईपंहएहि यं दिवाइ" प्रथमपदस्य तच्चूर्णिव्याख्या–"असंजया गिही अन्नलिंगी वा" लिङ्गमेषां विद्यते इति लिङ्गिनोऽन्यपाखण्डिनः, इत्यर्थः। तस्मादन्वयव्यतिरेकोक्तत्वात्, स्वमतेऽसंयताः अत्र परोक्तसूत्रस्थानेन भण्यन्ते, इति गाथार्थः ॥

एवं विदिते सूत्रे जीवोपदेशमाह—

सुंदरतरं खु भणियं सव्वं समओदहिंमि रे जीव!।
मंदमइगोयरगयं दुन्नेयं होइ किं बहुणा ॥ २६३ ॥

व्याख्या-सुन्दरतरं–प्रधानतमं, खुर्वाक्यालङ्कृतौ, भणितं–उक्तं सर्व्वं, समयोदधौ–सिद्धान्तजलधौ, रे जीव! भो आत्मन्! मन्दमतिगोचरगतं स्वल्पबुद्धिविषयीभूतं, दुर्ज्ञेयं दुर्बोधं, भवति जायते, किमिति प्रश्ननिर्वचनार्थः, बहुना प्रभूतेन भणितेन इति शेषः, इति गाथार्थः ॥

पुनर्जीवोपदेशमाह—

तह देससु संससु तह तह तं कुणसु सव्वणुट्ठाणं।
जह समयन्नू जप्पंति न उण समईए उवएसो ॥ २६४ ॥

व्याख्या–तथा–तेन प्रकारेण, दिश–कथय धर्म्मम, तथा शंस–श्लाघय 'भव्यमिदमनुष्ठानं' इति, तथा–त्वं कुरु–विधेहि, सर्व्वं समस्तमनुष्ठानं–क्रियाम्; अनुस्वारोऽत्र लुप्तो द्रष्टव्यः, यथा–येन प्रकारेण समयज्ञाः सिद्धान्तविदो जल्पन्ति–गदन्ति, न पुनर्नैव स्वमत्या निजधिषणया; यत उक्तम—

"अपरिच्छियसुयनिहसस्स केवलमभिन्नसुत्तचारिस्स। सव्वुज्जमेण विकयं अन्नाणतवे बहुं पडइ ॥" इत्यादि उपदेशः शिक्षा तवेयं 'जीव' इति शेषः, इति गाथार्थः ॥

१–ट्ठाणससंघणं. ख. २–च्छा ट्ठापयं ख। ३ य हि वा। ४ क.

असंयतशब्दविचारश्चतुस्त्रिंशोऽयमधिकारः ॥

इदानीं पञ्चत्रिंशमाह—

केइ सकज्जाविक्खा निरविक्खा अन्नअंतरायस्स ।
अन्नहठियंपि सुत्तं समईए अन्नहा काउं ॥ २६५ ॥

वारेन्ति मुद्धसावय-जणे उ दिंते असुद्धमन्नाई ।
काऊणं पाणिवह इच्चाइ उल्लवेऊणं ॥ २६६ ॥

व्याख्या—केपि—एके स्वकार्यापेक्षा—आत्मप्रयोजनसस्पृहाः, निरपेक्षा—निस्पृहाः, अन्यान्तरायस्य अपरविघ्नस्य, अन्यथाप्रकारेण स्थितमपि, सत्सूत्रं—प्रकरणवचनं स्वमत्या-निजधिषणया, अन्यथा-विपरीतं,कृत्वा—विधाय,वारयन्ति—निषेधयन्ति,मुग्ध-श्रावकजनान्; तुः पूरणे, ददतो यच्छतः, अशुद्धं आधाकर्मादि, । तदेवाह—अन्ना-दि—पानप्रभृति, कृत्वा विधाय, प्राणिवधं जीवहिंसाम, इत्यादि—एवं प्रभृति, उल्ल-प्य—कथयित्वा, आदिग्रहणाद् "दाणं जो देइ धम्मसद्धाए, दाहिऊण चंदणं सो करेइ इंगालवाणिज्जं" इति द्रष्टव्यम । पराभिप्रायोऽयमस्य—यः किलैकेन्द्रियानुप सर्ज्य साधुभ्यो यच्छतस्तस्य बहुच्छेदश्चन्दनदाहतुल्याः, लाभश्च स्तोकोऽङ्गारमूल्यः, सदृश इति गाथार्थः ।

एतन्निराकरणार्थं गाथाद्वयमाह—

वक्खाणाओ विसेसो नज्जइ सव्वाणमेत्थ सुत्ताणं ।
अविरोहा समयन्नू भणंति एयस्सिमो अत्थो ॥ २६७ ॥

बेइंदियाइपाणे हणिऊणं एत्थ देइ जो दाणं ।
परसमये तस्सेयं चंदणइंगालुदाहरणं ॥ २६८ ॥

व्याख्या—व्याख्यानाद्—विवरणाद्,विशेषोऽर्थविभागो, ज्ञायते—बुध्यते, स-र्वेषां-निःशेषाणाम, अत्र जिनमते, सूत्राणां—सिद्धान्तवचसां, अविरोधात्--स-त्राविप्रतिपत्त्या, समयज्ञाः--सिद्धान्तविदो, भणन्ति जल्पन्ति, एतस्य पूर्वोक्तवच-नस्य अयं--वक्ष्यमाणोऽर्थोऽभिप्रेयम;द्वीन्द्रियादिप्राणान् प्रतीतान्,हत्वा विनाश्य,अत्र

जगति, ददाति -प्रयच्छति, योऽनिर्दिष्टनामा, दानं--वितरणं 'मांसादि' इति शेषः, परसमये--अन्यसिद्धान्ते, तस्य--मांसदातुः, इदं- पूर्वोक्तं, चन्दनाङ्गारोदाहरणं प्रतीतं तुच्छलाभप्रभूतहानिजनकम्, यतो विशेषप्रस्तावाद् द्वीन्द्रियादय एव प्राणा भण्यन्ते, नत्वेकेन्द्रियाः; तथा चोक्तं—

प्राणा द्वित्रिचतुःप्रोक्ता भूताश्च तरवः स्मृताः । जीवाः पञ्चेन्द्रिया ज्ञेयाः शेषाः सत्त्वा इतीरिताः ॥" इति गाथाद्वयार्थः

पराभिप्रायमाशङ्क्याह—

अह कह नज्जइ एयं, भण्णइ, सुत्तस्स जायइ विरोहो ।
को णु विरोहो सुण भो ! भयवइवयणं इमं जम्हा ॥२६९॥

व्याख्या--अथेति प्रश्नार्थः, कथं--केन प्रकारेण, अनुस्वारोऽत्र पूर्ववत्, ज्ञायते–बुध्यते, एतत्--प्राणशब्देन द्वीन्द्रियादयो न त्वेकेन्द्रिया गृह्यन्ते ? भण्यते--कथ्यते, सूत्रस्य--सिद्धान्तवचनस्य, जायते--भवति, विरोधो–विप्रतिपत्तिः । परः प्राह–कः किमभिधानः,'नु' इति वितर्के, विरोधः–उक्तस्वरूपः ?, आचार्यः प्राह–शृणु–आकर्णय, 'भो' इति परामन्त्रणे, भगवतीवचनं–पञ्चमाङ्गसत्रमिदं–वक्ष्यमाणं यस्मादुच्यते इति गाथार्थः ॥

तदेवार्थतः प्राह—

सजियमणेसणीयं वा समणे वा माहणे दितस्स ।
किं कज्जइ, भो गोयम ! बहु निज्जरमप्पबंधो उ ॥ २७० ॥

व्याख्या–सजीवं-सचेतनम्, अनेषणीयं आधाकर्मादि, वा समुच्चये, श्रमणे साधौ, माहने–जीवरक्षके, 'वा' शब्दो समुच्चये, ददतः प्रयच्छतः, किमिति प्रश्न. क्रियते अनेकार्थत्वाद्भवति ? भगवानाह–'भो' इत्यामन्त्रणोद्योतकः, गौतम इन्द्रभूते, बह्वी प्रचुरा निज्जरा–कर्मह्रासलक्षणा, अल्पः—स्तोको बन्धः कर्मोपादानं, तुः पूर्ववत्, तथा च तत्सूत्रम्--" तहाविहं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे भंते. किं कज्जइ ? गोयमा ! अप्पे पावे कम्मे. बहुयरिया से निज्जरा किज्जइ, इति गाथार्थः ॥

ननु' कोऽत्र दृष्टान्तः' इत्युक्तिप्रत्युक्तिसम्बद्धगाथात्रयमाह—

खवगरिसिखीरीनाएणं भणसि अहगुणिजणे भवे गं ।
गुणवंतमगुणवंतं जाणइ नणु केवली सम्मं ॥ २७१ ॥

अहरुत्तरवासावास कज्जट्ठियसाहुजुयलनाएणं ।
इयराणं पुण निच्छयववहारनएहिं ववहरणं ॥२७२॥

निच्छयनएण हीणेवि सुद्धभावाउ निज्जराभागी ।
भणिओ पुव्विं ववहारओ वि लिंगपमाणाउ ॥ २७३ ॥

व्याख्या--क्षपकर्षिक्षिरिज्ञातेन--तपस्विपरमान्नोदाहरणेन, तच्च किल--कयाचिदगार्या कस्यचित् क्षपकर्षेर्मासक्षपणपारणके तदर्थं क्षीरं विधाय यथाऽसौ न लक्षयति तथा दत्ता । क्षपकर्षिणा च सूत्रोपयुक्तेनाशठभावेन गृहीता । भुञ्जानस्य तां शुद्धभावेन केवलमुत्पन्नम्, ततो ज्ञातं यथा मदर्थं कृतेति । तस्या अगार्याः प्रभूतो लाभोऽल्पश्च कर्मबन्धो भणितः, तस्माद्बहुलाभे स्तोकहान्यां कथं परोक्तदृष्टान्तकथनम् ? ।

पराभिप्रायमाशङ्क्याह—भणसि—जल्पसि, अथेति पराक्काशे, गुणिजने प्रधानपात्रे, भवेदेव बहुलाभस्तोकहानिलक्षणं फलम् ।

आचार्यः प्राह—गुणवन्तं—प्रधानसंयमिनं, अगुणवन्तं—तद्विपरीतं जानाति—बुध्यते, ननु—अहो परः, केवली—प्रत्यक्षज्ञानी, सम्यग्—अवैपरीत्येन ।

दृष्टान्तमाह—अधरुत्तर वर्षावासकार्यस्थितसाधुयुगलज्ञातेन, तच्च प्रागेव 'तवविणयसत्तपूये'त्यादिगाथायां कथितम । तत्र हि लोकेन गुणवान् क्षपकर्षिरवबुद्धः, केवलिना त्वितरः कथित इति । इतरेषां- छद्मस्थानां, पुनर्निश्चयव्यवहारनयाभ्यां, व्यवहरणं—आचारः । तावेवाह—निश्चयनयेन निश्चयनयाभिप्रायेण, हीनेऽपि गुणतुच्छेऽपि, शुद्धभावात्--प्रशस्तान्तःकरणात्, निर्जराभागी--कर्महासकारको, भणित उक्तः।पूर्वं पश्चात् 'निच्छयओ पुण अप्पेवी'त्यादि गाथाव्यवहारतोऽपि द्वितीयनयमतेनापि लिङ्गप्रामाण्यात्--वेषप्रतिष्ठातः पञ्चकल्पादिगाथात इति गाथात्रयार्थः ॥

अभ्युच्चयार्थमाह—

१ पतन्ग्रही पर' क ।

किंचेत्थ केवली वि हु ववहारनयं पमाणयंतो उ ।
वंदइ इयरमनायं भुंजइ य तहा अहाकम्मं ॥ २७४ ॥

व्याख्या--किञ्च--अभ्युच्चये, अत्र--जिनमते, केवल्यपि प्रत्यक्षज्ञानी, हुः पूरणे, व्यवहारनयं निश्चयविपक्षं प्रमाणयन्--अनुल्लङ्घयन्, तुस्तथैव, वन्दते--नमस्करोति, इतरं--अकेवलिनम्, किंविशिष्टः ? अज्ञातो--ऽनवबुद्धः, भुङ्क्ते च--अश्नाति, तथा समुच्चयार्थः, आधाकर्म्म--अनेषणीयम्, इति गाथार्थः ॥

एतदेव प्रपञ्चयन्नाह—

सिरिधम्मदासगणिणावि वारियं अन्नलिंगीणं दाणं
सड्ढाणं भत्तीए दाणं विणयं च वज्जइ ॥ २७५ ॥

व्याख्या--श्रीधर्म्मदासगणिनापि--उपदेशमालाकर्त्रा वारितं निषिद्धम्, अन्यलिङ्गिनां--शाक्यादीनां, दानं--वितरणं, श्रावकानां--श्राद्धानां, भक्त्या--बहुमानेन, दानं विनयं च,वर्ज्जयति । तत्र दानमशनादिः,विनयस्त्वभ्युत्थानादिः"परतित्थियाण"त्ति पूर्व्वं भणितत्वाद्भक्तिशब्दश्चानुक्तोऽप्यस्यां वाच्यः। कथमन्यथावश्यकचूर्ण्यांभणितं श्रावककृत्ये ?--"कारुणियाए पुण देज्जावि"त्ति कारुण्येन--अनुकम्पया तेषामपि दद्यात् स्वमते तु निवारितं श्रावकाणाम् । इति गाथार्थः ॥

अमुमेवार्थं प्रपञ्चयति करणतः श्रावकाणां कृत्यमिति सपादां गाथामाह—

नियलिंगीणं कारियमेयं अह तं भवत्थपडियाणं
नणु जो दोसो भीमो जइ खलु अन्नयावि भवे ॥ २७६ ॥
किं सो न वज्जणिज्जो ।

व्याख्या--निजलिङ्गिणां स्वमतवेषिणां,कारितं विधापितं, एतद्दानादीनि शेषः, श्रीधर्म्मदासगणिनेत्यत्रापि पूर्व्वगाथोक्तं सम्बन्धनीयं "जणचित्तगहणत्थं करिति लिंगावसेसेवी"त्यनेन सुसाधुभ्यः सकाशात् इति शेषः । अथेति पराशङ्कार्थः तद्दानाद्यवस्थापतितानां ग्लानत्वे न त्वन्यदा, नन्विति परामन्त्रणे, यो दोषो—लोकहीलालक्षणस्तस्यां ग्लानावस्थायां स दोषः पूर्वोक्तो यदि खलु निश्चयेनान्यदापि ग्लानत्वाभावे जायेत । किमिति प्रश्ने ? स दोषो हीलालक्षणो न नैव वर्जनीयः परिहरणीय एव श्रावकैरिति शेषः ।

अयमभिप्रायः । यदि ग्लानावस्थायां लिङ्गिनः शुश्रूषां न कुर्वन्ति तदा प्रवचनहीला जायते, नीरोगाणां त्वसंयमानुमोदनान्न कुर्वन्ति । श्रावकास्तु यदि तेषां तदुचितं दानादि न कुर्वन्ति ततः सर्वदाऽपि प्रवचनखींसा भवति, इति पादाधिकगाथार्थः ॥

पुनरपि पराभिप्रायमाशङ्क्य पादोनां गाथामाह—

अह जइ जंपंति सो उ मिच्छत्ति ।

दव्वलिंगी भणिउ जाणसु तत्थावि पडिवयणं ॥७७॥

व्याख्या—अथेत्याचार्यवचनानन्तर्यार्थो, यदि, जल्पन्ति वदन्ति, दुर्विदग्धश्रावका इति शेषः, स लिङ्गी, तुः पूर्ववत्, मिथ्यादृष्टिः प्रथमगुणस्थानी, द्रव्यलिङ्गी वेषधरः भणितः उक्तः-"सेसो मिच्छद्दिट्ठी गिहिलिंगिकुलिंगदव्वलिंगीय" इत्यनेन । ततः कथं मिथ्यादृष्टेरयं दानादि कुर्म इत्यभिप्रायः । आचार्यः प्राह-जानीहि बुध्यस्व, तत्रापि मिथ्यादृष्टित्वे प्रतिवचनमुत्तरम्, इति गाथार्थः ॥

तदेवाह—

निद्धंधसपरिणामो हवेज्ज जइ कोइ सव्वहा विगुणो

तस्स फलं तस्सेव य इयराणं तत्थ का चिंता ॥७८॥

व्याख्या—"निद्धंधसत्ती" निःशूकः परिणामो भावोऽस्येति स, तथा भवेज्जायते । यदि,कोऽप्येकः,सर्वथा—सर्वप्रकारेण, विगुणः—सम्यक्त्वादिरहितः, तस्य विगुणस्य, फलं कार्यं,तस्यैव—विगुणस्यैव,इतराणां—श्रावकादीनां,तत्र विगुणे, का—किंरूपा, चिन्ता—मनोवृत्तिरिति गाथार्थः ॥

किमिति तत्र न चिन्तेत्याह—

जमणंतसो य पत्तं एयं जइसावएहिं संसारे ।

चउदहपुव्वधरा वि हु अणंतकायंमि निवसंति ॥ ७९ ॥

व्याख्या—यस्मादनन्तशः—सङ्ख्यातीतवाराः, प्राप्तम्, एतत्, द्रव्यलिङ्गं प्रधानमप्रधानं वा, यतिश्रावकैस्साधुश्राद्धैः, संसारे भवे तथा चोक्तं-"संसारसागरमिणं,

परिब्भमंतेहिं सव्वजीवेहिं । गहियाणि य मुक्काणि य, अणंतसो दव्वलिंगाइं ॥'
द्रव्यलिङ्गं चात्र ग्राह्यम्, यदभिन्नग्रन्थीनां तेषामेवानन्तद्रव्यलिङ्गसम्भवात् । भिन्नग्रन्थीनां तु, सकृत् सम्यक्त्वप्राप्तौ तत्प्रतिपातेऽप्यपार्द्धपुद्गलपरावर्त्तादूर्ध्वं मोक्षप्राप्त्या अनन्तद्रव्यलिङ्गप्राप्त्यसम्भवात् । न केवलं द्रव्यलिङ्गमफलं श्रुतमपि प्रमादिनामफलमेवेत्याह–चतुर्दशपूर्वधराः-श्रुतकेवलिनोऽपि नानन्तकायं प्रतीते निवसन्ति–तिष्ठन्ति, पूर्वगतसूत्राभावे सूत्रेति शेषः । पूर्वसूत्रे सति पुनर्नेति, यत उक्तं–"उववाओ लंतगम्मि, चोद्दसपुव्विस्स होइ उ जहन्नो । उक्कोसो सव्वट्ठे, सिद्धिगमो वा अकम्मस्स" इति गाथार्थः ॥

सूत्रणव विहितसम्बन्धां गाथामाह—

किंचहिगारवसाउ धम्माणुट्ठाणवित्ति सत्थेसु ।
वाहिपडिकिरियतुल्ला दोसगुणेहिं य समणुनेया ॥२८०॥

व्याख्या—किञ्चाभ्युच्चये, अधिकारवशान्नियोगिवशतः, धर्मानुष्ठानवृत्तिः—वृषकरणप्रवर्तनं, शास्त्रेषु-ग्रन्थेषु, किंविशिष्टा ? व्याधिप्रतिक्रियातुल्या-रोगनिराकरणसदृशा, दोषगुणाभ्यामपकारोपकाराभ्याम्, समनुज्ञेया बोद्धव्या । यथाहि, कश्चिद्रोगी सहिष्णुः, कश्चिदसहिष्णुः, रोगश्च कश्चिदुत्कटदोषोऽपरस्तु न तथा, इत्यादि विभाव्य यस्य यथा गुणो भवति, तस्य तथा चिकित्सा विधीयतेऽन्यथा तु दोष इति । एवमत्रापि साधोः सर्वसावद्यनिवृत्तस्यान्यथा कृत्यं, श्रावकस्य त्वारम्भप्रवृत्तस्यान्यथा इति । अतः स्थितमिह, श्रावकाणामेकेन्द्रियव्यापादनेऽपि प्रभूतो लाभोऽल्पश्च दोषः पात्रदाने, इति गाथार्थः ॥

व्यतिरेकमाह—

एवं जइ नो तो परिभणेज्ज कोई इमंपि पडिवयणं ।
काऊण य पाणिवहं चेइहरकारयस्साबि ॥ २८१ ॥

व्याख्या—एवमित्थं, यदि, नो-नैव, ततः, प्रतिभणेत्-ब्रूयात्,कोऽप्येकः, इदमपि वक्ष्यमाणम्, प्रतिवचनं–प्रत्युत्तरं, कृत्वा–विधाय, प्राणिवधं–जीवोपमर्दम्,

चैत्यगृहकारकस्यापि-देवभवनकर्त्तुरपि, न केवलं यतिदातुरित्यपि शब्दार्थः, इति गाथार्थः ॥

एवं भणनेपि परमतममुञ्चतः स्वरूपमाह—

सव्वारंभपयट्टस्स पुत्तमित्ताइकज्जनिरयस्स ।
इय जं जायइ बोहो तं नूणं मोहविप्फुरियं ॥२८२॥

व्याख्या—सर्वारम्भप्रवृत्तस्य-निखिलव्यापाररतस्य, पुत्रमित्रादिकार्यनिरतस्य, तत्र पुत्रोऽङ्गरूहो, मित्रं सुहृद्, आदिशब्दाच्छेषस्वजनग्रहः, तेषां कार्यं प्रयोजनं-विवाहादि, रतस्यासक्तस्येति पूर्वोक्तप्रकारेण, यस्माज्जायते भवति, बोधो मतं, तस्मान्नूनं-निश्चितं, मोहविस्फुरितम्-अज्ञानविजृम्भितम्, इति गाथार्थः ॥

इत्थंबुद्धे जीवोपदेशमाह—

सव्वाणं सुत्ताणं जं अविरोहेण होइ वक्खाणं ।
तं कुणसु सया जेणं जायइ नो अंतरायंति ॥२८३॥

व्याख्या-सर्वेषां-समस्तानां, सूत्राणां-सिद्धान्तोक्तवचसां, यद् अविरोधेन-अविप्रतिपत्त्या, भवति जायते, व्याख्यानं-विवरणं, तद्व्याख्यानं, कुरु-विधेहि, सदा-नित्यं, येन-यस्मात्, जायते-भवति, नो-नैव, अन्तरायः—कर्म्मविशेषः, इति वाक्यसमाप्तौ । अयमाशयः-चन्दनाङ्गारदृष्टान्तकथनतः स्वमते सूत्रविरोधमपरिभाव्य मुग्धजनदानाकरणे प्रकटएवोक्तः कर्मबन्धः, इति गाथार्थः ॥

प्राणिवधदानवर्णनः पञ्चत्रिंशोधिकारः ॥

साम्प्रतं षड्त्रिंशमाह—

इय दढ-कलिकाल—वसु-ल्लसंतनाणामयाण साहूणं ।
एयाण नत्थि चरणं सव्वाणं केइ जंपंति ॥ २८४ ॥

व्याख्या—इति पूर्वोक्तप्रकारेण, दृढो-गाढश्चासौ कलिकालश्च दुःसमालक्षणस्तस्य वशः-आयत्तता तेनोल्लसन्ति-विजृम्भमाणानि नानामतानि-बहुभिप्राया येषां, साधूनां-यतीनां, एतेषां पूर्वोक्तानाम्, नास्ति न विद्यते, चरणं-

चारित्रम्, सर्व्वेषां-समस्तानां, केप्येके, जल्पन्ति गदन्ति, इति गाथार्थः ॥

तन्मतं निराकुर्वन् गाथामाह—

न कहिंपि जे दीसइ संपुन्नं लक्खणं चरित्तस्स ।
एयंपि नेय जुज्जइ धम्मत्थीणं जओ भणियं ॥२८५॥

व्याख्या—न-नैव, कुत्रापि कस्मिन्नपि, येन-यस्माद्, दृश्यतेऽवलोक्यते, सम्पूर्णं-निःशेषं, लक्षणं-चिह्नं, "मग्गणुसारी सद्धो, पन्नवणिज्जो कियावरोचेव गुणरागी सक्कारंभसगओ तहयचारित्ति" इत्यादि रूपं चारित्रिणः-शीलवतः, तदपि पूर्व्वोक्तं नैव न च, युज्यते-घटते, भणितुमिति शेषः । धर्म्मार्थिनां-वृषप्रयोजनानां, यतो-यस्माद्भणितमुक्तमागमे इति शेषः, इति गाथार्थः ॥

तदेवाह—

अइयारबहुलयाए संपइ काले न विज्जइ चरित्तं ।
तं न जओ सावेक्खाए एत्थ समाही विणिद्दिट्ठो ॥२८६॥

व्याख्या—अतिचारबहुलतायां-प्रचुरमालिन्ये, सम्प्रति-वर्त्तमाने काले समयादिरूप, न-नैव, विद्यतेऽस्ति, चारित्रं शीलं, तत्परोक्तं, नेति-निषेधे, यतो-यस्मात्सापेक्षस्सस्पृहोऽत्र-चारित्रसत्तायां परिणाम इति शेषः, समाधिरुत्तरः, विनिर्दिष्टः कथितः, अयमाशयः-यस्य षड्जीवरक्षणपरिणामो विद्यते, तस्य चारित्रमस्ति । तथा चोक्तं निशीथे-

"जा संजमया जीवेसु, ताव मूलगुणउत्तरगुणा य । इत्तरियं छेयसंयम, नियंठबउसा य पडिसेवी" अस्य व्याख्या तच्चूर्ण्याम्-" भूएसु-छसु जीवनिकाएसु, जाव संयमया लब्भइ, ताव दोण्ह वि मूलुत्तरगुणाणं अणुसज्जणा, जाव मूलुत्तरगुणा लब्भंति ताव इत्तरिसामाइयसंजमस्स छेओवट्ठावणियस्स य अणुसज्जणा लब्भइ । जाव य दो संजमा लब्भंति, ताव बउसनियंठो पडिसेवणानियंठो य अणुसज्जंति ।" तम्हा नो सुत्तं पयवणं न वा य चरित्ती, न वा मूलुत्तरसेवाए, सज्जं चारित्ताउ भंसो भवइ । मूले दो दिट्ठता दिइउमगडं व उत्तरगुणा वि

दंसेयव्वा, उत्तरे–मंडवदिट्ठंतो । एत्थवि–मूलगुणे भणंति य गुरवो–एकव्वयभंगे सव्वव्वयभंगो, एम निच्छउ । ववहारस्स पुणो जमेव एक्कं भग्गं, एकभंगे य कमेण चारित्तं गलइ ” इत्यादि ।

यच्च पूर्वं चारित्रं केषुचिदधिकारेषु भणितं, तत्प्रस्तावादत्र तु मुख्यवृत्त्येति न पुनरुक्तशङ्का कार्या । एवमेव अन्येष्वपि केषुचिदधिकारेष्वपौनरुक्त्यं भावनीयम्, इति गाथार्थः ॥

चारित्रसत्ताविचारणः षड्त्रिंशोधिकारः ॥

साम्प्रतं पूर्वोक्तं निगमयन सप्तत्रिंशमाह—

किं बहुणा जीव तुमं पुव्वायरणासु रज्जसु ।
सयावि मा अहुणायरणासु अ सिद्धंते जेणिमं भणियं॥२८७॥

व्याख्या—किमिति–निर्वेदे, बहुना–प्रभूतेन–जल्पितेनेति शेषः, जीवात्मन ! त्वं–भवान, पूर्वाचरणासु–चिरन्तनसामाचारीषु, रज्यस्वाभिष्वङ्गं कुरु, सदापि–नित्यमेव, मेति निषेधे, अधुनाचरणासु–साम्प्रतसामाचारीषु । यतः ता सम्यग्विचार्यमाणा विघटन्ते, यथेयं साधुचैत्येषु विद्यमानेषु स्थाने स्थाने नूतना पौषधशाला कारापणलक्षणा सामाचारी । तथाहि–श्रावकः पौषधादिकं चतुर्षु स्थानेषु करोति, तद्यथा–चैत्यगृहे, साधुसमीपे, पौषधशालायां, स्वगृहे वा । तत्र चैत्ये साधुसमीपे वा करोति, तथावश्यकचूर्ण्यां विस्तरेणेश्वरेतरयोः श्रावकयोरुपवर्णितः । यदा तु पौषधशालायां स्वगृहे वा करोति, तदा तदतिदेशं कुर्वता भणितः सैव विधिः, नवरं तत्र गमनं नास्ति । कोऽर्थः? यथा गृहान्निर्गत्य चैत्ये साधुसमीपे वा गम्यते, तथाऽत्र नास्तीति । अतो ज्ञायते, भिन्नतरूपा पौषधशाला नास्ति, गृहैकदेश एव सा भवति । यत्तु व्यवहारवाक्यं “ रायसुयाई पंचवि पोसहसालाए संमिलियत्ति” तदाचरितवाक्यमेकदा जातम्, प्रतीतं च व्यवहारविदां । येन कारणेन जातं भवतु वाऽऽचरणत एवंरूपा पौषधशाला । तथापि–व्यभिचरति, भसति साधुचैत्ये पौषधशालायां गृहे वा पौषधादिकं क्रियते । उभयो-

रपि मनयोरावश्यकचूर्णिसत्कमिदमुक्तं—" सच्चेव विही, नवरि तत्थ गमणं नत्थि ।" तथा " असइ साहुचेइयाणं पोसहसालाए सगिहे वि सामाइयं आवस्सयं वा करेइत्ति" अस्यार्थस्य साधकानि बहूनि भगवतीसूत्राणि विद्यन्ते.तद्यथा-"समणोवासगस्सणं भंते सामाइअकडस्स समणोवासए अच्छमाणस्स केइ भंडं अवहरेज्जा ?" तथा—"समणा वासगस्सणं भंते सामाइयकडस्स समणोवासए अच्छमाणस्स केइ जायं करेज्जा ? " तथा—" समणो वासगस्सणं भंते ! सामाइयकडस्स समणोवासए अच्छमाणस्स, किं इरियावहिया किरिया कज्जइ ? संपराइया किरिया कज्जइ ?" इत्यादिषु पुनर्भगवतीउत्तराणि वाच्यानि । तस्माच्छ्रमणचैत्ययोरभावे पौषधशालादौ श्रावकादीनां पौषधादिकं कर्तुं युज्यते, तदकरणं च केनचित्कारणेन श्रद्धातुं युज्यते, अन्यथेत्थं प्रकटसिद्धान्तवाक्यानामकरणे स्फुटतरमागमविलेपः कुतो भवति।

यदि पुनरेवं कश्चित्स्वाग्रही भणिष्यति, यदुत—न सन्ति शोभनाः साध्वादयस्ततः कथं तत्समीपे करोमि पौषधादिकं? स एवं वाच्यः-येऽस्यद्यकालापेक्षया विशिष्टसामाचारीकास्तेषां समीपे कार्यम, तदभावेऽन्येषाम । श्राविकाभिरप्येवं कार्यं साध्वीसमीपे। यदि त्वेवं वदति, न कोऽप्यस्ति साध्वादिः सोऽनया गाथया बोद्धव्यः—

जो भणइ नत्थि धम्मो नय सामाइयं न चेव य वयाइं ।
सो सव्वसंघबज्झो कायव्वो होइ संघेण ॥ २८८ ॥ इत्यादि ।

किं चास्माभिः पूर्वं सम्यक्त्वज्ञानचारित्राण्यागमवचनैः प्रसाधितानि, तेभ्योऽपि श्रद्धातव्यं, भवभीरुभिर्गुणवत्त्वं साधूनाममीषाम । तस्मात् स्थितमिदं—साधुचैत्यसत्तायां नूतनपौषधशालाकरणसामाचारी भणितयुक्त्या विघटते. सिद्धान्ते—आगमे, येनेदं वक्ष्यमाणं भणितमुक्तं श्रुतकेवलिना, इत्यर्थः ॥

तदेवाह—

आयरियपरंपरएण आगयं जो उ आणुपुव्वीए ।
कोवेइ छेयवाई जमालिनामं स नस्सिहिही ॥ २८९. ॥

व्याख्या—आचार्यपरंपरया–सूरिसन्तानेनागतामायातां सामाचारी-मिति शेषः, यः पुनरनिर्दिष्टनामा, आनुपूर्व्या क्रमेण, कोपयति -अन्यथा कुरुते, छेकवादी--पण्डितंमन्यो, जमालिनाशं प्रतीतं, स विकोपको, नङ्क्ष्यति--संसारे यास्यतीति तात्पर्यम्, इति गाथार्थः ॥

अभ्युच्चयमाह—

धम्मत्थीणं चरणुज्जयाण विन्नायसमयसाराणं ।
सामायारी नो चलइ पुव्वसूरीण उ कयाइं ॥ २०० ॥

व्या० प्रकटार्था—

पुनरत्रैव धर्मार्थिनामुपदेशं प्रयच्छन्नपायदर्शनगर्भं गाथाद्वयमाह —

जं नत्थि आगमेसो न य आयरियं तु पुव्वसूरीहिं ।
समईए सोहणं पि हु देसंताणं इमं भणियं ॥ २०१ ॥

विगईकारणंमी जो उ परूविज्ज अन्नहा धम्मं ।
सो होज्ज अहाछंदो तव्वयणं नेव सायव्वं ॥ २०२ ॥

प्रतीतार्थं, नवरं–यथा–यथाछन्दत्वं भवति, तथा प्रथमेऽधिकारे " तं तं परूवेइ " इत्यादिना भावितम्, इति ॥

अत्रापि जीवोपदेशमाह—

इयलोयपारलोइयसुहाण जइ जीव ! तं सि अहिलासी ।
निउणं निरूविऊणं ता जंपइ तुज्झ उवएसो ॥ २०३ ॥

सुबोधा ।

इत्याचरणवर्णनः सप्तत्रिंशोऽधिकारः ॥

अष्टात्रिंशमाह —

रे जीव किंच जेसिं तए सुयं इय मयं बहुपयारं ।
तेसिं पि गुणे सलहसु जइ मज्झत्थं मणे धरसु ॥ २०४ ॥

व्याख्या— रे जीव-भो आत्मन्! किञ्चापरं, येषामनिर्दिष्टनाम्नाम्, त्वया-भवता, श्रुतमाकर्णितम्, इतीत्थं, मतमभिप्रायः, बहुप्रकारं-नानाभेदं, तेषामपि न केवलमन्येषामित्यपि शब्दार्थः। गुणान्—क्षान्त्यादीन्, श्लाघय-वर्णय, यदि माध्यस्थं रागाद्यभावः, मनसि-चित्ते, धारयसि-धत्से, अन्यथा तन्मतदूषणतो म त्सर एव स्फुटः स्याद्, इति गाथार्थः ॥

तद्गुणश्लाघामेवाह —

धन्ना मुणीण किरियं कुणंति धारंति मलिणवत्थे उ।
परिवज्जिअ-दव्वज्जण-ववहारा वारियारंभा ॥ २०५ ॥

व्याख्या—धन्याः-पुण्यभाजः, 'एते प्रत्यक्षाः साधवो वर्त्तन्ते' इति। क्रियाध्याहारः। यत्किमित्याह-मुनीनां-साधूनां, क्रियां-प्रत्युत्प्रेक्षणादिकां, कुर्व्वन्ति-चेष्टन्ते, धारयन्ति-पुनर्विदधति मलिनवस्त्रान्, तुः पुनरर्थः योजित एव, परीति-सामस्त्येन वर्जितस्त्यक्तो द्रव्यार्जनाय यद्द्रविणार्थं व्यवहारो--वाणिज्यादिको यैस्ते, तथा वारितारम्भाः--निषिद्धगृहकरणादिपापक्रियाः, इति गाथार्थः।

प्रक्रान्तसम्बन्धां गाथामाह—

अन्नेसिंपि य संससु विमलगुणो जेण जीव तुह होइ।
फलियं वुज्जलतरयं पमोयकरणा उ सम्मत्तं ॥ २०६ ॥

व्याख्या—अन्येषामपि--पूर्व्वव्यतिरिक्तानां, प्रशंस-श्लाघय, विमलगुणानतिशायिगुणान्, येन, जीव-प्राणिन्! तव--भवतो, भवति--जायते, स्फटिक इव--रत्नविशेषः, मकारः पूर्ववत्, उज्ज्वलतरकमतिशयनिर्म्मलं, प्रमोदकरणात् गुणवत्प्रीतेः सम्यक्त्वं दर्शनम्, इति गाथार्थः ॥

विमलगुणप्रशंसामेव गाथा नवकेनाह—

जीवंतु चिरं एए पवयणी परहिएक्ककयचित्ता।
जेहिं पगहिव्व आगमसरस्स गाहत्तणं पत्तं ॥ २०७ ॥

एसो सो धम्मकही अणेयमगललियमहुरवयणरसं।
जस्स वयणारविंदे भमरव्व पिवंति भव्वजणा ॥ २०८ ॥

एसो परवाइगइंदकुंभनिद्दलणकेसरिकिसोरो ।
सलहिज्जइ सूरी दंसणस्स तिलउ महाभागो ॥ २९९ ॥

विप्फुरइ जस्स वयणंमि भारई नट्टियव्व कव्वंमि ।
ललियपयसारसिंगारसुंदराकत्ति सो धन्नो ॥ ३०० ॥

एगंतरोववासाइगुरुयतवतवियतणुयदेहस्स ।
एयस्स चेव जम्मो कम्म--महासत्तुसूरस्स ॥ ३०१ ॥

परसमयविहाडणतक्कगंथपरमत्थकहणसोंडीरो ।
स कयत्थो जस्स मई वन्निजइ विउसलोएहिं ॥ ३०२ ॥

एसो समत्थदंसण—पभावणागुणसईहिं संजुत्तो ।
रयणायरोव्व रेहइ सयगं अवक्खलियमाहप्पो ॥ ३०३ ॥

कप्पद्दुमव्व विसरंति जे उ सयस्स कप्पियत्थे उ ।
अणवरयं ते धन्ना सुसावया दंसणुद्धरणा ॥३०४॥

किं बहुणा सव्वेसिं जियाण सलहेसु गुणगुण ।
जीव तुज्झ वस्सो एसो जइ मज्झत्थं पियं तुज्झ ॥३०५॥

व्याख्या- प्रकटार्थाः, नवरं प्रथमगाथया आगमधरगुणो वर्णितः, द्वितीयया धर्मकथकस्य, तृतीयया वादिनः, चतुर्थ्याः कवेः, पञ्चम्या तपस्विनः, षष्ठ्या-तर्कग्रन्थव्याख्यातुः, सप्तम्या समस्तगुणवतां, अष्टम्या श्रावकाणां, नवम्या समस्त-जीवानां,नैमित्तिकविद्यासिद्धाः साम्प्रतं प्रायो न सन्तीति तद्गुणगाथा न कृता।।

गुणस्तुतिविचारोऽष्टात्रिंशोऽधिकारः ॥

साम्प्रतं प्रकरणसारमुपदेशं दातुकाम आह—

तह कुणसु तहा चिट्ठसु तह भासं पन्नवेसु रे जीव ! ।
जह रायदोसवेराण निग्गहो होइ नियमेण ॥ ३०६ ॥

स्फुटाऽभिधेया, नवरं चिट्टउत्ति-निष्ठ; ग्रामादौ निवासं विधेहि ॥

साम्प्रतं प्रकरणमिदमुपसंहरन् येषां यादृशादुपदेशादिदं विहितं, यया हेतुतया यैर्यच्छिर्ष्यैर्यन्नामकं प्रकरणं यादृशं यैश्च यादृशैः शोधितं, येषां च यादृशानां सम्मतमिदमन्यैश्च यादृग्विधैः शोधनीयमित्यर्थावेदकं गाथाचतुष्टयमाह—

इय सिरिसिद्धंतमहोयहीण सिरिनेमिचंदसूरीणं ।
उवएसाउ मज्झत्थयाए सिरिदेवसूरीहिं ॥३०७॥

सिरिवीरचंदसूरीण सिस्समित्तेहि विरइय ।
एयं सिद्धंतजुत्तिजुत्तं जीवस्सणुसासणं विमलं ॥३०८॥

तह सयलागमपरमत्थ—कणयकसवट्टलद्धउवमेहिं ।
सयलगुणरयणरोहणगिरीहिं जिणदत्तसूरीहिं ॥३०९॥

सोहियमेयं अन्नेसिं सूरिपवराण संमयं किंच ।
जं एत्थ अणागमियं तं गीयत्था विसोहंतु ॥३१०॥

व्याख्या—इति—प्रकरणसमाप्तौ, श्रीसिद्धान्तमहोदधीनां—शोभनागम बृहत्समुद्राणां, श्रीनेमिचन्द्रसूरीणां एतन्नाम्नां श्रीमदुत्तराध्ययनलघुवृत्ति-वीरचरित-रत्नचूडादिशास्त्रकर्तृणां बृहद्गच्छशिरोमणीनां, निष्कलङ्क-सिद्धान्तव्याख्यानामृतप्रपाप्रदातॄणामिति, यावदुपदेशात्—व्याख्यानशिक्षातो, मध्यस्थतया रागाद्यभावत्वतः, श्रीदेवसूरिभिः, श्रीवीरचन्द्रसूरीणां निजदेशनावशलब्धनिर्मलकीर्त्तीनां, शिष्यमात्रैर्विनेयगणेषद्गुणैः, विरचितं-दृब्धम्, एतदिदम्, सिद्धान्तयुक्तियुक्तं-राद्धान्तयुक्तिसहितम्, जीवस्यात्मनो भव्यस्य वानुशासनं बोधकम्, विमलं—निर्मलम् । तथेति किञ्च, सकलागमपरमार्थकनककषपट्टलब्धोपमैः—निःशेषसिद्धान्ततत्त्वचामीकरतत्परीक्षादक्षोपलप्राप्तोपमानैः, सकलगुणरत्नरोहणगिरिभिर्निखिलगुणमाणिक्यरोहणशैलैर्जिनदत्तसूरिभिः एत-

श्रावकैः सप्तनिगृहनिवासिभिरिति यावत्, शोधितं-निर्दोषं कृतम्,एतज्जीवानुशासनं, अन्येषां महेन्द्रसूरिप्रमुखानां सूरिप्रवराणामाचार्यवर्याणां सम्मतमभिप्रेतम्, । किञ्चापरम्-यदत्रप्रकरणे अनागमिकमुत्सूत्रं, तद्गीतार्थाः-सिद्धान्तविदः, शोधयन्तु-निर्म्मलीकुर्व्वन्तु, इति गाथा चतुष्टयार्थः ॥

साम्प्रतमस्य प्रकरणस्य सोपमानं कार्यं दर्शयन्नाह—

सुहबोहकमलसंडाण सूरबिंबं व बोहणं कुणइ ।
पयरणमिणमो इयराण न उण पूयाण वसहा वा ॥३११॥

व्या—प्रतीतार्था ।

एतत्प्रकरणपाठादौ भव्यानां यत्स्यात्, तद्गाथात्रयेणोपदेशगर्भमाह—

मज्झत्थभावणाए पढंति चिंतंति जे उ एयत्थ ।
ते रायदोसवेरीण निग्गहं कुणहि हेलाए ॥३१२॥

तह कुगहरेणुमुक्कं दंसणरयणं तु जायए विमलं ।
तन्निग्गहाउ दंसण-सुद्धीउ जायए धम्मो ॥३१३॥

धम्माउ मोक्खसोक्खं अखंडं जायए जणाणेत्थ ।
जइ एयत्थी तो पयरणे कुणह सग्गाहं ॥३१४॥

एता अपि सुगमाः ॥

साम्प्रतमस्य प्रकरणस्याशीर्वादमाह–

जाव जिणसासणमिणं एयं जीवाणुसासणं ताव ।
नंदउ लोए सिद्धंत-जुत्तिसारं कुमयहरणं ॥३१५॥

व्या० प्रतीतार्था ॥

येनाभिप्रायेणेदं प्रकरणं कर्त्रा कृतं, तमाविष्कुर्व्वन्नाह–

पंडित्तणाभिमाणेण विरइयं नेय किंतु इय बोहो ।
धम्मरयपुव्वसूरीण चिट्ठिए जंति जइ जीवा ३१६॥

इयमपि तथैव ।

अधुना यावन्तोऽत्र मुख्यतः प्रकरणार्थाधिकारा यन्नामधेयास्तान् संगृह्य गाथापञ्चकेन स्मृत्यर्थमाह–

बिंबपइट्ठा१पासत्थनमण२पडिक्कमण३वंदणं४नंदी ५ ।
दाणनिसेहो६नहु माल७पडिम८अविहीअणुट्ठाणं ९ ॥३१७॥

सिद्धबलि१०पढमपासत्थ११चेइविहि१२सूरि१३संघनिंदं च १४ ।
पासत्थखेत्त१५नाणइढनिंद१६गुरुगच्छ१७चाग च १८ ॥३१८ ॥

बंभाइपूय१९उस्सग्गपढण२०बलहीणं२१अविहिगमणं च २२ ।
मलनिंद२३सड्ढिवक्खाण२४सड्ढनमणं२५च उलग्गं २६॥ ३१९॥

संजइकहणं२७जिणकुसुमपूय२८सुद्धगहु च२९नवनिंदा ३० ।
बहुचेइ३१मिच्छ३२अपमाणनेम३३असंजया३४ ॥३२०॥

पाणे३५चारित्तसत्त३६आयरण३७गुणथुइ३८एए होंति ।
अडतीसा अहिगाराउ इमंमी जीवस्स गुणाणुसासणे विमले॥३२१

एतदर्थश्च पूर्वोक्ताधिकारतो ज्ञेयः ।

स्वमतिकल्पितमिदं प्रकरणमिति मुग्धमतेस्सन्देहः स्यात्तन्निराकरणार्थमाह–

समईए एत्थ नो किंपि किन्तु ज दिट्ठं कप्पववहारे ।
पंचकप्पे निसीहे दसासुए पयरणाइसु । ३२२॥

व्याख्या–स्वमत्या–निजधिषणया, प्रकरणे, नो–नैव, किमपि स्तोकं, किंतु–नवरम, यत्–दृष्टमवलोकितं, केषु ? इत्याह–कल्पव्यवहारे·एतन्नामछेदग्रन्थ-द्वये, पञ्चकल्पनिशीथे एतदभिधानछेदग्रन्थयुग्मे, दशाश्रुते–दशाश्रुतस्कन्धनाम-छेदग्रन्थे, प्रकरणादिषु–पञ्चाशकोपदेशमालाष्टकादिषु आदिशब्दादाचारा-ङ्गसूत्रकृदङ्गपूज्योपदेशग्रहः, तद्ग्रथितमिति शेषः, इति गाथार्थः ॥

प्रकारान्तरेण निजनाम कथयन् प्रकरणसङ्ख्यां चाह-

देसवसुसूररीसाहिंसाई वन्नकहियनामेहिं ।
पयरणमिणमो रइयं तेवीसातिन्निसयगाहं ॥३२३॥

व्याख्या-देस, वसु, सूर, रीसा हिंसालक्षणा ये शब्दाः, तेषु ये आदि-वर्णाः-प्रथमाक्षराणि, तैः कथितं-प्रतिपादितं, नामाभिधेयं येषां ते तथा तैः, प्राकृतभाषया देवसूरीहिं इत्यर्थः । प्रकरणं ग्रन्थसन्दर्भम्,इदं प्रत्यक्षं, उ इति निपातः पूरणार्थो, रचितं-ग्रथितं, कियत्प्रमाणं ? (३२३) त्रयोविंशत्यधिकत्रिशतगाथमिति गाथार्थः ॥

क्व नगरादौ विरचितमित्याह-

अणहिल्लवाडनगरे जयसिंहनरेसरम्मि विज्जंते ।
दोहट्टिवसहिट्ठिएहिं बासट्ठी-सूर-नवमीए ॥

व्याख्या-अणहिल्लपाटनगरे-श्रीगुर्जरराजधान्यां, जयसिंहनरेश्वरे—श्रीकर्णदेवराजसूनौ, विद्यमाने सति, दोहटिनामश्रावकवसतिस्थितैः, द्वाषष्टे संवत्सरे, एकादशशतोपरिष्टादिति शेषः; सूरेणादित्यवारेण, नवमी तिथिलक्षणा, तस्यां रचितमिति पूर्वगाथोक्तक्रियासम्बन्धात्, इति गाथार्थः ॥

॥ समाप्तेयं जीवानुशासनवृत्तिः ॥

एतस्य वृत्तिकरणे, पुण्यं यदुपार्जितं मयका ॥
तेन सुखितोऽस्तु भव्यलोकः कुग्राहवियोगतो नित्यम् ॥१॥

मासेनैकेनेयं, सरस्वतीतोषतः कृता वृत्तिः ।
अणहिल्लपाटकनगरे, विजयिनि जयसिंहनृपे ॥२॥

दोहटिवसतिवासैः, श्रेष्ठिश्रीजासकस्य दानरुचेः ।
तदुपष्टम्भादपरं च श्राविकायाः वसुन्धर्याः ॥३॥

वीरादिपुत्रमातुर्नित्यं जिनसाधुपूजनरतायाः ।
श्रीदेवसूरिभिरसौ, भव्यजने जातविमलहृदयैः ॥४॥

श्रीमज्जिनेमिचन्द्राख्यसूरिभिः शोधिताद्दतैः ।
वृत्तिरेषातिगम्भीरसिद्धसिद्धान्तपारगैः ॥५॥

ग्रन्थाग्र श्लोक २२००